Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीगणेशाय नमः ॥

शाण्डिल्य हवन पद्धतिः

★

नवलदुर्गवास्तव्येन कर्मठकेसरीत्यादि विविधविरुदावलिभाजा
मिश्रोपाह्व न पण्डित प्रवर फूलचन्द्रेण सङ्कलय्य संगृहीता
तत्पुत्रेण श्रीराममिश्रेणायुर्वेदभिषजा संशोध्य प्रकाशिता

★

श्रीराम सम्पत्कुमार मिश्र
गंगा लहरी, तिलकमार्ग
रानीगंज, वर्द्धमान (प० बं०)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीगणेशाय नमः ॥

शाण्डिल्य हवन पद्धतिः

नवलदुर्गवास्तव्येन कर्मठकेसरीत्यादि विविधविरुदावलिभाजा
मिश्रोपाह्वेन पण्डित प्रवर फूलचन्द्रेण सङ्कलय्य संगृहीता
तत्पुत्रेण श्रीराममिश्रेणायुर्वेदभिषजा संशोध्य प्रकाशिता

★

श्रीराम सम्पत्कुमार मिश्र
गंगा लहरी, तिलकमार्ग
रानीगंज, वर्द्धमान (प० बं०)

★

संवत् २०४४ | प्रथम वार १००० | सन् १९८७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

डाक व्यय मुद्रा चतुष्टय प्रेषणेन
ग्रंथोऽयं बिना मूल्यं प्रदीयते

संकेतः
श्रीराम विजयकुमार मिश्र
गंगा लहरी, तिलकमार्ग
पो० रानीगंज, जि० वर्द्धमान (प०बं०)

पं० श्रीराम मिश्रः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीराधाकृष्णाभ्यां नमः ॥

सादरं समर्पणम्

स्वर्गीयाः पं० फूलचन्द्र मिश्रपादाः

पिता धर्मः पिता कर्म पिता हि परमं तपः ।
पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः ।

श्रद्धास्पदेषु प्रातः स्मरणीयेषु स्वनामधन्येषु पितृचरणेषु भवदीय जीवन सद्वृत्तहेतुकं ग्रन्थमिमं समर्प्य स्वश्रद्धाञ्जलिपुष्परूपेण कृतकृत्यश्रद्धावनतः

श्रीरामः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीः ॥

आभार प्रदर्शन

श्री शाण्डिल्य हवन पद्धति के प्रकाशन के लिए जिन सज्जनों से विशेष अनुदान प्राप्त हुआ एतदर्थ उनको मैं हार्दिक शुभाशीष प्रदान करता हुआ श्री भगवान से प्रार्थना करता हूँ कि भविष्य में भी इसी तरह सहायता करें जिससे और भी प्रकाशन प्रकाशित हों तथा विद्वानों की सेवा में बिना मूल्य प्रस्तुत कर सकँ।

शाण्डिल्य—श्रीराम मिश्र

११०१) पूरणमल जगन्नाथ वुचासिया
११०१) मदनलाल भक्तिराम भालोटिया
५०१) विश्वनाथ मोदी
५०१) रामावतार बाजोरिया
५०१) गौरीशंकरजी खेडवाल
५०१) रामप्रसाद सुरारका
५०१) बजरंगलाल सराफ
५०१) गोपाल कृष्ण खेमका
५०१) प्रहलादराय खेमका
५०१) हरीप्रसाद ललितकुमार सराफ
५०१) बद्रीप्रसाद बगडिया
२५१) प्रहलादराय देविदत्त सराफ
२५१) नथमल भूतिया
२५१) मोहनलाल क्याल
२५१) कैलाशचन्द्र जाजोदिया
२५१) महावीर प्रसाद बाजोरिया
२०१) गुप्त राजा
१०१) गुप्त राजा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाण्डिल्य हवनपद्धतिः

भूमिका

अग्नि की गति उर्ध्व है, क्योंकि प्रकाश का उद्गम सूर्य ऊपर है अतः समान धर्मा सूर्य से मिलने को उत्सुक है। जैसे जल समान धर्मा और उद्गम निधान समुद्र से मिलने आधोगामी है तद्वत् अग्नि उर्ध्वगामी है। अतः सृष्टि के आरम्भ से ही उर्ध्वगमन की इच्छा वाले जन अग्नि का आश्रय ग्रहण कर उर्ध्वगमन करते आये हैं। भक्ति मार्ग में भाव आवश्यक है, और ज्ञान मार्ग में ध्यान आवश्यक है, उसी तरह कर्म में विधि आवश्यक है।

लिफाफा पोस्टकार्ड पर यदि पता शुद्ध हुआ तो विना टिकिट भी प्रेष्य को मिलेगा। यदि पता ठीक नहीं तो सौ गुना टिकिट लगाने पर भी नहीं मिलेगा। विधि ही पता है।

इसी पुस्तक में आज तक छपी पुस्तकों से विशेषता है, अतः यह पूर्ण है। कर्मकाण्ड प्रेमी इससे लाभ उठावें।

गंगा लहरी - तिलकमार्ग
रानीगंज (वर्द्दवान)
२०४२

विद्वजन सेवक :—
मिश्रः श्रीराम शाण्डिल्यः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीगणेशाय नमः ॥

शाण्डिल्य हवनपद्धतिः

नत्वा तातं शिवं साम्बं हेरम्बं च तदात्मजम्
मिश्रः श्रीफूलचन्द्रोऽहं कुर्वे हवनपद्धतिम्
सर्वेऽत्र विषयाः सम्यङ् नैपुण्येन निवेशिताः
कोविदाः कर्मकाण्डस्य गृह्णन्तु मम संग्रहम् ॥ १ ॥

यत्पादपङ्कजरजोऽङ्कितमौलिभागाः ।
त्रैलोक्यशासकपदं समुदावहन्ति ॥
इन्द्रादयस्तमहमद्य नतो गणेशम् ।
कुर्यान्ममाभिलषितं परिपूर्णमाशु ॥ २ ॥

श्रीमत्पितामहमहं कृतिसूर्यमल्लं ।
श्रीरामदेवसुधियं पितरं प्रणम्य ॥
विद्यागुरूँश्च सुचि कर्मठलोकतुष्ट्यै ।
शास्त्रोदितां हवनपद्धतिमद्य कुर्वे ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्रादौ सुदिने प्रातर्नित्यावश्यकं कृत्वा सपत्नीको यजमानः यथाचारं सुगन्धितैलाभ्यंजनपूर्वकमुष्णोदकेन मङ्गलस्नानं कृत्वा शुक्लधौतवस्त्रे नूतनयज्ञोपवीतं च परिधाय यथायोग्यालंकृतो धृतकुंकुमकेशरान्यतमतिलकः शुभासने प्राङ्मुखउपविश्य दक्षिण-पार्श्वेसंभारान् स्थापयित्वा वामपार्श्वेपत्न्या१ समारब्धः। ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः। ॐ इतित्रिराचम्य। पवित्रधारणं कृत्वा। पवित्रेस्थौ वैष्णाव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्यरश्मिभिः। तस्यतेपवित्रपतेपवित्रपूतस्य यत्कामः पुनेतच्छकेयम्॥ ततः प्राणायामत्रयं कुर्यात्। अपवित्रः पवित्रोवा सर्वावस्थां गतोऽपिवा। यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः॥ इत्यात्मानं पूजासामग्रीं च संप्रोक्ष्य। ततः परमेकस्मिन् पीठे श्वेतं शुद्धं वस्त्रं परिस्तीर्य तदुपरि तण्डुलपूरितताम्रपात्रे मृन्मये वा कुंकुमेनाष्टदलं पद्मं कृत्वा फलमयं गणेशं संस्थाप्य। हस्ते अक्षतपुष्पाणि गृहीत्वा आनोभद्रादीन्मङ्गल-मंत्रान्पठेत् स्वयमशक्तश्चेत्आचार्यद्वारा पाठयेत् (तत्र पठनीय

---

१. शांतिकेषु च सर्वेषु प्रतिष्ठोद्यापनादिषु। वामे चोपविशेत्पत्नी व्याघ्रस्य वचनं यथा॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मंत्राः) ॐ आनोभद्राः क्रतवो यन्तु विश्वतोदब्धासोऽअपरीतासऽ-उद्भिदः । देवानोयथासदमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोदिवे-दिवे ॥१॥ देवानांभद्रा सुमतिर्ऋजूयतान्देवानाᳬं रातिरभि-नोनिवर्तताम् । देवानाᳬं सख्यमुपसेदिमाव्वयन्देवानऽआयुः प्प्रतिरंतुजीवसे ॥२॥ तान्पूर्व्वयानिविदाहूमहेव्वयम्भगमित्रमदि-तिन्दक्षमस्रिधम् । अर्य्यमणम्व्वरुणᳬं सोममश्विना सरस्वतीनः सुभगामयस्करत् ॥३॥ तन्नोव्वातो मयोभुव्वातुभेषजन्तन्माता पृथिवीतत्पिताद्यौः । तद्ग्रावाणः सोमसुतोमयोभुवस्तदश्विनाशृणु तन्धिष्ण्यायुवम् ॥४॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्न्व-मवसेहूमहेव्वयम् । पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥५॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाव्विश्व-वेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु पृषदश्वा मरुतः पृश्निमातरः शुभंयावानोव्विदथेषुजग्मयः । अग्नि-जिह्वामनवः सूरचक्षसोव्विश्वेदेवाऽअवसागमन्निह ॥ ७ ॥ भद्रङ्क-र्णेभिः शृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाᳬं सस्तनूभिर्व्यशेमहिदेवहितं यदायुः ॥ ८ ॥ शतमिन्नुशरदोऽ-अन्तिदेवायत्रानश्चक्राजरसन्तनूनाम् । पुत्रासोयत्र पितरोभवंति मानोमध्यारीरिषतायुर्गन्तोः ॥ ९ ॥ अदितिर्द्यौरदितिरन्तरिक्षम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दितिर्म्माता सपिता सपुत्रः । विश्वेदेवा ऽ अदितिः पञ्चजना ऽ अदितिर्जातमदितिर्ज्जनित्त्वम् ॥१०॥ तम्पत्नीभिरनुगच्छेमदेवाः पुत्रैर्भ्रातृभिरुतवाहिरण्यैः । नाकङ्गृभ्णानाः सुकृतस्यलोकेतृतीये पृष्ठेऽअधिरोचनेदिवः ॥११॥ आयुष्यँ्वर्चस्यँ्रायस्पोषमौद्भिदम् । इद ँ हिरण्यंवर्च्चस्वज्जैत्रायाविशतादुमाम् ॥ १२ ॥ द्यौः शांतिरन्तरिक्षँ शांतिः पृथिवीशांतिरापः शांतिरोषधयः शांतिः । व्वनस्पतयः शांतिर्विश्वेदेवाः शांतिर्ब्रह्मशांतिः सर्व्वँ शांतिः शांतिरेवशांतिः सामाशांतिरेधि ॥१३॥ यतोयतः समीहसे ततोनोऽअभयङ्कुरु । शन्नः कुरु प्रजाभ्योभयन्नः पशुभ्यः ॥१४॥ सुशांतिर्भवतु ॥ ॐ श्रीमहागणाधिपतये नमः। ॐ लक्ष्मीनारायणाभ्यां नमः। ॐ उमामहेश्वराभ्यां नमः। ॐ वाणीहिरण्यगर्भाभ्यां नमः । ॐ शचीपुरंदराभ्यां नमः । ॐ मातृपितृचरणकमलेभ्यो नमः । ॐ कुलदेवताभ्यो नमः । ॐ इष्टदेवताभ्यो नमः । ॐ ग्रामदेवताभ्यो नमः । ॐ स्थानदेवताभ्यो नमः । ॐ वास्तुदेवताभ्यो नमः । ॐ सर्वेभ्यो देवेभ्यो नमः । ॐ पुण्यं पुण्याहं दीर्घमायुरस्तु । ॐ सुमुखश्चैकदंतश्च कपिलोगजकर्णकः । लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानिनामानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥३॥ अभीप्सितार्थसिद्धॄर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥४॥ सर्वमङ्गलमांगल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यंबके गौरि नारायणि नमोस्तुते ॥५॥ विनायकं गुरुं भानुं ब्रह्मविष्णु महेश्वरान्। सरस्वतीं प्रणम्यादौ सर्वकार्यार्थ-सिद्धये ॥६॥ वक्रतुंड, महाकाय सूर्यकोटि समप्रभ। अविघ्नं कुरुमेदेव सर्वकार्येषु सर्वदा ॥७॥ इति प्रणम्य ॥ संकल्पं कुर्यात् ॥ अथ संकल्पः। ताम्रपात्रे गंधाक्षतपुष्पाणि यव जलकुशांश्चादाय। ॐ विष्णुर्विष्णुर्विष्णुः ३ ॐ तत्सद् ब्रह्मश्रीमद्भगवतो महापुरु-षस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणो द्वितीये परार्द्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते रथंतरादिद्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेत-वाराहकल्पे स्वायंभुवादिमन्वंतराणां मध्ये सप्तमे वैवस्वतमन्वंतरे कृतत्रेताद्वापरकलिसंज्ञानां चतुर्णां मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे तत्प्रथमचरणे तथा पंचाशत्कोटियोजनविस्तीर्णभूमण्ड-लान्तर्गतसप्तद्वीपमध्यवर्तिनि जंबूद्वीपे तत्रापि नवखण्डानां मध्ये नवसहस्रयोजनविस्तीर्णे भरतखण्डे तत्रापि परमपवित्रे भारतेवर्षे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आर्यावर्तान्तर्गतब्रह्मावर्ते वा अमुकदेशे वा अमुकक्षेत्रे श्रीगङ्गा-यमुनयोर्महानद्योरमुकदिग्भागे नर्मदाया अमुकप्रदेशे श्रीमन्नृप-विक्रमादित्यराज्यादमुकसंख्यापरिमिते प्रवर्तमानवत्सरे प्रभवा-दिषष्टिसंवत्सराणां मध्येऽमुकनाम्नि संवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथावमुकवासरे अमुकनक्षत्रे अमुक-योगे अमुककरणे अमुकराशिस्थे सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवंगुणविशेषणवि-शिष्टायां शुभपुण्यतिथौ देवब्राह्मणानां सन्निधौ अमुकगोत्रोऽमुक-शर्मा ममात्मनः श्रुति स्मृति पुराणोक्तफलावाप्तये अस्मिन्पुण्याहे मम कलत्रादिभिः सह जन्मराशेःसकासान्नामराशेः सकाशाद्वा जन्मलग्नाद्वर्षलग्नाद् गोचराद्वा येकेचिंच्चतुर्थाष्टमद्वादशाद्यनिष्ट स्थानस्थिताः क्रूरग्रहास्तैः सूचितं सूचयिष्यमाणं च यत्सर्वारिष्टं तद्विनाशार्थं सर्वदा तृतीयैकादशशुभस्थानस्थितवदुत्तमबलप्राप्त्यर्थं तथा दशान्तर्दशोपदशा मासदशा दिनदशा जनितपीडाऽल्पायु-राधिदैवाधिभौतिकाध्यात्मिकजनितक्लेशनिवृत्तिपूर्वकं शरीरा-रोग्यार्थं परमैश्वर्यप्राप्त्यर्थं विपुलधनधान्यपुत्रपौत्रादिवृद्ध्यर्थं नानाविधकर्मोपार्जितबन्धकविमोचनार्थं आजन्मोपार्जितसुकृत-मंगलाभिवृद्ध्यर्थं सर्वत्र प्रख्यातकीर्ति शत्रु पराभव सदाभीष्ट

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिद्ध्यर्थं अप्राप्तलक्ष्मी प्राप्त्यर्थं प्राप्तलक्ष्म्याश्चिरकालसंरक्षणार्थं व्यापारे बहुद्रव्य प्राप्त्यर्थं राजद्वारे वा सभायां यशोविजयादि-लाभार्थं श्रीपरमेश्वरप्रीत्यर्थं अमुकहवनाख्यं कर्म करिष्ये। तदं-गतया विहितं गणेशपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धमाचार्यादिवरणं, च करिष्ये ॥ इति संकल्पः ॥ अथ यजमानः स्ववामे धान्यपुंजोपरि कर्मार्थं गंगाजलपूरितताम्र-कलशं निधाय स्वहस्तेऽक्षतान् पुष्पाणिचादाय। ॐ तत्वायामि ब्रह्मणाव्वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो व्वरुणेहबोध्युरुशᳬ समानऽआयुः प्रमोषीः ॥१॥ ॐ भूर्भुवः स्वः वरुण अस्मिन्कलशे इहागच्छेहतिष्ठ ॥ इत्यावाह्य ॥ गन्धमादाय— ॐ अपांपतये वरुणाय नमः गन्धं विलेपयामि ॥ इति गन्धं समर्पयेत् ॥ अक्षतानादाय। ॐ अपांपतये वरुणाय नमः अक्ष-तान् समर्पयामि ॥ इत्यक्षतान् ॥ पुष्पाण्यादाय। ॐ अपां-पतये वरुणाय नमः पुष्पाणि समर्पयामि ॥ इति पुष्पाणि च समर्प्य कलशमभिमंत्रयन् ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः। मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥१॥ कुक्षौतु सागराः सर्वे सप्तद्वीपा वसुन्धराः। ऋग्वेदोऽथ यजुर्वेदः सामवेदोह्यथर्वणः ॥२॥ अंगैश्चसहिताः सर्वे कलशं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुसमाश्रिताः ।। इति अभिमंत्र्य ।। अक्षतानादाय तीर्थानावाहयेत् । गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु ।।१।। अस्मिन्कलशे सर्वाणि गंगाऽऽदीनि तीर्थान्यावाहयामि इत्यावाह्य ।। ॐ गंगादितीर्थेभ्योनमः ।। इति गन्धादिभिः सम्पूज्य । देवदान संवादे इति प्रार्थयेत् । देवदानव संवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुंभ विधृतो विष्णुना स्वयम् ।।१।। त्वत्तोये सर्व तीर्थानि देवाः सर्वे प्रतिष्ठिताः । शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।।२।। आदित्याऽवसवोरुद्राविश्वेदेवाः सपैतृकाः । त्वयितिष्ठन्ति सर्वेऽपि यतः कामफल प्रदाः ।।३।। त्वत्प्रसादिसं- यज्ञं कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नोभव सर्वदा ।।४।। ततो दूर्वाभिः कलशोदकेन संभारान्स्वात्मानं च— ॐ अपवित्रः पवित्रोवा सर्वावस्थांगतोऽपिवा । यःस्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ।।१।। ॐ विष्णुः पुनातु ३ इति संप्रोक्ष्य ।। दीपपूजनं कुर्यात् ।। देवता दक्षिणभागे अक्षतपुंजोपरि प्राङ्मुखमुदङ्मुखं बोर्ध्वमुखं वा दीपं निधाय गन्धाक्षतपुष्पैःपूजयेत् । भो दीप त्वं ब्रह्मरूप अन्धकारनिवारक । इमां मया कृतां पूजां गृह्णँस्तेजः प्रवर्धय ।।१।। ॐ दीपाय नमः गंधं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समर्पयामि । अक्षतान्समर्पयामि । पुष्पाणि समर्पयामि ॥ इति संपूज्य प्रार्थयेत् ॥ शुभं भवतु कल्याणमारोग्यम् पुष्टि वर्द्धनम् । मनो बुद्धि प्रबोधाय दीपज्योतिर्नमोस्तुते ॥१॥ ततः पृथ्वीति-मंत्रेण आसन प्रोक्षणम् । यथापृथिवीतिमंत्रस्य मेरुपृष्ठऋषिः सुतलं छन्दः कूर्मोदेवता आसनशोधनार्थे विनियोगः ॥ ॐ पृथ्वि त्वयाधृतालोका देवि त्वं विष्णुना धृता, त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् । इत्यासने जलं निक्षिप्य । गणपतिपूजनं कुर्यात् । अथ गणपतिपूजनम् ॥ तत्रादौ ध्यानम् । श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः क्षीराब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम् । दोर्भिः पाशांकुशेष्टा-भयधृतिविशदं चन्द्रमौलिं त्रिनेत्रं ध्यायेच्छांत्यर्थमीशं गणपति-ममलं श्रीसमेतं प्रसन्नम् ॥१॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित महागणपतये नमः ध्यायामि इति ध्यानम् ॥१॥ पुष्पाण्यादाय । हे हेरंब त्वमेह्येहि अंबिकात्र्यंबकात्मज । सिद्धिबुद्धिपते त्र्यक्ष-लक्षलाभपितुः पितः ॥१॥ नागास्य नागहार त्वं गणराज चतु-र्भुज । भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः ॥२॥ आवा-हयामि पूजार्थं रक्षार्थं च ममक्रतोः । इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ॥३॥ ॐ गणानान्त्वागणपतिᳬहवामहे प्रिया-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णांत्वाप्रियपतिᳪहवामहे निधीनान्त्वानिधिपतिᳪहवामहेव्वसो- मम । आहमजानिगर्भधमात्वमजासिगर्भधम् ॥ ॐ भूर्भुवः स्वः सिद्धि बुद्धि सहित महागणाधिपतये नमः । गणपतिमावाहयामि स्थापयामि । इत्यावाहनम् ॥२॥ ॐ रम्यं सुशोभनं दिव्यं सर्व- सौख्यकरं शुभम् । आसनं च मया दत्तं गृहाण गणनायक । ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणाधिपतये नमः आसनं समर्पयामि ॥३॥ इत्यासनम् उष्णोदकं निर्मलं च सर्वसौगंध्य- संयुतम् । पादप्रक्षालनार्थाय दत्तं मे प्रतिगृह्यताम् । ॐ भू० महागणाधिपतये नमः पाद्यं समर्पयामि इति पाद्यं ॥४॥ (एवं सर्वत्र ज्ञेयम्) ॐ ताम्रपात्रे स्थितं तोयं गंधपुष्पफलान्वितम् । सहिरण्यं ददाम्यर्घं गृहाण गणनायक ॥ इत्यर्घम् ॥५॥ ॐ सर्व- तीर्थसमायुक्तं सुगन्धि निर्मलं जलम् । आचमनार्थं मयादत्तं गृहाण परमेश्वर ॥ इत्याचमनम् ॥६॥ कावेरी नर्मदा वेणी तुंग- भद्रा सरस्वती । गंगा च यमुनाऽऽसांवाः स्नानार्थं प्रतिगृह्य- ताम् । इति स्नानम् ॥७॥ पयो दधि घृतं चैव मधु च शर्करा- युतम् । पंचामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् । इति पंचामृतस्नानम् ॥८॥ पुनः शुद्धोदकस्नानं समर्पयामि । ॐ सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाससी त्वं गृहाण भोः । इति वस्त्रयुग्मम् ॥९॥ ॐ नवभिस्तंतुभिर्युक्तं त्रिगुणं देवतामयम् । उपवीतं मयादत्तं गृहाण परमेश्वर ॥ इति यज्ञोपवीतम् ॥१०॥ पुनराचमनं च । ॐ श्रीखण्डं चंदनं दिव्यं केशरादिसमन्वितम् । विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम् ॥ इति चंदनम् ॥११॥ ॐ अक्षताश्च सुरश्रेष्ठकुंकुमाक्ताः सुशोभिताः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ इत्यक्षतान् ॥१२॥ ॐ सुमाल्यानि सुगंधीनि मालत्यादीनि वै प्रभो । मयाहृतानि पूजार्थं पुष्पाणि च गृहाणभोः ॥ इति पुष्पाणि ॥१३॥ ॐ दूर्वांकुरान्सुहरितानमृतान्मङ्गलप्रदान् । आनीतांस्तवपूजार्थं गृहाण गणनायक ॥ इति दूर्वांकुरान् ॥१४॥ ॐ वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः । आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥ इति धूपम् ॥१५॥ ॐ साज्यं च वर्त्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ इति दीपम् ॥१६॥ ॐ शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् । उपहार समायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥ इति नैवेद्यम् ॥१७॥ ॐ शीतलं निर्मलं तोयं कर्पूरेण समन्वितम् । आचम्यतां सुरश्रेष्ठ मयादत्तं हि भक्तितः ॥ इत्याचमनीयम् ॥१८॥ ॐ इदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फलं मयादेव स्थापितं पुरतस्तव । तेन मे सफलाऽऽवाप्तिर्भवेज्जन्मनिजन्मनि ॥ इति ऋतुफलम् ॥१९॥ ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । कर्पूरैलासमायुक्तं तांबूलं प्रतिगृह्यताम् ॥ इति तांबूलं ॥२०॥ ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्ति प्रयच्छ मे ॥ इति दक्षिणाम् ॥२१॥ ॐ कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् । आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥ इति नीराजनम् ॥२२॥ ॐ नानासुगंध पुष्पाणि यथाकालोद्भवानि च । पुष्पांजलिं मयादत्तं गृहाणगणनायक ॥ इति पुष्पांजलिम् ॥२३॥ ॐ यानिकानि च पापानि ज्ञाताज्ञात कृतानि च। तानि सर्वाणि नश्यंति प्रदक्षिणपदे पदे ॥ इति प्रदक्षिणात्रयम् ॥२४॥ अथ विशेषार्घः । रक्षरक्ष गणाध्यक्ष रक्ष त्रैलोक्य रक्षक । भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥१॥ द्वैमातुरकृपासिंधो षाण्मातुराग्रज प्रभो । वरद त्वं वरं देहि वांछितं वांछितार्थद ॥२॥ गृहाणार्घ्यमिदं देव सर्वदेवनमस्कृत । अनेन सफलार्घ्येण फलदोस्तु सदा मम ॥३॥ ॐ सिद्धिबुद्धिसहितमहागणपतये नमः विशेषार्घं समर्पयामि ॥ इति विशेषार्घः ॥ अथ प्रार्थना। विघ्नेश्वराय वरदाय सुरप्रियाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लंबोदराय सकलाय जगद्धिताय। नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमोनमस्ते ॥१॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय। विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमोनमस्ते ॥२॥ इति प्रार्थना। अनया पूजया सिद्धिबुद्धिसहित श्रीमहागणपतिः सांगः सपरिवारः प्रीयताम्। इति गणपतिपूजनम्। अथ सकल शिष्टपरिगृहीतो दानखण्डे आश्वलायनगृह्यपरिशिष्टोक्तः स्वस्तिपुण्याहवाचन प्रयोगः॥ तत्रादौ कलशस्थापनम्॥ तत्प्रकारः॥ (तत्रैकं पूजांगमैशानभागस्थे कलशे, द्वितीयं पुण्याहवाचनांग सन्निहिते कलशे वरुणपूजनम्। इत्युभयमपि सौकर्य्यायैकतन्त्रेण कर्तव्यम्।) पूजापीठादैशानदेश्यां कलशाधारभूमिं, अन्यां च पुण्याहवाचनाङ्ग कलशाधारभूमिं-स्पृष्ट्वा। ॐ मही द्यौः पृथिवी च न ऽ इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ॥१॥ इति कलशाधारभूमिं स्पृष्ट्वा। ॐ ओषधयः समवदन्त सोमेन सहराज्ञा। यस्मै कृणोति ब्राह्मणस्तꣳ राजन् पारयामसि ॥२॥ इति स्पृष्ट प्रदेशे उपकल्पितप्रस्थधान्यस्य पुञ्जं कृत्वाऽष्टदलं विलिख्य। ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जानि वर्त्तस्व सा नः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माऽऽविशताद्रयिः ॥३॥ इति धान्यपुञ्जस्योपरि अच्छिद्रं नूतनं हैमं राजतं ताम्राभावे मृण्मयं वा सूत्रवेष्टितकंठं कृतस्वस्तिकं कलशं संस्थाप्य। ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्यस्कम्भसर्जनी स्थो व्वरुणस्यऽऋतसदन्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद ॥४॥ इत्युपकल्पितकलशोदकेन तं पूरयित्वा। ॐ त्वां गन्धर्वाऽअखनंस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा व्विद्वान्यक्ष्मादमुच्यत ॥५॥ इति गन्धं प्रक्षिप्य॥ ॐ या ओषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामह ँ शतं धामानि सप्त च ॥६॥ इति सर्वौषधीः प्रक्षिप्य। ॐ काण्डात् काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥७॥ इति दूर्वाः प्रक्षिप्य। ॐ अश्वत्थे वो निषदनं पर्णे वो व्वसतिष्कृता। गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥८॥ इति पञ्च पल्लवान्प्रक्षिप्य॥ ॐ [illegible]ना पृथिवी नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः ॥९॥ इति सप्तमृदः प्रक्षिप्य॥ ॐ याः फलनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वँ हसः ॥१०॥ इति पूगीफलं प्रक्षिप्य। परिवाज-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥११॥ इति पंचरत्नानि प्रक्षिप्य । (अभावे हेमवा । हेमादि प्रक्षेपेऽप्ययमेव मन्त्रः) ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा व्विधेम ॥१२॥ इतिहिरण्यं प्रक्षिप्य । ॐ सुजातो ज्योतिषा सह शर्म व्वरूथमाऽसदत्स्वः । व्वासोऽअग्ने व्विश्वरूप ँ संव्ययस्व व्विभावसो ॥१३॥ इति वस्त्रयुग्मेन (रक्त सूत्रेण च तं) वेष्टयित्वा । ॐ पूर्णादर्व्वि परा पत सुपूर्णा पुनरापत । व्वस्नेवव्वि क्रीणावहाऽइषमूर्ज्ज ँ शतक्रतो ॥१४॥ इति सतण्डुलपात्रेण कलशाननमपिदध्यात् । ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुञ्चन्त्व ँ हसः ॥१५॥ इति नारिकेलं (पूगीफलं वा) स्वाभिमुखं स्थापयेदिति सम्प्रदायः । अत्र वरुणवाहन पूजने अपिकेचिदाहुः । ॐ तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोध्युरुश ँ समान ऽआयुः प्रमोषीः ॥१६॥ अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि स्थापयामि । ॐ अपां पतये वरुणाय नमः इति वरुणं सम्पूज्य कलशे देवता आवहयेत् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वे समुद्राः सरित्तीर्थानि जलदा नदाः । आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥१॥ इति कलशे देवता आवाह्य कलशमभिमन्त्रयेद्देवता आवाहयेच्च । कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः । कुक्षौतु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥२॥ अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः । अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा । आयान्तु मम शांत्यर्थं दुरितक्षयकारकाः ॥३॥ इति । ततः कुम्भप्रार्थना । देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसितदा कुम्भ विधृतो विष्णुना स्वयम् ॥१॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे प्रतिष्ठिताः ॥२॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥३॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥४॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय । सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥५॥ इति । (पुण्याहवाचनकलशेतु 'सान्निध्यं...' इत्यादिना प्रार्थ्य 'पाशपाणे नमस्तुभ्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पद्मिनीजीवनायक। पुण्याहवाचनं यावत् तावत्त्वं सन्निधौ भव' ॥१॥ इति वरुणं प्रार्थयेत्) ततो यजमानः अवनिकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय (आचार्यः) स्व दक्षिणेन पाणिना सुवर्णपूर्णकलशं (यजमानाञ्जलौ) धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च (आशिषः प्रार्थयते) तेनायुः प्रमाणेन (पुण्यं) पुण्याहं दीर्घमायुरस्तु (इति मन्त्रेण कलशं स्वशिरसा पत्नीशिरसा विवाहादौ संस्कार्यं शिरसा च संयोज्य कलशस्थाने कलशं स्थापयित्वा पुनर्गृहीत्वा मन्त्रेण तथैव इति त्रिवारं कुर्य्यात्) ततः कर्त्तोदङ्मुखानां युग्मब्राह्मणानां हस्तेषु। अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्। ब्राह्मणानां करे न्यस्ताः शिवाः आपो भवन्तु (मे) ते। इति उक्त्वा ॐ शिवा आपः सन्तु इति जलं दद्यात्। सन्तु शिवा आप इति ब्राह्मणाः प्रतिवचनं ब्रूयुः। लक्ष्मीर्वसतु पुष्पेषु लक्ष्मीर्वसति पुष्करे। सा मे वसतु वै नित्यं सौमनस्यं तथाऽस्तु नः। सौमनस्यमस्तु इति पुष्पं दद्यात्। अस्तु सौमनस्यम् इति ब्राह्मणाः प्रतिवचनं ब्रूयुः। अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशो बलम्। यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम। अक्षतं चारिष्टं चास्तु इत्यक्षतान्दद्यात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्त्वक्षतमरिष्टं च इति ब्राह्मणाः प्रतिवचनं ब्रूयुः। गन्धाः पान्तु सौमङ्गल्यं चास्तु। इति भवन्तो ब्रुवन्तु इति गन्धं दद्यात्। गन्धाः पान्तु सौमङ्गलं चास्तु इति ब्राह्मणाः प्रतिवचनं ब्रूयुः। अक्षताः पान्तु आयुष्यमस्तु (इति भवन्तो ब्रुवन्तु) इत्यक्षतान् दद्यात्। अक्षताः पान्तु आयुष्यमस्तु इति ब्राह्मणाः प्रतिवचनं ब्रूयुः। पुष्पाणि पान्तु सौश्रियमस्तु (इति भवन्तो ब्रुवन्तु) इति पुष्पाणि दद्यात्। पुष्पाणि पान्तु सौश्रियमस्तु इति ब्राह्मणाः प्रतिवचनं ब्रूयुः। (सफल) ताम्बूलानि पान्तु ऐश्वर्यमस्तु (इति भवन्तो ब्रुवन्तु) इति फलं ताम्बूलं च दद्यात्। सफल ताम्बूलानि पान्तु ऐश्वर्यमस्तु इति ब्राह्मणाः प्रतिवचनं ब्रूयुः। दक्षिणाः पान्तु बहुदेयं चास्तु इति दक्षिणां दद्यात्। दक्षिणाः पान्तु बहुदेयं चास्तु इति ब्राह्मणाः प्रतिवचनं ब्रूयुः। (स्वर्चितमस्तु इति जलं दद्यात्। अस्त्वर्चितम् इति ब्राह्मणाः प्रतिवचनं ब्रूयुः।) दीर्घमायुः शान्तिः पुष्टिःतुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यं चास्तु इति वाक्येन विप्रान्पार्थयेदिति सम्प्रदायः। ततः कर्त्ता यं कृत्वा सर्व वेदयज्ञक्रिया-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करणकर्मारम्भाः शुभाः शोभनाः प्रवर्त्तन्ते तमहमोङ्कारमादिं१ कृत्वा ऋग्यजुः सामा (थर्वा) शीर्वचनं बहृषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये इति वदेत्। वाच्यताम् इति विप्राः। ततः कर्त्ता ॐ द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत ॥१॥ सविता त्वा सवाना ँ सुवतामग्निर्गृहपतीना ँ सोमो व्वनस्पतीनाम्। बृहस्पतिर्व्वाचऽइन्द्रो जैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो व्वरुणो धर्म्मपतीनाम् ॥२॥ न तद्रक्षा ँ सि न पिशाचास्तरन्ति देवानामोजः प्रथमज ँ ह्येतत्। यो बिभर्त्ति दाक्षायण ँ सदेवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥३॥ उच्चा ते जातमन्धसो दिवि सद् भूम्याददे। उग्र ँ शर्म महि श्रवः ॥४॥ उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ इयक्षते ॥५॥ (इति मंत्रानुक्त्वा) (ततः पुराणोक्तमंत्राः) करोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः। सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ॥१॥ ययातिर्नहुषश्चैव धुन्धु-

---

टि० १ पुण्याहवाचनं सर्वं ब्राह्मणस्य विधीयते। तदेव च निरोंकारं कुर्यात् क्षत्रिय वैश्ययोः। इति यमोक्त्या तयोर्निरोंकारस्य विधानात्। अथवा तमहमोङ्कारमादिम् कृत्वा इति पठनीयम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मारो भगीरथः। तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु नित्यशः ॥२॥ स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च। स्वस्त्यस्त्वपादकेभ्यश्च सर्वेभ्यः स्वस्ति ते सदा ॥३॥ स्वाहा स्वधा शची चैव स्वस्ति कुर्वन्तु ते सदा। करोतु स्वस्ति वेदादिर्नित्यं तव महामखे ॥४॥ लक्ष्मीररुन्धती चैव कुरुतां स्वस्ति तेऽनघ। असितो देवलश्चैव विश्वामित्रस्तथाङ्गिराः ॥५॥ वशिष्ठः कश्यपश्चैव स्वस्ति कुर्वन्तु ते सदा। धाता विधाता लोकेशो दिशश्च सदिगीश्वराः ॥६॥ स्वस्ति तेऽद्य प्रयच्छन्तु कार्तिकेयश्च षण्मुखः। विवस्वान्भगवान्स्वस्ति करोतु तव सर्वदा ॥७॥ दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः। अधस्ताद्धरणीं चासौ नागो धारयते हि यः। शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥८॥ इत्येता ऋचः पुण्याहे ब्रूयात्। (यजमानः) व्रतजपनियमतपः स्वाध्यायक्रतुदयादमशमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् (इति) विप्रान्प्रार्थयेत्। समाहितमनसः स्मः (इति विप्राः)। (कर्ता) प्रसीदन्तु भवन्त इति वदेत्। प्रसन्नाः स्मः (इति विप्राः)। (ततो यजमानो वक्ष्यमाणैकसप्ततिवाक्यानि पठन् प्रतिवाक्यं पात्रे जलं पातयेत् तत्रारिष्टनिरसनमस्तु यत्पापमिति द्वाभ्यां, हताश्च ब्रह्म-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्विष इत्यादिभिः सप्तवाक्यैश्च पात्राद्बहिरुत्तरतो जलं पातनीयमिति सम्प्रदायः) शान्तिरस्तु १ पुष्टिरस्तु २ तुष्टिरस्तु ३ वृद्धिरस्तु ४ अविघ्नमस्तु ५ आयुष्यमस्तु ६ आरोग्यमस्तु ७ (शिवमस्तु) ८ शिवं कर्मास्तु ९ कर्मसमृद्धिरस्तु १० धर्मसमृद्धिरस्तु ११ (वेदसमृद्धिरस्तु १२ शास्त्रसमृद्धिरस्तु १३) धनधान्य समृद्धिरस्तु १४ (पुत्रपौत्र समृद्धिरस्तु १५) इष्ट सम्पदस्तु १६ (बहिः) अरिष्टनिरसनमस्तु १७ यत्पापं (रोगोऽशुभमकल्याणं) तत् (दूरे) प्रतिहतमस्तु १८ (अन्तः) यत् (यत्) श्रेयस्तदस्तु १९ उत्तरे कर्मणिनिर्विघ्नमस्तु २० उत्तरोत्तरमहरहरभिवृद्धिरस्तु २१ उत्तरोत्तराः क्रियाः शुभाः (शोभनाः) सम्पद्यन्ताम् २२ तिथिकरणमुहूर्त्तनक्षत्र (ग्रहलग्न) सम्पदस्तु २३ तिथिकरणमुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् २४ तिथिकरणे (स) मुहूर्त्ते सनक्षत्रे सग्रहे (सलग्ने) साधिदेवते प्रीयेताम् २५ दुर्गापाञ्चाल्यौ प्रीयेताम् २६ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् २७ इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् २८ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् २९ विष्णुपुरोगाः सर्वेदेवाः प्रीयन्ताम् ३० माहेश्वरीपुरोगाः उमा मातरः प्रीयन्ताम् ३१ वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् ३२ अरुन्धतीपुरोगा एक-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पत्न्यः प्रीयन्ताम् ३३ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् ३४ श्री सरस्वत्यौ प्रीयेताम् ३५ श्रद्धा मेधे प्रीयेताम् ३६ भगवती कात्यायनी प्रीयताम् ३७ भगवती माहेश्वरी प्रीयताम् ३८ भगवती पुष्टिकरी प्रीयताम् ३९ भगवती तुष्टिकरी प्रीयताम् ४० भगवती ऋद्धिकरी प्रीयताम् ४१ भगवती वृद्धिकरी प्रीयताम् ४२ भगवन्तौ विघ्नविनायकौ प्रीयेताम् ४३ सर्वाः कुलदेवताः प्रीयन्ताम् ४४ सर्वा ग्रामदेवताः प्रीयन्ताम् ४५ सर्वा इष्टदेवताः प्रीयन्ताम् ४६ (बहिः) हताश्च ब्रह्मद्विषः ४७ हताश्चपरिपन्थिनः ४८ हताश्च विघ्नकर्तारः ४९ शत्रवः पराभवं यान्तु ५० शाम्यन्तु घोराणि ५१ शाम्यन्तु पापानि ५२ शाम्यन्त्वीतयः ५३ (अन्तः) शुभानि वर्द्धन्ताम् ५४ शिवा आपः सन्तु ५५ शिवा ऋतवः सान्तु ५६ शिवा अग्नयः सन्तु ५७ शिवा आहुतयः सन्तु ५८ शिवा वनस्पतयः सन्तु ५९ शिवा ओषधयः सन्तु ६० शिवा अतिथयः सन्तु ६१ अहोरात्रे शिवे स्याताम् ६२ निकामे निकामे नः पर्जन्यो वर्षतु-फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ६३ (शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता) आदित्य-पुरोगाः सर्वे ग्रहाः प्रीयन्ताम् ६४ भगवान्नारायणः प्रीयताम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६५ भगवान्पर्जन्यः प्रीयताम् ६६ भगवान्स्वामी महासेनः प्रीयताम् ६७ (पुरोऽनुवाक्ययायत्पुण्यं तदस्तु ६८ याज्यया यत्पुण्यं तदस्तु ६९ वषट्कारेण यत्पुण्यं तदस्तु ७० प्रातः सूर्योदये यत्पुण्यं तदस्तु ७१) ततः कर्त्ता "एतत्कल्याणयुक्तं (पुण्यं) पुण्याहं वाचयिष्ये" इति वदेत्। "वाच्यताम्" इति विप्राः। (यजमानः) ब्राह्मं यपुण्यमहर्यच्च सृष्ट्युत्पादनकारकम्। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः। भो ब्राह्मणाः मम सकुटुंबस्य सपरिवारस्य गृहे करिष्यमाण (अमुककर्मणः) पुण्याहं भवन्तो ब्रुवन्तु॥ ॐ पुण्याहम् इति त्रिर्विप्रा ब्रूयुः॥ ३॥ (यजमानः) ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा। (यजमानः) पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतम्। ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः। भो ब्राह्मणाः मम सकुटुंबस्य सपरिवारस्य गृहे करिष्यमाण (अमुक कर्मणः) कल्याणं भवन्तो ब्रुवन्तु। इति त्रिः ३ कर्त्ता वदेत्। ॐ कल्याणम् इति त्रिः ३ विप्रा ब्रूयुः। (यजमानः) यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्या ँ शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कामः समृद्ध्यतामुप मादो नमतु। (यजमानः) सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृत। सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः। भो ब्राह्मणाः मम सकुटुंबस्य सपरिवारस्य गृहे करिष्यमाण (अमुक कर्मणः) ऋद्धिं भवन्तो ब्रुवन्तु। इति त्रिः ३ कर्त्ता वदेत्। ॐ ऋद्ध्यताम् इति त्रिः३ विप्रा ब्रूयुः। (यजमानः) सत्रस्यऽऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम। दिवं पृथिव्याऽअद्ध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः॥ (यजमानः) स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा। विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः। भो ब्राह्मणाः मम सकुटुंबस्य सपरिवारस्य गृहे करिष्यमाण (अमुक कर्मणः) स्वस्ति भवन्तो ब्रुवन्तु। इति त्रिः ३ कर्त्ता वदेत्। ॐ आयुष्मते स्वस्ति इति त्रि ३ विप्रा ब्रूयुः। स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषाविश्ववेदाः स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। (दानखण्डे एतावदेव पुण्याहवाचनम्) मृकण्डसूनोरायुर्यद् ध्रुवलोमशयोस्तथा। आयुषातेन संयुक्ता जीवेम शरदः शतम्। शतं जीवन्तु भवन्तः (इति विप्राः) शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मानो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मव्यारीरिषतायुर्गन्तोः ॥५॥ शिवगौरी विवाहे या या श्री रामे नृपात्मजे । धनदस्य गृहे या श्रीरस्माकं साऽस्तु सद्मनि । अस्तु श्रीः (इति विप्राः) मनसः काममाकूतिं व्वाचः सत्यमशीय । पशूना ᳪ रूपमन्नस्य रसो यशः श्रीः श्रयतांमयि स्वाहा ॥६॥ प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् । भगवान् शाश्वतो नित्यं स नो रक्षतु सर्वतः । भगवान् प्रजापतिः प्रीयताम् (इति पात्रे जलं क्षिपेत्) प्रजापते न त्वदेतान्यन्यो व्विश्वा रूपाणि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्तु व्वय ᳪ स्याम पतयो रयीणाम् ॥७॥ आयुष्मते स्वस्तिमते यजमानाय दाशुषे । श्रिये रत्नाशिषः सन्तु ऋत्विग्भिर्वेदपारगैः । (देवेन्द्रस्य यथा स्वस्ति यथा स्वस्ति गुरोर्गृहे । एकलिङ्गे यथा स्वस्ति तथा स्वस्ति सदा मम । "आयुष्मते स्वस्ति" (इति विप्राः) प्रति पन्थामपद्महि स्वस्तिगामनहेसम् । येन व्विश्वाः परिद्विषो व्वृणक्ति व्विन्दते व्वसु ॥८॥ ततो विप्राः कर्तुर्वामतः पत्नी (तत्सहचरितपुत्रादिकमपि) मुपवेश्य पातितेन जलेन पल्लवदूर्वाभिरुदङ्मुखास्तिष्ठन्तउपविष्टा वा सपत्नीकं कर्त्तारमभिषिञ्चेयुः ॥ तत्र मंत्राः ॥ पयः पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे पयो धाः । पयस्वतीः प्रदीशः सन्तु मह्यम् ॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्च नद्यः सरस्वती मपियन्ति सस्रोतसः । सरस्वती तु पञ्चधाशोदेशेऽभवत्सरित् ॥२॥ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्जनीस्थो व्वरुणस्यऽऋतसदन्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद ॥३॥ पुनन्तु मा देवजनाः पुनन्तु मनसाधियः । पुनन्तु व्विश्वा भूतानि जातवेदः पुनीहि मा ॥४॥ देवस्य त्वा सवितु प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्यै व्वाचो यन्तुर्यन्त्रिये दधामि वृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ॥५॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्यै व्वाचो यन्तुयन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥६॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन व्वीर्यायान्नाद्यायाभिषिञ्चामींद्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥७॥ विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्नऽआ सुव ॥८॥ धामच्छदग्निरिन्द्रो ब्रह्मा देवो वृहस्पतिः । सचेतसो व्विश्वे देवा यज्ञं प्रावन्तु नः शुभे ॥९॥ त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः । रक्षा तोकमुतत्मनौ ॥१०॥ अन्नपतेऽन्नस्य नो धेह्यनमीवस्य शुष्मिणः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रप्रदातारंतारिषऽउर्ज्जन्नो धेहि द्विपदं शं चतुष्पदे ॥ ११ ॥ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिः। विश्वेदेवाः शान्ति र्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि ॥१२॥ यतो यतः समीहसे ततोनोऽअभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥१३॥ (ततः पुराणोक्त मंत्राः) सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णु महेश्वराः। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥१॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥२॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्राह्मणा सहिताः सर्वेदिक्पालाः पांतु ते सदा ॥३॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्चमातरः ॥४॥ एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः। आदित्यश्चन्द्रमा भौमोबुधजीवसितार्कजाः ॥५॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः। देवदानवगन्धर्वाः यक्षराक्षसपन्नगाः ॥६॥ ऋषयो मनवो गावोदेवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥७॥ अस्त्राणि सर्वं शस्त्राणि राजानो वाहनानि च। औषधानि च रत्नानि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालस्यावयवाश्च ये ॥८॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते त्वामभिषिञ्चन्तु धर्मकामार्थ सिद्धये ॥६॥ इत्यभिषिच्य अमृताभिषेकोऽस्तु इति वदेयुः। केचिदभिषेकं न कुर्वन्तीति प्रयोगदीपे) कृतैतत् दानखण्डोक्तपुण्याहवाचनकर्मणः साङ्गता सिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो विभज्य मनसोद्दिष्टां दक्षिणां दातुमहमुत्सृजे। ततः कर्त्ता अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्ट ब्राह्मणानां वचनात् श्रीमहागणपति प्रसादाच्च परिपूर्णोऽस्तु। इति वदेत् समाचारात्। अस्तु परिपूर्ण इति द्विजा ब्रूयुः। इति हेमाद्रौ दानखण्डे आश्वलायनगृह्यपरिशिष्टोक्तः स्वस्ति पुण्याहवाचनप्रयोगः ॥

अथ साङ्कल्पिकाभ्युदयिकश्राद्धम्। अथ मोदादिविनायक पूजनम् ॥ आचम्य प्राणानायम्य कृतात्मशुद्धिः ॐ तत्सत् ॐ अद्य इत्यादिना देशकालात्मगोत्रादि कीर्तयित्वा (अमुक कर्मणि) सूतकपातकादिसंपातजन्यविघ्ननिवृत्तये करिष्यमाणाभ्युदयिकश्राद्ध साङ्गता सिद्धये च मोदादिविनायक पूजनं करिष्ये। ततः साक्षतं पुष्पमादायावाह्य कुङ्कुमरञ्जिताक्षतराजिषु स्थापयेत् यथा ॐ भूर्भुवः स्वः मोदाय नमः मोदमावाहयामि भोमोद

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इहागच्छ इहतिष्ठ ॥१॥ ॐ भूर्भुवः स्वः प्रमोदाय नमः प्रमोदमावाहयामि भोप्रमोद इहागच्छ इहतिष्ठ ॥२॥ ॐ भूर्भुवः स्वः सुमुखाय नमः सुमुखमावाहयामि भोसुमुख इहागच्छ इहतिष्ठ ॥३॥ ॐ भूर्भुवः स्वः दुर्मुखाय नमः दुर्मुखमावाहयामि भोदुर्मुख इहागच्छ इहतिष्ठ ॥४॥ ॐ भूर्भुवः स्वः अविघ्नाय नमः अविघ्नमावाहयामि भोअविघ्न इहागच्छ इहतिष्ठ ॥५॥ ॐ भूर्भुवः स्वः विघ्नकर्त्रे नमः विघ्नकर्त्तारमावाहयामि भोविघ्नकर्त्तरिहागच्छ इहतिष्ठ ॥६॥ इत्युदीर्य सांजलिः ॐ मोदप्रमोदसुमुखदुर्मुखाविघ्नविघ्नकृत्। आगच्छन्तु च कुर्वन्तु निर्विघ्नत्वं विनायकाः ॥१॥ ॐ मनोजूति·········ॐ भूर्भुवः स्वर्मोदादीन् षड्विनायकानावाहयामि स्थापयामि। इहागत्य मम पूजां च गृह्णन्तु इत्यावाह्य पाद्यादिभिः पूजयेत्। ततः साक्षतं जलमादाय अनया कृतया पूजया षड्विनायकाः प्रीयन्ताम्। तत्रादौ मातृपूजा ॥ पीठे (कोष्ठषोडशके) कृताग्न्युत्तारणप्राणप्रतिष्ठासु संस्थपितासु प्रतिमासु, अभावे पटादौ लिखितासु, अक्षतपुञ्जेषु वा प्राक्संस्था उदक्संस्था वा सगणाधिपा गौर्यादिदेवता आवाहयेत्। ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि स्थापयामि ॥१॥ ॐ भूर्भुवः स्वः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गौर्यै नमः गौरीमावाहयामि स्थापयामि ॥२॥ ॐ भूर्भुवः स्वः पद्मायै नमः पद्मामावाहयामि स्थापयामि ॥३॥ ॐ भूर्भुवः स्वः शच्यै नमः शचीमावाहयामि स्थापयामि ॥४॥ ॐ भूर्भुवः स्वः मेधायै नमः मेधमावाहयामि स्थापयामि ॥५॥ ॐ भूर्भुवः स्वः सावित्र्यै नमः सावित्रीमावाहयामि स्थापयामि ॥६॥ ॐ भूर्भुवः स्वः विजयायै नमः विजयामावाहयामि स्थापयामि ॥७॥ ॐ भूर्भुवः स्वः जयायै नमः जयामावाहयामि स्थापयामि ॥८॥ ॐ भूर्भुवः स्वः देवसेनायै नमः देवसेनामावाहयामि स्थापयामि ॥९॥ ॐ भूर्भुवः स्वः स्वधायै नमः स्वधामावाहयामि स्थापयामि ॥१०॥ ॐ भूर्भुवः स्वः स्वाहायै नमः स्वाहामावाहयामि स्थापयामि ॥११॥ ॐ भूर्भुवः स्वः मातृभ्यो नमः मातॄरावाहयामि स्थापयामि ॥१२॥ ॐ भूर्भुवः स्वः लोकमातृभ्यो नमः लोकमातॄरावाहयामि स्थापयामि ॥१३॥ ॐ भूर्भुवः स्वः हृष्ट्यै नमः हृष्टिमावाहयामि स्थापयामि ॥१४॥ ॐ भूर्भुवः स्वः पुष्ट्यै नमः पुष्टिमावाहयामि स्थापयामि ॥१५॥ ॐ भूर्भुवः स्वः तुष्ट्यै नमः तुष्टिमावाहयामि स्थापयामि ॥१६॥ ॐ भूर्भुवः स्वः कुलदेवतायै नमः कुलदेवतामावाहयामि स्थापयामि ॥१७॥ गणेशपूर्वकगौर्यादिषोड़शमातृभ्यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नम इति षोडशभिरुपचारैः पूजयेत् ॥ पूजनं समाप्य ॥ आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम। निर्विघ्नं सर्व कार्येषु कुरुध्वं सगणाधिपाः ॥१॥ इति नारिकेर फलं समर्प्य (कृताञ्जलिः) गणेश पूर्वकगौर्यादिषोडशमातॄणां पूजनविधौ यन्न्यूनमतिरिक्तं वा तत्सर्वं मातॄणां प्रसादात्परिपूर्णमस्तु। अनया पूजया सगणेश गौर्यादिषोडशमातरः प्रीयन्ताम्। अथ वसोर्द्धाराप्रयोगः॥ मातृपूजासन्निहिते कुड्ये यथाचारं कुंकुमेन (एकं द्वौ त्रीन् चतुरः पञ्च षट् सप्त) बिन्दून् (अधोऽध क्रमेण) कृत्वा (तत्र) घृतेन दुग्धेन वा सप्तसु बिन्दुषु सप्तधाराः पंच-धारा वा यथासंभवं प्राक्संस्था उदक्संस्था वा प्रादेशमात्रीः कुर्यात् ॥ तत्र मंत्राः॥ ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु व्वसोः पवि-त्रेण शतधारेण सुप्वा। ततः ॐ "कामधुक्षः" इत्येतावतैव मंत्रेण ता धारा (विन्दून्) ऊर्ध्वभागे मिथः श्लिष्टा कुर्यात्। ततः

ॐ भूर्भुवः स्वः श्रियै नमः श्रियमावाहयामि स्थापयामि ॥१॥
ॐ भूर्भुवः स्वः लक्ष्म्यै नमः लक्ष्मीमावाहयामि स्थापयामि ॥२॥
ॐ भूर्भुवः स्वः धृत्यै नमः धृतिमावाहयामि स्थापयामि ॥३॥
ॐ भूर्भुवः स्वः मेधायै नमः मेधामावाहयामि स्थापयामि ॥४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ भूर्भुवः स्वः स्वाहायै नमः स्वाहामावाहयामि स्थापयामि ॥५॥
ॐ भूर्भुवः स्वः प्रज्ञायै नमः प्रज्ञामावाहयामि स्थापयामि ॥६॥
ॐ भूर्भुवः स्वः सरस्वत्यै नमः सरस्वतीमावाहयामि स्थापयामि ॥७॥ (पञ्चधारापक्षे प्रज्ञासरस्वत्योरभावः) वसोर्द्धारादेवताभ्यो नमः श्रियादिसप्तघृतमातृभ्योनमः इति पूजनम् । यदंगत्वेन भो देव्यः पूजिता विधिभार्गतः । कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् । आचरितवसोर्द्धारापूजनविधौ यन्न्यूनातिरिक्तं तत्सर्वं परिपूर्णमस्तु इति कृतांजलिः प्रार्थयेदिति । अनया पूजयाश्रयादिसप्तघृतमातरः प्रीयन्ताम् । तत आयुष्यसूक्त जपः । करिष्यमाणादः कर्मणोऽमङ्गलनाशार्थमायुष्यजपं करिष्ये । आयुष्यं व्वर्चस्यꣳरायस्पोषमौद्भिदम् । इदꣳहिरण्यं व्वर्चस्वज्जैत्रायाविशतादु माम् ॥१॥ न तद्रक्षाꣳसि नपिशाचास्तरन्ति देवानामोजः प्रथमजꣳह्येतत् । यो विभर्ति दाक्षायणꣳहिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥२॥ यदा व्रध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः । तन्मऽआबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥३॥

(आयुष्यजपः श्लोकाः) अश्वत्थामादि ऋषयोत्रशिष्ठप्रमुखास्तथा । मार्कण्डेय प्रभृतयः सर्वे सन्तु शिवार्चकाः ॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जमदग्निः कश्यपश्च दीर्घमायुः करोतु मे। अन्ये ऋषिगणा देवा इन्द्राद्याश्च सशक्तिकाः ॥२॥ भूसुराः सुतपोनिष्ठाः सत्यव्रत-परायणाः। दीर्घमायुः प्रयच्छन्तु सर्वकामस्य सिद्धये ॥३॥ यदायुष्यं चिरं देवाः सप्तकल्पान्तजीविनः। ददुस्तेनायुषा सम्यक् जीवे शरदांशतम् ॥४॥ दीर्घा नागास्तथा नद्यः समुद्रागिरयो-दिशः। अनन्तेनायुषा तेन जीवेम शरदः शतम् ॥५॥ सत्यानि पञ्च भूतानि विनाशरहितानि च। अविनाश्यायुषा तद्वज्जीवेम शरदः शतम् ॥६॥ कृतैतदायुष्यमंत्र जप कर्मणः साङ्गतासि-द्ध्यर्थं दक्षिणा द्रव्यं ब्राह्मणेभ्यो दातुमहमुत्सृजे। इत्यायुष्य-मंत्रजपः। इति

(अथ साङ्कल्पेन विधिना[१] नान्दीश्राद्धप्रयोगः)

तत्र तावत्कर्त्ता प्राङ्मुख उदङ् मुखोवा उपविश्य आत्मानं सम्भारांश्च ॐ अपवित्रः पवित्रो वा इति पठन् कुशत्रयानीतेन जलेन सम्प्रोक्ष्याचम्य, प्राणानायम्य ॐ तत्सत् ३ अद्य

---

१ टि० भविष्य पुराणे। सव्येनसर्वकार्यम्। ऋजव एव कुशाः तिलार्थे यवादातव्याः। पिण्ड निर्वपणं कुर्यान्न वा कुर्यान्नराधिप। वृद्धि श्राद्धे महावाहो कुलधर्म्मानवेक्ष्य हि। अनस्मद्वृद्ध शब्दानाम रूपाणामगोत्रिणाम्। अनाम्नामतिलाद्यैश्च नान्दीश्राद्धे च सव्यवत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यादिना देशकालानात्मानं च सङ्कीर्त्य सम्भाव्यमानसूतकाद्य-शौचपात निमित्तकान्तरायनिरसनद्वारा श्रीपरमेश्वरप्रीति पूर्वकं (श्री अमुक कर्मणि) ऽभ्युदयकारकत्वसिद्ध्ये ब्राह्मणयुग्मभोजन-पर्याप्तान्ननिष्क्रयभूत यथाशक्ति हिरण्येन (तन्मूल्येन वा) साङ्कल्पिकं नान्दीश्राद्धं करिष्ये ॥ इति संकल्प्यः ॥ वस्त्राच्छा-दिते पीठे ऋजुदूर्वा२ (कुशा) त्रयात्मकं "पुञ्जाष्टकं (पुञ्जचतु-ष्टयंवा) युग्मतः चतुर्षुस्थानेषु" प्रागग्रमुदगग्रं वा निधाय दक्षिणत उत्तरोत्तरं पूर्वतः पश्चिम पश्चिमं वाऽवस्थितान् नान्दी-मुखान् ध्यायन् पाद्यादि दद्यात् ॥ तद्यथा॥ ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनंवृद्धिः ॥१॥ ॐ मातृपितामहीप्रपितामह्यः नान्दी-मुख्यः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥२॥ ॐ पितृपितामह प्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥३॥ माता-मह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनंवृद्धिः ॥४॥ (अथा-

---

(२) कुशस्थाने च दूर्वाः स्युः मङ्गलस्याभिवृद्धये। इति हेमाद्रौ ब्रह्मपुराणे उपदिष्टहर्वया सह विकल्पार्थम। तेन संस्कारक कर्माङ्ग नान्दी श्राद्धे दर्भस्थाने दूर्वा वा कार्या इति ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सनदानम्)॥ ॐ सत्यत्रसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमो नमः नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ॥१॥ ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इमे आसने वो नमो नमः नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्त्यो भवत्यः तथा प्राप्नुवामः ॥२॥ ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमो नमः नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ॥३॥ ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इमे आसने वो नमो नमः नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः प्राप्नुवामः ॥४॥ (ततो विश्वेदेवादिभ्यो गन्धादिदानम्)॥

गंधपुष्पधूपदीप ताम्बूलपूगीफल वस्त्रयज्ञोपवीतानि दद्यात्। ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥१॥ ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥२॥ ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः ॥४॥ (ततो युग्म ब्राह्मणभोजन पर्याप्तामान्ननिष्क्रयदानम्) ॐ सत्य वसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्मब्राह्मण भोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यं अमृत रूपेण स्वाहा संपद्यतां वृद्धिः ॥१॥ ॐ मातृपितामहीप्रपितामह्यः नान्दीमुखाः भूर्भुवः स्वः इदं युग्म ब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यं अमृत रूपेण स्वाहा संपद्यतां वृद्धिः ॥२॥ ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण स्वाहा संपद्यतां वृद्धिः ॥३॥ ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः ॥४॥ (ततो युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयदानम्) ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतंद्रव्यं अमृतरूपेण स्वाहा संपद्यतां वृद्धिः ॥१॥ ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण स्वाहा संपद्यतां वृद्धिः ॥२॥ ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यं अमृतरूपेण स्वाहा संपद्यतां वृद्धिः ॥३॥ ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः इदं युग्म ब्राह्मणभोजन पर्याप्तामान्न निष्क्रय भूतं द्रव्यं अमृतरूपेण स्वाहा संपद्यतां वृद्धिः ॥४॥ (ततः सक्षीरमुदकदानम्) ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम् ॥१॥ ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम् ॥२॥ ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः प्रीयन्ताम् ॥३॥ ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः प्रीयन्ताम् ॥४॥ (अथाशिषो ग्रहणम्) गोत्रं नो वर्द्धताम् । (वर्द्धतां वो गोत्रम्) दातारो नोऽभिवर्धन्ताम् । (अभिवर्धन्तां वो दातारः) वेदानोऽभिवर्धन्ताम् । (अभिवर्धन्तां वो वेदाः) सन्ततिर्नोऽभिवर्धताम् । (अभिवर्धतां वः सन्ततिः) श्रद्धा च नो मा व्यगमत् । (मा व्यगमद्वः श्रद्धा) बहु देयं च नोऽस्तु । (अस्तु वो बहु देयम्) अन्नं च नो बहु भवेत् । (भवेद्वो बह्वन्नम्) अतिथींश्च लभेमहि । (लभन्तां वोऽतिथयः) याचितारश्च नः सन्तु । (सन्तु वो याचितारः) एताः सत्या आशिषः सन्तु । (सन्त्वेताः सत्या आशिषः) इत्याशीः प्रार्थ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नम् । [कोष्ठकान्तर्वाक्यानि तु आचार्यादिभिरेव पठनीयानि] (ततो दक्षिणादानम्) ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठा सिद्धयर्थं द्राक्षामलकयवमूलनिष्क्रयणीं दक्षिणां दातुमहमुत्सृजे ॥१॥ ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठा सिद्धयर्थं द्राक्षामलकयवमूलनिष्क्रयणीं दक्षिणां दातुमहमुत्सृजे ॥२॥ ॐ पितृपितामहप्रपितामहा नान्दीमुखाः भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठा सिद्धयर्थं द्राक्षामलकयवमूल निष्क्रयणीं दक्षिणां दातुमहमुत्सृजे ॥३॥ ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठा सिद्धयर्थं द्राक्षामलकयवमूल निष्क्रयणीं दक्षिणां दातुमहमुत्सृजे ॥४॥ (यवमूलं आर्द्रकम्) इति दक्षिणादानम् ॥ अथ कर्त्ता नान्दीश्राद्धं सम्पन्नम् इति वदेत् आचार्यादयश्च 'सुसम्पन्नम्' इति प्रत्युच्य—ॐ वाजे वाजे वत वाजिनोः नोधनेषु विप्राऽअमृता ऋतज्ञाः । अस्य मध्वः पिवतमादयध्वं तृप्तायात पथिभिर्देव यानैः ॥१॥ आमा वा जस्य प्रसवोजगम्यादाद्यावा पृथिवी विश्वशम्भू ॥ आमागन्तां पितरा मातराचामा सोमो अमृतत्वाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गम्यात् ॥२॥ माता पितामही चैव तथैव प्रपितामही। पिता पितामहश्चैव तथैव प्रपितामहः ॥१॥ मातामहस्तत्पिता च प्रमातामहकादयः। एते भवन्तु मे प्रीताः प्रयच्छन्तु सुमंगलम् ॥२॥ इति संप्रार्थ्य विसर्जयेच्च। अथ साक्षतं जलं पुष्पं वाऽऽदाय अस्मिन् साङ्कल्पिके नान्दीमुखे श्राद्धे न्यूनोऽतिरिक्तो वा यो विधिः स उपविष्टानां भवतां ब्राह्मणानां वचनात् नान्दीमुख प्रसादाच्च परिपूर्णोऽस्तु ॥ इति प्रार्थयेत् ॥ ब्राह्मणाश्च अस्तु परिपूर्णः १ अस्तु परिपूर्णः २ अस्तु परिपूर्णः ३ इति त्रिरुच्चैः प्रवदेयुः ॥ इति साङ्कल्पिकनान्दीमुखश्राद्धविधानं सम्पूर्णम् ॥

अथ रक्षाभिधानम् ॥ गौरसर्षपानक्षतान् वा सरक्षासूत्रं फलद्रव्यं च वामकरतलोपरि निधाय दक्षिणेन करतलेन विधाय ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम्। विष्णुं रुद्रं श्रियं देवीं नत्वा चैव सरस्वतीम् ॥१॥ स्थानाधिपं नमस्कृत्य दिननाथं निशाकरं। धरणगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ॥२॥ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम्। राहुं केतुं नमस्कृत्य यज्ञारंभे विशेषतः ॥३॥ शक्राद्या देवताश्चैव मुनींश्चैव तपोधनान्। गर्गं मुनिं नमस्कृत्य नारदं पर्वतं तथा ॥४॥ वशिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम्। अगस्त्यं च पुलस्त्यं च दक्षं मित्रं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पराशरम् ॥५॥ भरद्वाजं च माण्डव्यं याज्ञवल्क्यं च गालवम् । विद्याधिका ये मुनय आचार्याश्च तपोधनाः ॥६॥ तान् सर्वान् प्रणमाम्येवं यज्ञ रक्षा करान् सदा । पूर्वे रक्षतु गोविन्द आग्नेय्यां गरुडध्वजः ॥७॥ याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते । वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः ॥८॥ उत्तरे श्रीधरो रक्षेदै शान्यां तु गदाधरः । ऊर्ध्वं गोवर्धनधरो नीचैश्चैवं त्रिविक्रमः ॥९॥ एवं दश दिशो रक्षेद् वासुदेवो जनार्दनः । आचार्यं माधवो रक्षेद् ब्रह्माणं पातु चाच्युतः ॥१०॥ यजमानं सपत्नीकं कमलाक्षस्तु रक्षतु। अपक्रामन्तु ते भूता ये भूता भूतले स्थिताः ॥११॥ ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया । अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ॥१२॥ सर्वेषामविरोधेन शुभ कर्म समारभे । यदत्रोपस्थितं भूतं विघ्नं कर्त्तुं कथंचन । त्यक्त्वा स्थानमिदं सर्वं शीघ्रं दूरं प्रयातु तत् ॥१३॥ हुँ फट् ३ इति पठित्वा गणपतये निवेद्य गणपतिनाऽनुगृह्य दत्तमिव तत्पुनर्गृहीत्वा तद्विभज्य ॐ गणपतये नमः । रक्षासूत्रं समर्पयामि । ॐ वरुणाय नमः । रक्षासूत्रं समर्पयामि । इत्येवं सर्वेभ्योऽर्चितेभ्योदेवेभ्योर्पयेत् । ब्राह्मणानां हस्तेषु रक्षासूत्रं बध्नीयात् ॥ पठेच्च ॥ ॐ व्रतेनदीक्षामाप्नोति दीक्षयाप्नोति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्य माप्यते ॥१॥ इति ततस्तिलकं कुर्वन् । ॐ युंजंति ब्रध्नमरुषं चरंतं परितस्थुषः । रोचन्ते रोचनादिवि । युजंत्यस्यकाम्याहरि विपक्षसारथे । शोणाधृष्णूनृवाहसा ॥१॥ पठेत् ॥ ततो ब्राह्मणो यजमानस्थ दक्षिणेहस्ते स्त्रियो वामहस्ते च रक्षासूत्रं बध्नीयात् । यथा ॥ ॐ यदाबध्नन्दाक्षायणा हिरण्य ᳪ शतानीकाय सुमनस्यमानाः । तन्मऽआबध्नामि शतशारदाया युष्माञ्जरदष्टिर्य्यथासम् ॥ १ ॥ ॐ त्वं य्यविष्ठदाशुषोनॄं ः पाहि शृणुधीगिरः । रक्षातोकमुतत्मना ॥२॥ येन राजा बलिर्बद्धो दानवेन्द्रो महाबलः । तेन त्वामनु बध्नामि रक्षे माचल माचल ॥३॥ इति ततस्तिलकं कुर्यात् । ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्ति-नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥१॥ आदित्या वसवो रुद्राः विश्वेदेवाः मरुद्गणाः । तिलकं ते प्रयच्छन्तु धर्मकामार्थसिद्धये ॥२॥ लक्ष्मीनारायणौ देवौ सावित्रीकम-लासनौ । पार्वतीशंकरौ देवौ दत्ताश्च तिलकं शुभम् ॥३॥ ततस्तिलकमध्ये अक्षतदान मंत्रः । येऽक्षताः क्षतहंतारो हंतारोऽखिल वैरिणाम् । तांस्ते मूर्ध्नि प्रयच्छामि तेन तेशं सदा भवेत् ॥१॥ इत्यनेन मंत्रेणाक्षतान् तिलकमध्ये दद्यात् । ततः रक्षा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्मसाद्गुणार्थं ब्राह्मणेभ्यो दक्षिणां दद्यात् । इति रक्षाविधानम् ॥ अथाचार्यादिवरणम् ॥ ततः प्राङ्मुखो यजमानः उदङ्मुखमाचार्यमुपवेश्य गंधादिभिः संपूज्य ॥ वरणद्रव्यं चादाय ॥ देशकालौ संकीर्त्य० अमुकगोत्रोऽमुकशर्माहं श्रुतिस्मृति पुराणोक्त फलप्राप्त्यर्थं अमुकहवनकर्मणि आचार्यकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणं एभिर्वरण द्रव्यैः आचार्यत्वेन त्वामहं वृणे । वृतोऽस्मीत्याचार्यः ॥ प्रार्थना ॥ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेस्मिन्ना चार्यो भव सुव्रत ॥१॥ ततो ब्रह्मवरणम् ॥ देशकालौ संकीर्त्य० अमुकगोत्रोऽमुक शर्मा अमुकहवनकर्मणि विहितकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्वरणद्रव्यैर्ब्रह्मत्वेन त्वामहं वृणे । वृतोस्मीति प्रतिवचनानंतरं गंधपुष्पैः संपूज्य । यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः । तथा त्वं मम यज्ञेस्मिन्ब्रह्मा भव द्विजोत्तम ॥ इति प्रार्थयेत् ॥२॥ ततः ऋत्विजश्चतुरो द्वौ वा वृणुयात् । देशकालौ संकीर्त्य० अमुकहवनकर्मणि विहितकर्मकर्तु ममुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्वरणद्रव्यैरृत्विक्त्वेन् त्वामहं वृणे । वृतोस्मीति प्रतिवचनानंतरं गन्धपुष्पादिभिः संपूज्य । भगवन्सर्वकर्मज्ञ सर्वधर्मभृतांवर । वितते मम यज्ञेस्मिन्नृत्विक्त्वं भव सुव्रत ॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रार्थयेत् ॥३॥ ततो यथाचारं सर्वेषां मधुपर्कपूजां कृत्वा। अस्य यागस्य निष्पत्तौ भवंतोभ्यर्थितामया। सुप्रसन्नैश्च कर्तव्यं कर्मेदं विधिपूर्वकम् ॥१॥ इति प्रार्थयेत् ॥ इत्याचार्यादिवरण प्रयोगः ॥ अथाचार्यकर्म ॥ आचम्य। प्राणानायम्य। देश-कालौ स्मृत्वा। अस्मिन् अमुकहवनकर्मणि यजमानेन वृतोह-माचार्यकर्म करिष्ये। इति संकल्प्य शरीरशुद्ध्यर्थं सहस्रशीर्षेति पुरुषसूक्तन्यासं कुर्यात् षोडशर्चं वा जपेत्। ततो यथाविधिना पंचगव्यं कृत्वा। ॐ आपोहिष्ठामयोभुवरिति त्रिभिर्मंत्रै कर्म-भूमिं संभारांश्च प्रोक्ष्य भूमिपूजनं कुर्यात्। ॐ भूरसिभूमिरस्य दितिरसि व्विश्वधाया व्विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ-पृथिवीदृ ँ हपृथिवीम्माहिँ ँसीः ॥१॥ ॐ भूर्भुवः स्वः पृथिवी-कूर्मानंतदेवताभ्यो नमः। इति गन्धादिभिः संपूज्यकृतांजलिः। ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः। स्वस्ति-नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥१॥ इति मंत्रं पठेत् ॥ अथाग्निस्थापनम्। तद्यथा हस्तमात्रपरिमिते चतु-रङ्गुलोच्छ्रिते तुषकेशशरकरादिरहिते चतुरस्त्रे वा वर्तुले स्थंडिले भूमिं कुशै परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनो पलिप्य स्रुवमूलेन प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उल्लेखन क्रमेणैवाऽनामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य ततः कांस्यपात्रस्थं वह्निं द्वितीयकांस्यपात्रेणापिहितमुपसमाधाय आनीतमग्निं स्थंडिलस्याग्नेय्यां निधाय ॐ हुँफट् इति मंत्रेण क्रव्यादांशं नैऋर्त्यां दिशि किंचित्परित्यज्य। ततः ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे देवांर२ऽआसादयादिह ॥१॥ इति मंत्रेणात्माभिमुखं स्थापयेत्। ततः आनीताग्नेयपात्रयोः साक्षतोदकं निषिच्य। अग्निमुखं कृत्वा ध्यायेत्। ॐ चत्वारिश्रृङ्गात्रयोऽअस्यपादा द्वेशीर्षे सप्त हस्तासोऽअस्य। त्रिधाबद्धो वृषभोरोरवीति महोदेवो मर्त्यां२ऽआविवेश ॥१॥ अग्ने वैश्वानर शांडिल्यगोत्र शांडिल्यासितदेवलेति त्रिप्रवरान्वित भूमिमातः वरुणपितः मेषध्वज प्राङ्मुख मम संमुखो भव इत्यग्निं प्रतिष्ठाप्य। ॐ अग्निपुरुषाय नमः। इतिमंत्रेण वायव्यकोणे बहिः अग्निं षोडशोपचारैः संपूज्य प्रार्थयेत्। अग्निं प्रज्वलितं वंदे जातवेदं हुताशनम्। हिरण्यवर्णमनलं समृद्धं विश्वतोमुखम् ॥१॥ इत्यग्निस्थापनम् ॥ अथ नवग्रहपूजनम्। तत्राद्यौ ग्रहमंडलमध्ये वर्तुले मण्डले रक्तपुष्पाक्षतैः प्राङ्मुखं सूर्यमावाहयेत्। ॐ आकृष्णेनरजसावर्तमानो निवेशयन्नमृतम्मर्त्यञ्च। हिरण्ययेन सविता रथेनादेवोयाति भुवनानि पश्यन्। ॐ भूर्भुवः स्वः कलिंगदेशो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्भवकाश्यपसगोत्र रक्तवर्ण भोसूर्य इहागच्छ इहतिष्ठ। ॐ सूर्याय नमः सूर्यमावाहयामि। इति सूर्यं स्थापयेत् ॥१॥ आग्नेयां दिशि चतुरस्रेऽर्धचन्द्राकारे वा मंडले शुक्लपुष्पाक्षतैः प्रत्यङ्मुखं सोममावाहयेत्। ॐ इमंदेवाऽअसपत्न ᳪ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेंद्रस्येन्द्रियाय। इमममुष्यपुत्र-ममुष्यै पुत्रमस्यैविशऽएषवोमीराजा सोमोऽस्माकं ब्राह्मणानाᳪ राजा। ॐ भूर्भुवः स्वर्यमुनातीरदेशोद्भव आत्रेयसगोत्र शुक्लवर्ण भो सोम इहागच्छ इहतिष्ठ। ॐ सोमाय नमः सोममावाहयामि ॥२॥ दक्षिणस्यां दिशि त्रिकोण मण्डले दक्षिणमुखं रक्तपुष्पाक्षतैर्भौममावाहयेत्। ॐ अग्निमूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम्। अपाᳪरेताᳪसिजिन्वति। ॐ भूर्भुवः स्वः अवंतिदेशोद्भव भारद्वाजसगोत्र रक्तवर्ण भो भौम इहागच्छ इह-तिष्ठ। ॐ भौमाय नमः भौममावाहयामि ॥३॥ ईशान्यां दिशि बाणाकारे वा धनुषाकारमण्डले उदङ्मुखं पीतैर्वाहरित पुष्पाक्षतैर्बुधमावाहयेत्। उद्बुध्यस्वाग्ने प्रतिजा गृहीत्वमिष्ठापूर्ते स ᳪ सृजेथामयञ्च। अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत। ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयसगोत्र पीतवर्ण वा हरित भो बुध इहागच्छ इहतिष्ठ। ॐ बुधाय नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बुधमावाहयामि ।।४।। उत्तरस्यां दिशि चतुरस्रे वा अष्टदल-मण्डले उदङ्मुखं बृहस्पतिं पीतपुष्पाक्षतैरावाहयेत् । ॐ बृह-स्पतयेऽअतियदर्योऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छ वसऽऋत प्रजात तदस्मासुद्रविणंधेहि चित्रम् । ॐ भूर्भुवः स्वः सिंधुदेशोद्भव आंगिरसगोत्र पीतवर्ण भो बृहस्पतये इहागच्छ इहतिष्ठ । ॐ बृहस्पतये नमः बृहस्पतिमावाहयामि ।।५।। पूर्वस्यां दिशि पंचकोणे वा चतुरस्रमण्डले प्राङ्मुखं शुक्रपुष्पाक्षतैः शुक्र-मावाहयेत् । ॐ अन्नात्परिस्रुतोरसं ब्रह्मणा व्यपिवत् क्षत्रंपयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपानᳬ शुक्रमंधसऽ इन्द्रस्येन्द्रियमिदं पयोमृतं मधु । ॐ भूर्भुवः स्वः भोजकटदेशो-द्भव भार्गवसगोत्र शुक्लवर्ण भो शुक्र इहागच्छ इहतिष्ठ । ॐ शुक्राय नमः शुक्रमावाहयामि ।।६।। पश्चिमायां दिशि धनुषा-कारे वा नराकारमण्डले प्रत्यङ्मुखं शनिं कृष्णपुष्पाक्षतैरावाहयेत् । ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तु पीतये । शँय्योरभिस्रवन्तुनः ।। ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्ण भो शनैश्चर इहागच्छ इहतिष्ठ । ॐ शनैश्चराय नमः शनैश्चरमावाह-यामि स्थापयामि ।।७।। नैऋर्त्यां दिशि शूर्पाकारे वा मकरा-कारमण्डले दक्षिणाभिमुखं राहुं कृष्णपुष्पाक्षतैरावाहयेत् । ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कयानश्चित्रऽआभुवदूतीसदावृधः सखा। कयासचिष्ठया वृता। ॐ भूर्भुवः स्वः राठिनदेशोद्भव पैठिनसगोत्र कृष्णवर्ण भो राहो इहागच्छ इहतिष्ठ। ॐ राहवे नमः राहुमावाहयामि ॥८॥ वायव्यां दिशि ध्वजाकारे वा खड्गाकारमण्डले दक्षिणाभिमुखं केतुं धूम्रपुष्पाक्षतैरावाहयेत्। ॐ केतुङ् कृण्वन्नकेतवे पेशोमर्य्याऽ अपेशसे। समुषद्भिरजायथाः। ॐ भूर्भुवः स्वः अंतर्वेदिदेशोद्भव जैमिनिसगोत्र धूम्रवर्ण भोः केतो इहागच्छ इहतिष्ठ। ॐ केतवे नमः केतुमावाहयामि ॥९॥ इति सूर्यादिनवग्रहस्थापनम् ॥ अथाधिदेवतास्थापनम् ॥ सूर्यस्य दक्षिणपार्श्वे ॥

त्र्यंबकं यजामहे सुगंधिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिव बंधनान्मृत्योर्मुक्षीयमामृतात्। ॐ भूर्भुवः स्वः ईश्वर इहागच्छ इहतिष्ठ। ईश्वराय नमः ईश्वरमावाहयामि ॥१॥ सोमदक्षिणपार्श्वे। ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्व्वलोकम्मऽइषाण। ॐ भूर्भुवः स्वः उमायै नमः उमावाहयामि ॥२॥ भौमदक्षिण पार्श्वे। ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्तसमुद्रा दुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहुऽउपस्तुत्यं महिजातन्तेऽअर्व्वन्। ॐ भूर्भुवः स्वः स्कन्दाय नमः स्कन्दमावाहयामि ॥३॥ बुधदक्षिण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पार्श्वे। ॐ विष्णो रराट मसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसिव्विष्णोर्ध्रुवोसि। वैष्णवमसि विष्णवेत्वा। ॐ भूर्भुवः स्वः विष्णवे नमः विष्णुमावाहयामि ॥४॥ गुरुदक्षिणपार्श्वे। ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेन आवः सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्चव्विवः। ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि ॥५॥ शुक्र दक्षिण पार्श्वे। ॐ सजोषाऽइन्द्र सगणो मरुद्भिः सोमम्पिब वृत्रहा शूर विद्वान्। जहि शत्रूँ रपमृधोनुदस्वाथाभयङ्कृणुहि व्विश्वतो नः। ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि ॥६॥ शनि दक्षिणपार्श्वे। ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे। ॐ भूर्भुवः स्वः यमाय नमः यममावाहयामि ॥७॥ राहोर्दक्षिणपार्श्वे। ॐ कार्षिरसि समुद्रस्यत्वा क्षित्याऽउन्नयामि। समापोऽअद्भिरग्मतसमोषधीभिरोषधीः। ॐ भूर्भुवः स्वः कालाय नमः कालमावाहयामि ॥८॥ केतुदक्षिणपार्श्वे। ॐ चित्रावसो स्वस्ति ते पारमसीय। ॐ भूर्भुवः स्वः चित्रगुप्ताय नमः चित्रगुप्तमावाहयामि ॥९॥ इत्यधिदेवताः। अथ प्रत्यधिदेवतास्थापनम्। सूर्यस्य वामपार्श्वे। ॐ अग्निंदूतं पुरोदधे हव्यवाहमुपब्रुवे। देवाँ२ऽआसादयादिह।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ भूर्भुवः स्वः अग्नये नमः अग्निमावाहयामि ॥१॥ सोम वामपार्श्वे। ॐ आपो हिष्ठा मयो भुवस्तानऽऊर्ज्जे दधातन। महेरणाय चक्षसे। ॐ भूर्भुवः स्वः अद्भ्यो नमः अप आवाहयामि ॥२॥ भौम वामपार्श्वे। ॐ स्योना पृथिवीनोभवान्नृक्षरा निवेशनी। यच्छानः शर्म्मसप्प्रथाः। ॐ भूर्भुवः स्वः पृथिव्यै नमः पृथिवीमावाहयामि ॥३॥ बुध वामपार्श्वे। ॐ इदं विष्णुर्विचक्रमे त्रेधा निधदेपदम्। समूढमस्य पा ँ सुरे स्वाहा। ॐ भूर्भुवः स्वः विष्णवे नमः विष्णुमावाहयामि ॥४॥ गुरु वामपार्श्वे। ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्रम्। ह्वयामि शक्रम्पुरुहूतमिन्द्र ँ स्वस्तिनो मघवाधात्विन्द्रः। ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि ॥५॥ शुक्रवामपार्श्वे। ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः पूषासि धर्म्मायदीष्व। ॐ भूर्भुवः स्वः इन्द्राण्यै नमः इन्द्राणीमावाहयामि ॥६॥ शनिवामपार्श्वे। ॐ प्रजापते नत्वदेता न्यन्यो विश्वारूपाणि परिता बभूव। यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयमसुष्यपितासावस्यपिता व्वय ँ स्याम पतयो रयीणा ँ स्वाहा। ॐ भूर्भुवः स्वः प्रजापतये नमः प्रजापतिमावाहयामि ॥७॥ राहुवामपार्श्वे। ॐ नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः। ॐ भूर्भुवः स्वः सर्प्पेभ्यो नमः सर्पानावाहयामि ॥८॥ केतुवामपार्श्वे। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः। सबुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्च योनिमसतश्च व्विवः। ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि ॥६॥ इति प्रत्यधिदेवताः।

अथ पंचलोकपाल स्थापनम्। राहोरुत्तरतः। ॐ गणानान्त्वा गणपति ँ हवामहे प्रियाणान्त्वा प्रियपति ँ हवामहे निधीनान्त्वा निधिपति ँ हवामहे व्वसो मम। आहमजानि गर्भधमात्वमजासि गर्भधम्। ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि ॥१॥ शनेरुत्तरतः। ॐ अम्बेऽअम्बिकेऽम्बालिके न मानयति कश्चन। ससस्त्यश्वकः सुभद्रिकाँ कांपीलवासिनीम्। ॐ भूर्भुवः स्वः दुर्गायै नमः दुर्गामावाहयामि ॥२॥ रवेरुत्तरतः। ॐ आनोनियुद्भिः शतिनीभिरध्वर ँ सहस्रिणीभिरुपयाहि यज्ञम्। वायोऽअस्मिन्त्सवने मादयस्व यूयम्पातः स्वस्तिभिः सदानः। ॐ भूर्भुवः स्वः वायवेनमः वायुमावाहयामि ॥३॥ राहोर्दक्षिणे। ॐ घृतं घृतपावानः पिबत व्वसां व्वसापावानः पिवतान्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिशऽआदिशो व्विदिशऽउद्दिशो दिग्भ्यः स्वाहा। ॐ भूर्भुवः स्वः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकाशाय नमः आकाशमावाहयामि ॥४॥ केतोर्दक्षिणे । ॐ याचाङ्कशामधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षताम् । ॐ भूर्भुवः स्वः अश्विभ्यां नमः अश्विनौ आवाहयामि ॥५॥ मध्ये सूर्यस्य नैर्ऋत्यभागे। ॐ वास्तोष्पते प्रतिजानी ह्यस्मान्स्वावेशोऽअनमीवोभवानः । यत्वेमहे प्रतितन्नो जुषष्व शन्नो भव द्विपदे शञ्चतुष्पदे । ॐ भूर्भुवः स्वः वास्तोष्पतये नमः वास्तोष्पतिमावाहयामि ॥६॥ मध्ये सूर्यस्योत्तरे । ॐ नहिस्पशमविदन्नन्न्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः । एमेनमवृधं न मृताऽअमर्त्यम्वैश्वानरं क्षैत्र जित्याय देवाः । ॐ भूर्भुवः स्वः क्षेत्राधिपतये नमः क्षेत्राधिपतिमावाहयामि ॥७॥ अथ प्रागादितः पीठसमंताद्दिक्पालानावाहयेत् । पूर्वे । ॐ त्रातारमिन्द्र मवितारमिन्द्र ᳪ हवेहवे सुहव ᳪ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ᳪ स्वस्तिनो मघवाधात्विन्द्रः । ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि ॥१॥ आग्नेय्याम् । ॐ त्वन्नोऽअग्ने तव देव पायुभिर्मघोनो रक्षतन्न्वश्चवन्द्य । त्राता तोकस्य तनये गवामस्य निमेष ᳪ रक्षमाणस्तव व्रते । ॐ भूर्भुवः स्वः अग्नये नमः अग्निमावाहयामि ॥२॥ दक्षिणे । ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे । ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूर्भुवः स्वः यमाय नमः यममावाहयामि ॥३॥ नैर्ऋत्याम् । ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहितस्करस्य । अन्यमस्मदिच्छसातइत्यानमो देविनिर्ऋते तुभ्यमस्तु । ॐ भूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिमावाहयामि ॥४॥ ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुश ᳪ समानऽआयुः प्रमोषीः । ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाहयामि ॥५॥ वायव्याम् । ॐ आनोनियुद्भिः शतिनीभिरध्वर ᳪ सहस्रिणीभिरुपयाहि यज्ञम् । वायोऽअस्मिन्त्सवनेमादयस्व यूयंपात स्वस्तिभिः सदानः । ॐ भूर्भुवः स्वः वायवे नमः वायुमावाहयामि ॥६॥ उत्तरे ॥ ॐ वयᳪ सोमव्रते तव मनस्तनूषुबिभ्रतः । प्रजावन्तः सचेमहि । ॐ भूर्भुवः स्वः कुबेराय नमः कुबेरमावाहयामि ॥७॥ ईशान्याम् । ॐ तमीशानं जगतस्तस्थुषस्पतिन्धियं जिन्वमवसे हूमहेव्वयम् । पूषानो यथा व्वेदसामसद्वृधे रक्षितापायुरदब्धः स्वस्तये । ॐ भूर्भुवः स्वः ईशानाय नमः ईशामावाहयामि ॥८॥ पूर्वेशानयोर्मध्ये ऊर्ध्वायाम् । ॐ अस्मेरुद्रामेहनापर्व्वतासो वृत्रहत्येभरहूतौ सजोषाः । यः शᳪसतेस्तुवतेधायि पज्रऽइन्द्रजेष्ठाऽअस्माँ२ऽअवन्तु देवाः । ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाह-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यामि ॥९॥ निर्ऋतिपश्चिमयोर्मध्ये अधस्थायाम् । ॐ स्योना-पृथिविनोभवानृक्षरानिवेशनी । यच्छानः शर्मसप्रथाः । ॐ भूर्भुवः स्वः अनंताय नमः अनंतमावाहयामि ॥१०॥ एवं क्रतुसंरक्षकदेवतास्थापनं कृत्वा । ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टं यज्ञꣳ समिमं दधातु । विश्वे-देवास ऽ इह मादयन्तामो प्रतिष्ठ ॥१॥ ॐ आदित्यादिग्रह-मंडलदेवताभ्यो नमः सुप्रतिष्ठिता वरदा भवत । इति प्रति-ष्ठाप्य । देशकालौ स्मृत्वा । इह सकलशांतिपूर्वकं सकलदुरितो-पशमनद्वारा श्रीपरमेश्वरप्रीत्यर्थं सनवग्रहमखामुकहवनकर्मणि सूर्यादिनवग्रहाणामधिदेवतानां प्रत्यधिदेवतानां पंचलोकपालानां दशदिक्पालानां च पूजनं करिष्ये । इति संकल्पयेत् । ततः ॐ ग्रहा ऽ ऊर्ज्जाहुतयोव्व्यन्तोव्विप्रायमतिं तेषांव्विशिप्प्रियाणाम्वो-हमिषमूर्ज्जꣳ समग्रभमुपयाम गृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिद्राय त्वा जुष्टतमम् ॥१॥ ॐ भूर्भुवः स्वः सूर्यादि-ग्रहेभ्यो नमः । ॐ रुद्राद्यधिदेवताभ्यो नमः । ॐ अग्न्यादि प्रत्यधिदेवताभ्यो नमः । ॐ विनायकादिपंचलोकपालेभ्यो नमः । ॐ इन्द्रादिदशदिक्पालेभ्यो नमः । इति नाममंत्रैः प्रत्येकं तत्तद्वर्णयुक्तगंधपुष्पधूपदीप (वक्ष्यमाण) नैवेद्यतांबूल-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणादिभिः संपूजयेत्। नैवेद्यं तु वेदीसमीपे भूमौ दद्यात् ॥ तद्यथा ॥ सूर्याय गुडौदनम्। सोमाय घृतपायसम्। भौमाय मल्लरान्नम्। बुधाय क्षीरोदनम्। गुरवे दध्योदनम्। शुक्राय घृतोदनम्। शनैश्चराय तिलपिष्टम्। राहवे तिलमाषान्नम्। केतवे चित्रौदनम्। अन्येभ्यः पायसं च सर्वेभ्यो वा पायसं समर्प्य क्षमापयेत् ॥ ब्रह्मामुरारिस्त्रिपुरान्तकारी भानुः शशीभूमि-सुतोबुधश्च। गुरुश्च शुक्रः शनिराहुकेतवः सर्वेग्रहाः शान्तिकरा भवन्तु ॥१॥ अनया पूजया आदित्यादिग्रहमण्डलदेवताः प्रियं-तामिति पठेत्। ततस्तदीशान्यां ग्रहसंबंधिरुद्रकलशम्। ॐ मही द्यौरित्यादिमंत्रैः पूर्ववत्संस्थाप्य तत्र तत्त्वायामीतिवरुणमावाह्य संपूज्य कलशस्य मुखेविष्णुरित्यभिमंत्र्य। देवदानव संवादे० इत्यादिप्रार्थयेत्। ततस्तदुपरि। ॐ असंख्याता सहस्राणि ये रुद्राऽअधिभूम्याम्। तेषाᳫं सहस्र योजने वधन्वानि तन्मति। ॐ भूर्भुवः स्वः रुद्रा इहागच्छेहतिष्ठत। ॐ रुद्रेभ्यो नमः। इति षोडशोपचारैः पूजयेत्। इति नवग्रहमण्डलपूजनम्। अथ योगिनीस्थापनम्। देशकालौ संकीर्त्य० अस्मिनमुकहवनकर्मणि दुष्टबाधाप्रशमनार्थं दिव्यादिचतुः षष्टियोगिनीनां स्थापनं पूजनं च करिष्ये। ततः चतुः षष्टियोगिनीः प्रागन्ता, उदगन्ता वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आवाहयेत् ॥ तद्यथा ॥ ॐ भूर्भुवः स्वः दिव्ययोगिन्यै नमः दिव्ययोगिनीमावाहयामि ॥१॥ ॐ भूर्भुवः स्वः महायोगिन्यै नमः महायोगिनीमावाहयामि ॥२॥ ॐ भूर्भुवः स्वः सिद्धि-योगिण्यै नमः सिद्धियोगिनीमावाहयामि ॥३॥ ॐ भूर्भुवः स्वः माहेश्वर्य्यै नमः माहेश्वरीमावाहयामि ॥४॥ ॐ भूर्भुवः स्वः प्रेताक्ष्यै नमः प्रेताक्षीमावाहयामि ॥५॥ ॐ भूर्भुवः स्वः डाकिन्यै नमः डाकिनीमावाहयामि ॥६॥ ॐ भूर्भुवः स्वः काल्यै नमः कालीमावाहयामि ॥७॥ ॐ भूर्भुवः स्वः काल-रात्र्यै नमः कालरात्रीमावाहयामि ॥८॥ ॐ भूर्भुवः स्वः निशा-कर्यै नमः निशाकरीमावाहयामि ॥९॥ ॐ भूर्भुवः स्वः हुंकार्य्यै नमः हुंकारीमावाहयामि ॥१०॥ ॐ भूर्भुवः स्वः सिद्धिवैता-लिकायै नमः सिद्धिवैतालिकामावाहयामि ॥११॥ ॐ भूर्भुवः स्वः ह्रींकार्य्यै नमः ह्रींकारीमावाहयामि॥१२॥ ॐ भूर्भुवः स्वः भूतडामरायै नमः भूतड़ामरामावाहयामि ॥१३॥ ॐ भूर्भुवः स्वः ऊर्ध्वकेश्यै नमः ऊर्ध्वकेशीमावाहयामि ॥१४॥ ॐ भूर्भुवः स्वः विरूपाक्ष्यै नमः विरूपाक्षीमावाहयामि ॥१५॥ ॐ भूर्भुवः स्वः शुष्काङ्ग्यै नमः शुष्काङ्गीमावाहयामि ॥१६॥ ॐ भूर्भुवः स्वः नरभोजन्यै नमः नरभोजनीमावाहयामि ॥१७॥ ॐ भूर्भुवः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वः फेत्कार्यैं नमः फेत्कारीमावाहयामि ॥१८॥ ॐ भूर्भुवः स्वः वीरभद्रायै नमः वीरभद्रामावाहयामि ॥१९॥ ॐ भूर्भुवः स्वः धूम्राक्ष्यै नमः धूम्राक्षीमावाहयामि॥२०॥ ॐभूर्भुवः स्वः कलहप्रियायै नमः कलहप्रियामावाहयामि ॥२१॥ ॐ भूर्भुवः स्वः राक्षस्यै नमः राक्षसीमावाहयामि ॥२२॥ ॐ भूर्भुवः स्वः घोररक्ताक्ष्यै नमः घोररक्ताक्षीमावाहयामि ॥२३॥ ॐ भूर्भुवः स्वः विशालाक्ष्यै नमः विशालाक्षीमावाहयामि ॥२४॥ ॐ भूर्भुवः स्वः कौमार्यैं नमः कौमारीमावाहयामि ॥२५॥ ॐ भूर्भुवः स्वः चण्ड्यै नमः चण्डीमावाहयामि ॥२६॥ ॐ भूर्भुवः स्वः वाराह्यै नमः वाराहीमावाहयामि ॥२७॥ ॐ भूर्भुवः स्वः मुण्डधारिण्यै नमः मुण्डधारिणीमावाहयामि ॥२८॥ ॐ भूर्भुवः स्वः भैरव्यै नमः भैरवीमावाहयामि ॥२९॥ ॐ भूर्भुवः स्वः वीरायै नमः वीरामावाहयामि ॥३०॥ ॐ भूर्भुवः स्वः भयङ्कर्यैं नमः भयङ्करीमावाहयामि ॥३१॥ ॐ भूर्भुवः स्वः वज्रधारिण्यै नमः वज्रधारिणीमावाहयामि ॥३२॥ ॐ भूर्भुवः स्वः क्रोधायै नमः क्रोधामावाहयामि ॥३३॥ ॐ भूर्भुवः स्वः दुर्मुख्यै नमः दुर्मुखीमावाहयामि ॥३४॥ ॐ भूर्भुवः स्वः प्रेतवाहिन्यै नमः प्रेतवाहिनीमावाहयामि ॥३५॥ ॐ भूर्भुवः स्वः कर्कायै नमः कर्का-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मावाहयामि ॥३६॥ ॐ भूर्भुवः स्वः दीर्घलम्बोष्ठ्यै नमः दीर्घलम्बोष्ठीमावाहयामि ॥३७॥ ॐ भूर्भुवः स्वः मालिन्यै नमः मालिनीमावाहयामि ॥३८॥ ॐ भूर्भुवः स्वः मंत्रयोगिन्यै नमः मंत्रयोगिनीमावाहयामि ॥३६॥ ॐ भूर्भुवः स्वः कालाग्निमोहिन्यै नमः कालाग्निमोहिनीमावाहयामि ॥४०॥ ॐ भूर्भुवः स्वः मोहिन्यै नमः मोहिनीमावाहयामि ॥४१॥ ॐ भूर्भुवः स्वः चक्रायै नमः चक्रामावाहयामि ॥४२॥ ॐ भूर्भुवः स्वः कुण्डलिन्यै नमः कुण्डलिनीमावाहयामि ॥४३॥ ॐ भूर्भुवः स्वः बालुकायै नमः बालुकामावाहयामि ॥४४॥ ॐ भूर्भुवः स्वः कौबेर्यै नमः कौबेरीमावाहयामि ॥४५॥ ॐ भूर्भुवः स्वः यमदूत्यै नमः यमदूतीमावाहयामि ॥४६॥ ॐ भूर्भुवः स्वः करालिन्यै नमः करालिनीमावाहयामि ॥४७॥ ॐ भूर्भुवः स्वः कौशिक्यै नमः कौशिकीमावाहयामि ॥४८॥ ॐ भूर्भुवः स्वः यक्षिण्यै नमः यक्षिणीमावाहयामि ॥४६॥ ॐ भूर्भुवः स्वः भक्षिण्यै नमः भक्षिणीमावाहयामि ॥५०॥ ॐ भूर्भुवः स्वः कौमार्य्यै नमः कौमारीमावाहयामि ॥५१॥ ॐ भूर्भुवः स्वः मंत्रवाहिन्यै नमः मंत्रवाहिनीमावाहयामि ॥५२॥ ॐ भूर्भुवः स्वः विशालायै नमः विशालामावाहयामि ॥५३॥ ॐ भूर्भुवः स्वः कार्मुक्यै नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कार्मुकीमावाहयामि॥५४॥ ॐ भूर्भुवः स्वः व्याघ्र्यै नमः व्याघ्रीमावाहयामि ॥५५॥ ॐ भूर्भुवः स्वः महाराक्षस्यै नमः महाराक्षसीमावाहयामि ॥५६॥ ॐ भूर्भुवः स्वः प्रेतभक्षिण्यै नमः प्रेतभक्षिणीमावाहयामि ॥५७॥ ॐ भूर्भुवः स्वः धूर्जट्यै नमः धूर्जटीमावाहयामि॥५८॥ ॐ भूर्भुवः स्वः विकटायै नमः विकटामावाहयामि ॥५९॥ ॐ भूर्भुवः स्वः घोररूपायै नमः घोररूपामावाहयामि ॥६०॥ ॐ भूर्भुवः स्वः कपालिकायै नमः कपालिकामावाहयामि ॥६१॥ ॐ भूर्भुवः स्वः निकलायै नमः निकलामावाहयामि ॥६२॥ ॐ भूर्भुवः स्वः अमलायै नमः अमलामावाहयामि ॥६३॥ ॐ भूर्भुवः स्वः सिद्धिप्रदायै नमः सिद्धिप्रदामावाहयामि ॥६४॥ एवं स्थापनं कृत्वा ॥ ॐ मनोजूतिर्जुषता माज्यस्य बृहस्पति र्यज्ञ ँ समिमन्तनोत्वरिष्टं यज्ञ ँ समिमन्दधातु । व्विश्वेदेवासऽइह मादयन्ता मो ँ प्प्रतिष्ठ ॥१॥ साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः सवाहना दिव्यादिचतुः षष्टियोगिन्यः सुप्रतिष्ठिताः वरदाः भवन्तु। इति प्रतिष्ठाप्य ततः दिव्यादिचतुः षष्टियोगिनीभ्यो नमः इति षोडशोपचारैः पूजयेत् प्रार्थना । दिव्यादि सर्वायोगिन्य दुर्गारूपाश्च ताः स्मृताः । पूजया वलिदानेन सन्तुष्टा स्सन्तु मे सदा ॥१॥ अनया पूजया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुः षष्टियोगिन्यः प्रीयन्ताम् ॥ इति योगिनी पूजा ॥ अथ अजरादिक्षेत्रपाल पूजनम् । देशकालौ संकीर्त्य० अमुकहवनकर्मणि अजरादि क्षेत्रपालानामाहनं पूजनं च करिष्ये । ततः अजरादि क्षेत्रपालाः प्रागन्ता उदगन्ता वा आवाहयेत् । तत्रावाहनमंत्राः । ॐ भूर्भुवः स्वः अजराय नमः अजरमावाहयामि ॥१॥ ॐ भूर्भुवः स्वः व्यापकाख्याय नमः व्यापकाख्यमावाहयामि ॥२॥ ॐ भूर्भुवः स्वः इन्द्रचौराय नमः इन्द्रचौरमावाहयामि ॥३॥ ॐ भूर्भुवः स्वः इन्द्रमूर्तये नमः इन्द्रमूर्तिमावाहयामि ॥४॥ ॐ भूर्भुवः स्वः उक्षाभिधाय नमः उक्षाभिधमावाहयामि ॥५॥ ॐ भूर्भुवः स्वः कूष्माण्डाय नमः कूष्माण्डमावाहयामि ॥६॥ ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाहयामि ॥७॥ ॐ भूर्भुवः स्वः बाहुकाख्याय नमः वाहुकाख्यमावाहयामि ॥८॥ ॐ भूर्भुवः स्वः विमुक्ताय नमः विमुक्तमावाहयामि ॥९॥ ॐ भूर्भुवः स्वः लिप्तकाय नमः लिप्तकमावाहयामि ॥१०॥ ॐ भूर्भुवः स्वः लीलालोकाय नमः लीलालोकमावाहयामि ॥११॥ ॐ भूर्भुवः स्वः एकदंष्ट्राय नमः एकदंष्ट्रमावाहयामि ॥१२॥ ॐ भूर्भुवः स्वः ऐरावताख्याय नमः ऐरावताख्यमावाहयामि ॥१३॥ ॐ भूर्भुवः स्वः ओषधीघ्नाय नमः ओषधीघ्नमावाहयामि ॥१४॥ ॐ भूर्भुवः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वः बन्धनाख्याय नमः बन्धनाख्यमावाहयामि ॥१५॥ ॐ भूर्भुवः स्वः दिव्यकायाय नमः दिव्यकमावाहयामि ॥ १६ ॥ ॐ भूर्भुवः स्वः कंबलाख्याय नमः कंबलाख्यमावाहयामि ॥१७॥ ॐ भूर्भुवः स्वः क्षोभणाख्याय नमः क्षोभणाख्यमावाहयामि ॥१८॥ ॐ भूर्भुवः स्वः गवे नमः गामावाहयामि ॥१६॥ ॐ भूर्भुवः स्वः घंटाभिधाय नमः घंटाभिधमावाहयामि ॥२०॥ ॐ भूर्भुवः स्वः व्यालाय नमः व्यालमावाहयामि ॥२१॥ ॐ भूर्भुवः स्वः अणुस्वरूपाय नमः अणुस्वरूपमावाहयामि ॥२२॥ ॐ भूर्भुवः स्वः चन्द्रवारुणाय नमः चन्द्रवारुणमावाहयामि ।२३। ॐ भूर्भुवः स्वः फटाटोपाय नमः फटाटोपमावाहयामि ॥२४॥ ॐ भूर्भुवः स्वः जटालाय नमः जटालमावाहयामि ॥२५॥ ॐ भूर्भुवः स्वः क्रतवे नमः क्रतुमावाहयामि ॥२६॥ ॐ भूर्भुवः स्वः घण्टेश्वराय नमः घण्टेश्वरमावाहयामि ॥२७॥ ॐ भूर्भुवः स्वः विटंकाय नमः विटंकमावाहयामि ॥२८॥ ॐ भूर्भुवः स्वः मणिमतये नमः मणिमतिमावाहयामि ॥२६॥ ॐ भूर्भुवः स्वः गणबन्धाय नमः गणबन्धमावाहयामि ॥३०॥ ॐ भूर्भुवः स्वः डामराय नमः डामरमावाहयामि ॥३१॥ ॐ भूर्भुवः स्वः ढुण्ढिकर्णाय नमः ढुण्ढिकर्णमावाहयामि ॥३२॥ ॐ भूर्भुवः स्वः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुः षष्टियोगिन्यः प्रीयन्ताम् ॥ इति योगिनी पूजा ॥ अथ अजरादिक्षेत्रपाल पूजनम् । देशकालौ संकीर्त्य० अमुकहवनकर्मणि अजरादि क्षेत्रपालानामाह्नं पूजनं च करिष्ये । ततः अजरादि क्षेत्रपालाः प्रागन्ता उदगन्ता वा आवाहयेत् । तत्रावाहनमंत्राः । ॐ भूर्भुवः स्वः अजराय नमः अजरमावाहयामि ॥१॥ ॐ भूर्भुवः स्वः व्यापकाख्याय नमः व्यापकाख्यमावाहयामि ॥२॥ ॐ भूर्भुवः स्वः इन्द्रचौराय नमः इन्द्रचौरमावाहयामि ॥३॥ ॐ भूर्भुवः स्वः इन्द्रमूर्तये नमः इन्द्रमूर्तिमावाहयामि ॥४॥ ॐ भूर्भुवः स्वः उक्षाभिधाय नमः उक्षाभिधमावाहयामि ॥५॥ ॐ भूर्भुवः स्वः कूष्माण्डाय नमः कूष्माण्डमावाहयामि ॥६॥ ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाहयामि ॥७॥ ॐ भूर्भुवः स्वः बाहुकाख्याय नमः वाहुकाख्यमावाहयामि ॥८॥ ॐ भूर्भुवः स्वः विमुक्ताय नमः विमुक्तमावाहयामि ॥९॥ ॐ भूर्भुवः स्वः लिप्तकाय नमः लिप्तकमावाहयामि ॥१०॥ ॐ भूर्भुवः स्वः लीलालोकाय नमः लीलालोकमावाहयामि ॥११॥ ॐ भूर्भुवः स्वः एकदंष्ट्राय नमः एकदंष्ट्रमावाहयामि ॥१२॥ ॐ भूर्भुवः स्वः ऐरावताख्याय नमः ऐरावताख्यमावाहयामि ॥१३॥ ॐ भूर्भुवः स्वः ओषधीघ्नाय नमः ओषधीघ्नमावाहयामि ॥१४॥ ॐ भूर्भुवः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वः बन्धनाख्याय नमः बन्धनाख्यमावाहयामि ॥१५॥ ॐ भूर्भुवः स्वः दिव्यकायाय नमः दिव्यकमावाहयामि ॥ १६ ॥ ॐ भूर्भुवः स्वः कंबलाख्याय नमः कंबलाख्यमावाहयामि ॥१७॥ ॐ भूर्भुवः स्वः क्षोभणाख्याय नमः क्षोभणाख्यमावाहयामि ॥१८॥ ॐ भूर्भुवः स्वः गवे नमः गामावाहयामि ॥१९॥ ॐ भूर्भुवः स्वः घंटाभिधाय नमः घंटाभिधमावाहयामि ॥२०॥ ॐ भूर्भुवः स्वः व्यालाय नमः व्यालमावाहयामि ॥२१॥ ॐ भूर्भुवः स्वः अणुस्वरूपाय नमः अणुस्वरूपमावाहयामि ॥२२॥ ॐ भूर्भुवः स्वः चन्द्रवारुणाय नमः चन्द्रवारुणमावाहयामि ।२३। ॐ भूर्भुवः स्वः फटाटोपाय नमः फटाटोपमावाहयामि ॥२४॥ ॐ भूर्भुवः स्वः जटालाय नमः जटालमावाहयामि ॥२५॥ ॐ भूर्भुवः स्वः क्रतवे नमः क्रतुमावाहयामि ॥२६॥ ॐ भूर्भुवः स्वः घण्टेश्वराय नमः घण्टेश्वरमावाहयामि ॥२७॥ ॐ भूर्भुवः स्वः विटंकाय नमः विटंकमावाहयामि ॥२८॥ ॐ भूर्भुवः स्वः मणिमतये नमः मणिमतिमावाहयामि ॥२९॥ ॐ भूर्भुवः स्वः गणबन्धाय नमः गणबन्धमावाहयामि ॥३०॥ ॐ भूर्भुवः स्वः डामराय नमः डामरमावाहयामि ॥३१॥ ॐ भूर्भुवः स्वः ढुण्ढिकर्णाय नमः ढुण्ढिकर्णमावाहयामि ॥३२॥ ॐ भूर्भुवः स्वः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थविराय नमः स्थविरमावाहयामि ॥३३॥ ॐ भूर्भुवः स्वः दन्तुराय नमः दन्तुरमावाहयामि ॥ ३४ ॥ ॐ भूर्भुवः स्वः धनदाय नमः धनदमावाहयामि ॥ ३५ ॥ ॐ भूर्भुवः नागकर्णाय नमः नागकर्णमावाहयामि ॥३६॥ ॐ भूर्भुवः स्वः मारीगणाय नमः मारीगणमावाहयामि ॥३७॥ ॐ भूर्भुवः स्वः फेत्काराय नमः फेत्कारमावाहयामि ॥३८॥ ॐ भूर्भुवः स्वः चीकराय नमः चीकरमावाहयामि ॥३९॥ ॐ भूर्भुवः स्वः सिंहाकृतये नमः सिंहाकृतिमावाहयामि ॥४०॥ ॐ भूर्भुवः स्वः मृगाय नमः मृगमावाहयामि ॥४१॥ ॐ भूर्भुवः स्वः यक्ष्मप्रियाय नमः यक्ष्मप्रियमावाहयामि ॥४२॥ ॐ भूर्भुवः स्वः मेघवाहनाय नमः मेघवाहनमावाहयामि ॥४३॥ ॐ भूर्भुवः स्वः तीक्ष्णोष्ट्राय नमः तीक्ष्णोष्ट्रमावाहयामि ॥४४॥ ॐ भूर्भुवः स्वः अनलाय नमः अनलमावाहयामि ॥४५॥ ॐ भूर्भुवः स्वः शुक्रतुण्डाय नमः शुक्रतुण्डमावाहयामि ॥४६॥ ॐ भूर्भुवः स्वः अन्तरिक्षाय नमः अन्तरिक्षमावाहयामि ॥४७॥ ॐ भूर्भुवः स्वः वर्वरकाय नमः वर्वरकमावाहयामि ॥४८॥ ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः क्षेत्रपालमावाहयामि ॥४९॥ ॐ भूर्भुवः स्वः कपालभैरवाय नमः कपालभैरवमावाहयामि ॥५०॥ ॐ भूर्भुवः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वः वटुकभैरवाय नमः वटुकभैरवमावाहयामि ॥५१॥ ॐ भूर्भुवः स्वः पावनाय नमः पावनमावाहयामि ॥५२॥ इति संस्थाप्य ॥

ॐ मनोजूतिर्जुषतामाज्यस्यवृहस्पतिर्यज्ञमिमं तनो त्वरिष्टं यज्ञ ँ समिमन्दधातु । विश्वेदेवासऽइहमादयन्तामोंऽ प्रतिष्ठ । ॐ भूर्भुवः स्वः अजरादिपावनान्ताः क्षेत्रपालाः सुप्रतिष्ठिताः वरदाः भवन्तुः । ॐ अजरादिपावनान्तक्षेत्रपालेभ्यो नमः इति नाममंत्रेण षोडशोपचारैः पूजयेत् ॥ अथ प्रार्थना ॥ आजचन्द्र-जटाधरं त्रिनयनं नीलाञ्जनाद्रिप्रभं दोर्दण्डात्तगदा कपालमरुण-स्रग्गन्धवस्त्रोज्ज्वलम् । घण्टामेखलघर्घरध्वानिलसज्झङ्कारभीमं विभुं वन्दे संहित सर्पकुण्डलधरं श्रीक्षेत्रपालं सदा ॥१॥ इति प्रार्थ्य ॥ अनया पूजया अजरादिपावनान्तक्षेत्रपालाः प्रीयन्ताम् । इति क्षेत्रपालपूजनम् । अथ एकोनपंचाशत्मरुद्गणानां पूजनजम् । देशकालौ संकीर्त्य० अमुकहवनकर्मणि एकोनपंचाशद्मरुद्गणानां आवाहनं पूजनं च करिष्ये। इति संकल्प्य। पुष्पाक्षतान् गृहित्वा प्रागन्ता, उदगन्ता वा आवाहयेत् ॥ तद्यथा ॥ ॐ भूर्भुवः स्वः एकज्योतये नमः एकज्योतिमावाहयामि ॥१॥ ॐ भूर्भुवः स्वः द्विज्योंतये नमः द्विज्योंतिमावाहयामि ॥२॥ ॐ भूर्भुवः स्वः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिज्र्योतये नमः त्रिज्र्योतिमावाहयामि ॥३॥ ॐ भूर्भुवः स्वः चतुर्ज्योतये नमः चतुर्ज्योतिमावाहयामि ॥४॥ ॐ भूर्भुवः स्वः एकशक्राय नमः एकशक्रमावाहमामि ॥५॥ ॐ भूर्भुवः स्वः द्विशक्राय नमः द्विशक्रमावाहयामि ॥६॥ ॐ भूर्भुवः स्वः त्रिशक्राय नमः त्रिशक्रमावाहयामि ॥७॥ ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि ॥८॥ ॐ भूर्भुवः स्वः गव्याय नमः गव्यमावाहयामि ॥९॥ ॐ भूर्भुवः स्वः दृश्याय नमः दृश्यमावाहयामि ॥१०॥ ॐ भूर्भुवः स्वः प्रतिशिरसे नमः प्रतिशिरसमावाहयामि ॥११॥ ॐ भूर्भुवः स्वः मिताय नमः मितमावाहयामि ॥१२॥ ॐ भूर्भुवः स्वः सम्मिताय नमः सम्मितमावाहयामि ॥१३॥ ॐ भूर्भुवः स्वः अमिताय नमः अमितमावाहयामि ॥१४॥ ॐ भूर्भुवः स्वः ऋतजिते नमः ऋतजितमावाहयामि ॥१५॥ ॐ भूर्भुवः स्वः सत्यजिते नमः सत्यजितमावाहयामि ॥१६॥ ॐ भूर्भुवः स्वः सुषेणाय नमः सुषेणमावाहयामि ॥१७॥ ॐ भूर्भुवः स्वः सेनजिते नमः सेनजितमावाहयामि ॥१८॥ ॐ भूर्भुवः स्वः अतिमित्राय नमः अतिमित्रमावाहयामि ॥१९॥ ॐ भूर्भुवः स्वः नामित्राय नमः नामित्रमावाहयामि ॥२०॥ ॐ भूर्भुवः स्वः पुरुमित्राय नमः पुरुमित्र-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मावाहयामि ॥२१॥ ॐ भूर्भुवः स्वः ऋतये नमः ऋतमावाहयामि ।२२। ॐ भूर्भुवः स्वः ऋतवते नमः ऋतवन्तमावाहयामि ।२३। ॐ भूर्भुवः स्वः धात्रे नमः धातारमावाहयामि ॥२४॥ ॐ भूर्भुवः स्वः विधात्रे नमः विधातारमावाहयामि ॥२५॥ ॐ भूर्भुवः स्वः धरणाय नमः धरणमावाहयामि ॥२६॥ ॐ भूर्भुवः स्वः ध्रुवाय नमः ध्रुवमावाहयामि ॥२७॥ ॐ भूर्भुवः स्वः विधारणाय नमः विधारणमावाहयामि ॥२८॥ ॐ भूर्भुवः स्वः इद्दक्षाय नमः इद्दक्षमावाहयामि ॥२९॥ ॐ भूर्भुवः स्वः सद्दक्षाय नमः सद्दक्षमावाहयामि ॥३०॥ ॐ भूर्भुवः स्वः एतादृशे नमः एतादृशमावाहयामि ॥३१॥ ॐ भूर्भुवः स्वः अमृताय नमः अमृतमावाहयामि ॥३२॥ ॐ भूर्भुवः स्वः क्रीतनाय नमः क्रीतनमावाहयामि ॥३३॥ ॐ भूर्भुवः स्वः प्रसद्दक्षाय नमः प्रसद्दक्षमावाहयामि ॥३४॥ ॐ भूर्भुवः स्वः सरभाय नमः सरभमावाहयामि ॥३५॥ ॐ भूर्भुवः स्वः धर्त्रे नमः धर्तारमावाहयामि ॥३६॥ ॐ भूर्भुवः स्वः दुर्गाय नमः दुर्गमावाहयामि ॥३७॥ ॐ भूर्भुवः स्वः ध्वनये नमः ध्वनिमावाहयामि ॥३८॥ ॐ भूर्भुवः स्वः भीमाय नमः भीममावाहयामि ॥३९॥ ॐ भूर्भुवः स्वः अभियुक्ताय नमः अभियुक्तमावाहयामि ॥४०॥ ॐ भूर्भुवः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वः कृपाय नमः कृपमावाहयामि ॥४१॥ ॐ भूर्भुवः स्वः सहाय नमः सहमावाहयामि ॥४२॥ ॐ भूर्भुवः स्वः द्युतये नमः द्युतिमावाहयामि ॥४३॥ ॐ भूर्भुवः स्वः वपुषे नमः वपुषमावाहयामि ॥४४॥ ॐ भूर्भुवः स्वः अनादृश्याय नमः अनादृश्यमावाहयामि ॥४५॥ ॐ भूर्भुवः स्वः वासाय नमः वासमावाहयामि ॥४६॥ ॐ भूर्भुवः स्वः कामाय नमः काममावाहयामि ॥४७॥ ॐ भूर्भुवः स्वः जयाय नमः जयमावाहयामि ॥४८॥ ॐ भूर्भुवः स्वः विराजे नमः विराजमावाहयामि ॥४९॥ ॐ मनोजूतिर्जुषतामाज्यस्यबृहस्पति र्यज्ञमिमं तनो त्वरिष्टं यज्ञ ᳪ समिमंदधातु। विश्वेदेवासऽइहमादयन्तामों२ प्रतिष्ठ ॥१॥ ॐ भूर्भुवः स्वः एकोनपंचाशत् मरुद्गणाः सुप्रतिष्ठिताः वरदाः भवन्तु। ॐ एकोनपंचाशन्मरुद्गणेभ्यो नमः इति नाममंत्रेण षोडशोपचारैः पूजयेत्। अथ प्रार्थना। एते मरुद्गणाः सर्वे सप्तस्कन्धेषु संस्थिता। प्रार्थयामि च तान् सर्वान् यज्ञसंपूर्तिहेतवे ॥१॥ इति प्राथ्र्य। अनया पूजया एकोनपंचाशन्मरुद्गणाः सपरिवाराः सायुधाः सवाहनाः सशक्तिकाः प्रीयन्ताम् ॥ इति मरुद्गणपूजनम् ॥

अथ मण्डपपूजनम्। ततो मध्यवेदीशानस्तम्भे ब्रह्माणं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूजयेत् । एह्येहि विप्रेन्द्र पितामहा दौ हंसादिरूढत्रिदशैकवेद्यः । श्वेतोत्पलाभास कुशाम्बुहस्त गृहाण पूजां भगवन्नमस्ते ॥१॥ ॐ भूर्भुवः स्वः ब्रह्मन्निहागच्छ इहतिष्ठ । ॐ ब्रह्मणे नमः इति नाममंत्रेण पूजयेत् ॥१॥ ततोमध्यवेद्याग्नेयस्तम्भे विष्णुं पूजयेत् । आवाहयेत्तं गरुडोपरि स्थितं रमार्धदेहं सुरराजवन्दितम् । कंसान्तकं चक्रगदाब्जहस्तं भजामिदेवं वसुदेवसूनुम् ॥१॥ ॐ भूर्भुवः स्वः विष्णो इहागच्छ इहतिष्ठ । ॐ विष्णवे नमः इति-मंत्रेणपूजयेत् ॥२॥ वेद्या नैऋत्यकोणस्तम्भे शंकरं पूजयेत् । एह्येहि गौरीश पिनाकपाणे शशांकमौले वृषभाधिरूढ । देवादि-देवेश महेश नित्यं गृहाण पूजां भगवन्नमस्ते ॥१॥ ॐ भूर्भुवः स्वः शम्भो इहागच्छ इहतिष्ठ। ॐ शंभवे नमः इति गंधादिभिः पूजयेत् ॥३॥ वेद्या वायव्यकोणस्तंभे इन्द्रं पूजयेत् । एह्येहि वृत्रघ्न गजाधिरूढ सहस्रनेत्र त्रिदशैकराज । शचीपते शक्र सुरेश नित्यं गृहाण पूजां भगवन्नमस्ते ॥१॥ ॐ भूर्भुवः स्वः इन्द्र इहागच्छ इहतिष्ठ । ॐ इन्द्राय नमः इति गन्धादिभिः पूजयेत् ४४॥ ॐ भूर्भुवः स्वः मण्डपस्थेभ्यो सर्वेभ्यो देवेभ्यो नमः इति मंत्रेण गंधादिभिः संपूज्य नमस्कारः । नमोऽस्तु शाखाबन्धाय सुदृढाय महात्मने । महामण्डपरक्षार्थं नतयः सन्तु मे सदा । ॐ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यतोयतः समीहसे ततो नोऽअभयं कुरु। शन्नः कुरु प्प्रजाभ्यो भयन्नः पशुभ्यः। अनेन कृतार्चनेन मण्डपस्थाः सर्वे देवाः प्रीयन्ताम्। ततः पुष्पांजलिं गृहीत्वा। ॐ अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्योनमस्तेऽअस्तुरुद्रेभ्यः। इति पठित्वा पुष्पांजलिं मण्डपेक्षिपेत्। इति मण्डपपूजनम्॥

अथ सर्वतोभद्रमण्डलदेवाना स्थापनम्। आचम्य प्राणानायम्य। देशकालौ संकीर्त्य अमुकगोत्रोत्पन्नः अमुकशर्माहं ममेहजन्मनि जन्मान्तरे वा कृतकायिक वाचिक मानसिक सांसर्गिक दोषपरिहारार्थमिहामुत्र सुखसौभाग्यसंतत्यादिकफलप्राप्त्यर्थं श्रीविष्णुप्रीतये अमुकहवनकर्मणि सर्वतोभद्रमण्डले वेदोक्तमंत्रैर्ब्रह्मादिषट्पञ्चाशद्देवताना आवाहनं पूजनं च करिष्ये। इति संकल्प्य। हस्ते अक्षतान् गृहीत्वा ब्रह्मादिदेवानावाहयेत्। मध्ये कर्णिकायां ब्रह्माणमावाहयेत्। ॐ ब्रह्म यज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः। सबुध्न्याऽउपमा अस्य विष्ठाः सतश्च योनिमसतश्च व्विवः। ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि॥१॥ उत्तरे वाप्यां सोममावाहयेत्। ॐ आप्यायस्व समेतुते व्विश्वतः सोम वृष्ण्यम्। भवाव्वाजस्य सङ्गथे। ॐ भूर्भुवः स्वः सोमाय नमः सोममावाहयामि॥२॥ ईशान्यां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खण्डेन्दौ ईशानमावाहयेत् । ॐ तमीशाञ्जगतस्तस्थुषपतिन्धियञ्जिन्वमवसे हूमहे व्वयम् । पूषानो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये । ॐ भूर्भुवः स्वः ईशानाय नमः ईशानमावाहयामि ॥३॥ पूर्ववाप्यां, इन्द्रमावाहयेत् । ॐ त्रातारमिन्द्रमवितारमिन्द्रᳬं हवेहवे सुहवᳬं शूरमिन्द्रम् । ह्वयामि शक्रम्पुरुहुतमिन्द्रᳬंस्वस्तिनो मघवा धात्विन्द्रः। ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि ॥४॥ अग्नेय्यां खण्डेन्दौ अग्निमावाहयेत् । ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान्देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषाᳬंसि प्रमुमुग्ध्यस्मत् । ॐ भूर्भुवः स्वः अग्नये नमः अग्निमावाहयामि ॥५॥ दक्षिणे वाप्याम् यममावाहयेत् । ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्मः पित्रे । ॐ भूर्भुवः स्वः यमाय नमः यममावाहयामि ॥६॥ नैर्ऋत्यां खण्डेन्दौ निर्ऋतिमावाहयेत् । ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य । अन्यमस्ममदिच्छसातऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु । ॐ भूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिमावाहयामि ॥७॥ पश्चिमे वाप्याम् वरुणमावाहयेत् । ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अहेडमानो व्वरुणेहवोब्ध्युरुश ꣳ समान आयुः प्रमोषीः । ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाहयामि ॥८॥ वायव्यां खण्डेन्दौ वायुमावाहयेत् । ॐ आनो नियुद्भिः शतिनीभिरध्व-र ꣳ सहस्रिणीभिरुपयाहि यज्ञम् । व्वायोऽअस्मिन्त्सवने माद-यस्व यूयम्पात स्वस्तिभिः सदा नः । ॐ भूर्भुवः स्वः वायवे नमः वायुमावाहयामि ॥९॥ वायुसोमयोर्मध्यभद्रे अष्टवसूना-वाहयेत् । ॐ व्वसुभ्यस्त्वा रुद्रेभ्यस्त्वा दित्येभ्यस्त्वा सञ्जाना-थान्द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावताम् । व्यन्तुव्वत्तक्त ꣳ रिहाणा मरुताम्पृषतीर्गच्छ व्वसा पृश्निर्भूत्वादिवङ्गच्छ ततो नो व्वृष्टिमावह । चक्षुष्पाऽअग्नेसि चक्षुर्म्मे पाहि। ॐ भूर्भुवः स्वः अष्टवसुभ्यो नमः अष्टवसूनावाहयामि ॥१०॥ सोमेशानयो-र्मध्यभद्रे एकादशरुद्रानावाहयेत् । ॐ नमस्तेरुद्रमन्यवऽउतोतऽ इषवे नमः । बाहुभ्यामुत ते नमः । ॐ भूर्भुवः स्वः एकादश-रुद्रेभ्यो नमः एकादशरुद्रानावाहयामि ॥११॥ ईशानपूर्वयो-र्मध्यभद्रे द्वादशादित्यानावाहयेत् । ॐ यज्ञो देवानाम्प्रत्त्येति सुम्म्नमादित्यासो भवता मृडयन्तः । आवोर्व्वाची सुमतिर्व्व-वृत्त्याद ꣳ होश्चिद्याव्वरिवो वित्तरासत् । ॐ भूर्भुवः स्वः द्वाद-शादित्येभ्यो नमः द्वादशादित्यानावाहयामि ॥१२॥ इन्द्राग्नयो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र्मध्यभद्रे अश्विनौ आवाहयेत्। यावाङ्कशा मधुमत्यश्विना सूनृतावती। तया यज्ञम्मिमिक्षतम्। ॐ भूर्भुवः स्वः अश्विभ्यां नमः अश्विनौ आवाहयामि ॥१३॥ अग्नियमयोर्मध्यभद्रे सपैतृकविश्वान्देवानावाहयेत्। ॐ व्विश्वेदेवासऽआगत शृणुतामऽइमᳬं हवम्। एदम्बर्हिर्निषीदत। उपयाम गृहीतोसि विश्वेभ्यस्त्वा देवेभ्यऽएषते योनिर्व्विश्वेभ्यस्त्वा देवेभ्यः। ॐ भूर्भुवः स्वः सपैतृकविश्वेभ्यो देवेभ्यो नमः सपैतृक विश्वान्देवानावाहयामि ॥१४॥ यमनिर्ऋतयोर्मध्यभद्रे सप्तयक्षानावाहयेत्। ॐ अभित्यन्देवᳬं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवᳬं रत्नधामभिप्प्रियम्मतिङ्कविम्। उर्द्ध्वायस्यामतिर्भाऽअदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपास्वः। प्प्रजाभ्यस्त्वा प्रजास्त्वा नुप्प्राणन्तु प्प्रजास्त्वामनुप्प्राणिहि। ॐ भूर्भुवः स्वः सप्तयक्षेभ्यो नमः सप्तयक्षानावाहयामि ॥१५॥ निर्ऋतिवरुणयोर्मध्यभद्रे अष्टकुलनागानावाहयेत्॥ ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु। येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः। ॐ भूर्भुवः स्वः अष्टकुलनागेभ्यो नमः अष्टकुलनागानावाहयामि ॥१६॥ वरुणवायोर्मध्यभद्रे गन्धर्वाप्सरसः आवाहयेत्। ॐ ऋताषाड् ऋतधामाग्निर्गन्धर्व्वस्तस्यौ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षधयोप्सरसो मुदो नाम। सनऽइदम्ब्रह्म क्षत्रम्पातु तस्मै स्वाहा व्वाट् ताभ्यः स्वाहा। ॐ भूर्भुवः स्वः गन्धर्वाप्सरोभ्यो नमः गन्धर्वाप्सरसः आवाहयामि ॥१७॥ ब्रह्मसोमयोर्मध्ये उत्तरवाप्यां स्कन्दमावाहयेत्। ॐ यदक्रन्दः प्प्रथमञ्जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यम्महि जातन्तेऽअर्व्वन्। ॐ भूर्भुवः स्वः स्कन्दाय नमः स्कन्दमावाहयामि ॥१८॥ स्कंदादुत्तरे वृषभमावाहयेत्। ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। सङ्क्रन्दनो निमिषऽएकवीरः शत ᳪ सेनाऽअजयत्साकमिन्द्रः। ॐ भूर्भुवः स्वः वृषभाय नमः वृषभमावाहयामि ॥१९॥ वृषभोत्तरे शूलमावाहयेत्। ॐ कार्षिरसि समुद्रस्य त्वा क्षित्याऽउन्नयामि। समापोऽअद्भिरग्मत समोषधीभिरोषधीः। ॐ भूर्भुवः स्वः शूलाय नमः शूलमावाहयामि ॥२०॥ शूलादुत्तरेमहाकालमावाहयेत्। ॐ कार्षिरसि समुद्रस्य त्वा क्षित्याऽउन्नयामि। समापोऽअद्भिरग्मत समोषधीभिरोषधीः। ॐ भूर्भुवः स्वः महाकालाय नमः महाकालमावाहयामि ॥२१॥ ब्रह्मेशानयोर्मध्ये भृङ्खलायां दक्षादिसप्तगणानावाहयेत्। ॐ शुक्रज्ज्योतिश्च चित्रज्ज्योतिश्च सत्यज्ज्योतिश्च ज्ज्योतिष्माँश्च। शुक्रश्च ऋत-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाश्चात्य ँ हाः। ॐ भूर्भुवः स्वः दक्षादिसप्तगणेभ्यो नमः दक्षादिसप्तगणानावाहयामि ॥ २२ ॥ ब्रह्मेन्द्रयोर्मध्ये वाप्यां दुर्गामावाहयेत्। ॐ अम्बेऽअम्बिकेऽम्बालिके नमानयतिकश्चन। ससस्त्यश्वकः सुभद्रिकाँ काम्पीलवासिनीम्। ॐ भूर्भुवः स्वः दुर्गायै नमः दुर्गामावाहयामि ॥२३॥ दुर्गापूर्वे विष्णुमावाहयेत्। इदं विष्णु र्विचक्रमे त्रेधानिदधेपदम्। समूढमस्यपा ँ सुरे स्वाहा। ॐ भूर्भुवः स्वः विष्णवे नमः विष्णुमावाहयामि ॥२४॥ ब्रह्माग्न्योर्मध्ये शृङ्खलायां स्वधामावाहयेत्। ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन्निपतरोमीमदंत पितरोतीतृपन्त पितरः पितरः शुन्धध्वम्। ॐ भूर्भुवः स्वः स्वधायै नमः स्वधामावाहयामि ॥ २५ ॥ ब्रह्म यमयोर्मध्ये वाप्यां मृत्युरोगानावाहयेत्। ॐ परंमृत्योऽअनुपरेहि पन्थां यस्तेऽअन्यऽइतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्ब्रवीमि मानः प्प्रजा ँ रीरिषो मोत व्वीरान्। ॐ भूर्भुवः स्वः मृत्युरोगेभ्यो नमः मृत्युरोगानावाहयामि ॥२६॥ ब्रह्मनिर्ऋत्योर्मध्ये शृङ्खलायां गणपतिमावाहयेत्। ॐ गणानां त्वा गणपति ँ हवामहे प्रियाणां त्वा प्रियपति ँ हवामहे निधीनां त्वा निधि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पतिꣳ हवामहे व्वसो मम। आहमजानिगर्भ धमात्वमजासिगर्भ-धम्। ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि ।२७। ब्रह्मवरुणयोर्मध्ये वाप्यां अपः आवाहयेत्। ॐ आपोहिष्ठामयो भुवस्तान ऊर्जे दधातन महेरणाय चक्षसे। योवः शिवतमोरस-स्तस्यभाजयतेहनः। उशतीरि व मातरः। तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ। आपोजनयथा च नः। ॐ भूर्भुवः स्वः अद्भ्यो नमः अपः आवाहयामि ॥२८॥ ब्रह्मवाय्वोर्मध्ये शृङ्ख-लायां मरुतः आवाहयेत्। ॐ मरुतो यस्य हि क्षये पाथादिवो-व्विमहसः। ससुगोपातमोजनः। ॐ भूर्भुवः स्वः मरुद्भ्यो नमः मरुतआवाहयामि ॥२९॥ ब्रह्मणः पादमूले कर्णिकार्ध मण्डलपश्चिमभागे पृथिवीमावाहयेत्। ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथा॥ ॐ भूर्भुवः स्वः पृथिव्यै नमः पृथिवीमावाहयामि ॥३०॥ ब्रह्मणः पादमूले पृथिव्या उत्तरे गंगादिनदीः आवाहयेत्। ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामस्युराचके। ॐ भूर्भुवः स्वः गंगादि-नदीभ्यो नमः गंगादिनदीः आवाहयामि ॥३१॥ ब्रह्मणः पाद-मूले गंगोत्तरे सप्तसागरानावाहयेत्। ॐ समुद्रोऽसि नभस्वाना-र्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा। मरुतोऽसि मरुतां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गणः शंभूर्मयोभूरभि मा वा हि स्वाहा। अवस्युरसि दुवस्वञ्छं-भूर्मयोभूरभि मा वा हि स्वाहा। ॐ भूर्भुवः स्वः सप्तसागरेभ्यो नमः सप्तसागरानावाहयामि ॥३२॥ ब्रह्मणः पूर्वे कर्णिका (पीत) परिधौ मेरुमावाहयेत्। ॐ प्रपर्व्वस्य वृषभस्य पृष्ठान्ना-वश्चरन्ति स्वसिच इयानाः। ताऽआववृत्रन्नधरागुदक्ताऽअहि-र्म्बुध्न्यमनुरीयमाणाः। विष्णोर्विक्रमणमसि व्विष्णोर्व्विक्रान्त-मसि विष्णोः क्रान्तमसि। ॐ भूर्भुवः स्वः मेरवे नमः मेरु-मावाहयामि ॥३३॥ ततो मण्डलाद्बहिः प्रथम (सत्व) परिधौ सोमादिसन्निधौ क्रमेण आयुधान्यावाहयेत्। उत्तरे गदामावा-हयेत्। ॐ गणानां त्वा गणपति ꣳ हवामहे प्रियाणां त्वा प्रियपति ꣳ हवामहे निधीनां त्वा निधिपति ꣳ हवामहे वसो मम। आहमजानि गर्भध मा त्वमजासि गर्भधम्॥ ॐ भूर्भुवः स्वः गदायै नमः गदामावाहयामि ॥३४॥ ऐशान्यां त्रिशूल-मावाहयेत्। ॐ त्रि ꣳ शद्धाम व्विराजति व्वाक्पतङ्गाय धीयते। प्रतिवस्तोरहद्युभिः॥ ॐ भूर्भुवः स्वः त्रिशूलाय नमः त्रिशूल-मावाहयामि ॥३५॥ पूर्वे वज्रमावाहयेत्। ॐ महाँ इन्द्रो व्वज्रहस्त षोडशी शर्म्म यच्छतु। हन्तुपाप्मानं योस्मान्द्वेष्टि। उपयाम गृहीतोऽसि महेन्द्राय त्वैषते योनिर्म्महेन्द्राय त्वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ भूर्भुवः स्वः वज्राय नमः वज्रमावाहयामि ॥३६॥ आग्नेयां शक्तिमावाहयेत् । ॐ व्वसु च मे व्वसतिश्च मे कर्म्म च मे शक्तिश्च मेर्थश्च मऽएमश्च मऽइत्या च मे गतिश्च मे यज्ञेन कल्पताम् ॥ ॐ भूर्भुवः स्वः शक्तये नमः शक्तिमावाहयामि ॥३७॥ दक्षिणे दण्डमावाहयेत् । ॐ इडऽएह्यदित्यऽएहि काम्याऽएत । मयि वः कामधरणं भूयात् ॥ ॐ भूर्भुवः स्वः दण्डाय नमः दण्डमावाहयामि॥३८॥ नैर्ऋत्यां खड्गमावाहयेत् । ॐ खड्गो व्वैश्व देवः श्वाकृष्णः कर्णौ गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय शूकरः सिꣳहो मारुत कृकलासः पिप्पका शकुनिस्ते शरव्यायै व्विश्वेषां देवानाम्पृषतः । ॐ भूर्भुवः स्वः खड्गाय नमः खड्गमावाहयामि ॥३९॥ पश्चिमे पाशमावाहयेत् । ॐ उदुत्तमं व्वरुण पाशमस्म्मदवाधमं व्विमध्यमꣳ श्रथाय । अथाव्वयमादित्य व्व्रते तवानागसोऽ अदितये स्याम ॥ ॐ भूर्भुवः स्वः पाशाय नमः पाशमावाहयामि ॥४०॥ वायुकोणे अङ्कुशमावाहयेत् । ॐ अꣳशुश्चमे रश्मिश्चमे दाभ्यश्चमेधिपतिश्चमऽउपाꣳशुश्चमेन्तर्यामश्चमऽऐन्द्रवायश्चमे मैत्रावरुणश्चमऽआश्विनश्चमे प्रतिप्प्रस्थानश्चमे शुचश्चमे मन्थीचमे यज्ञेन कल्पताम् ॥ ॐ भूर्भुवः स्वः अङ्कुशाय नमः अङ्कुशमावाहयामि ॥४१॥ तद्बाह्ये द्वितीय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(रक्त) रजःपरिधौ सोमादिक्रमेण ऋषीनावाहयेत्। उत्तरे गौतममावाहयेत्। ॐ आयङ्गौः पृश्निरक्रमीदसदन्न्मातरम्पुरः। पितरञ्च प्रयन्त्स्वः॥ ॐ भूर्भुवः स्वः गौतमाय नमः गौतममावाहयामि ॥४२॥ ईशान्यां भरद्वाजमावाहयेत्। ॐ अयन्दक्षिणा व्विश्वकर्म्मा तस्य मनो व्वैश्वकर्म्मणङ्ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारᳬं स्वारादन्तर्य्यामोन्तर्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाजऽऋषिः प्प्रजापति गृहीतया त्त्वयामनो गृह्णामि प्प्रजाब्भ्यः॥ ॐ भूर्भुवः स्वः भरद्वाजाय नमः भरद्वाजमावाहयामि ॥४३॥ पूर्वे विश्वामित्रमावाहयेत्। ॐ इदमुत्तरात्स्वस्तस्य श्रोत्रᳬं सौवᳬं शरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभऽऐडमैडान्मन्थी मन्थिनऽएकविᳬं शऽएकविᳬं शाद्वैराजं व्विश्वामित्रऽऋषिः प्प्रजापतिगृहीतया त्वया श्श्रोत्रङ्गृह्णामि प्प्रजाब्भ्यः॥ ॐ भूर्भुवः स्वः विश्वामित्राय नमः विश्वामित्रमावाहयामि ॥४४॥ आग्नेयाम् कश्यपमावाहयेत्। ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम्॥ ॐ भूर्भुवः स्वः कश्यपाय नमः कश्यपमावाहयामि ॥४५॥ दक्षिणे जमदग्निमावाहयेत्। ॐ अयम्पश्चाद्विश्वव्व्यचास्तस्य चक्षुर्वैश्वव्व्यचसं व्वर्षाश्चाक्षुष्यो जगती व्वार्षी जगत्त्याऽऋक्साम-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मृक्सामाच्छुक्रः शुक्क्रात्सप्तदशः सप्तदशाद्वैरूपं ज्ञमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥ ॐ भूर्भुवः स्वः जमदग्नये नमः जमदग्निमावाहयामि ॥४६॥ नैर्ऋत्याम् वसिष्ठमावाहयेत् । ॐ अयम्पुरोभुवस्तस्य प्राणो भौवायनो व्वसन्तः प्राणाय नो गायत्री व्वासन्ती गायत्र्यै गायत्र्यङ्गायत्रा-दुपाᳬ शुरुपाᳬ शोस्त्रिवृत्त्रिवृतो रथन्तरं व्वसिष्ठऽऋषिः प्रजापति गृहीतया त्वया प्राणंगृह्णामि प्रजाभ्यः ॥ ॐ भूर्भुवः स्वः वसिष्ठाय नमः वसिष्ठमावाहयामि ॥४७॥ पश्चिमे अत्रिमावाहयेत् । ॐ अत्र पितरोमादयद्ध्वं य्यथाभागमावृषा-यध्वम् । अमीमदन्त पितरो यथाभागमा वृपायिषत ॥ ॐ भूर्भुवः स्वः अत्रये नमः अत्रिमावाहयामि ॥४८॥ वायव्याम्— अरुन्धतीमावाहयेत् । ॐ तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृ-रुत वाहिरण्यैः । नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे ऽ अधिरोचने दिवः ॥ ॐ भूर्भुवः स्वः अरुन्धत्यै नमः अरुन्धती-मावाहयामि ॥४९॥ तद्बाह्ये तृतीय (कृष्ण) परिधौ पूर्वा-दिक्रमेणाष्टशशक्तिरावाहयेत् । पूर्वे ऐन्द्रीमावाहयेत् । ॐ अदित्यै रास्नासीन्द्राण्याऽउष्णीषः । पूषासि घर्म्मायदीष्व । ॐ भूर्भुवः स्वः ऐन्द्यै नमः ऐन्द्रीमावाहयामि ॥५०॥ आग्नेय्यां कौमारी-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मावाहयेत् । ॐ अम्बेऽअम्बिकेऽम्बालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकां कांपीलवासिनीम् ॥ ॐ भूर्भुवः स्वः कौमार्यै नमः । कौमारीमावाहयामि ॥५१॥ दक्षिणे ब्राह्मी-मावाहयेत् । ॐ इन्द्रावाहिधियेषितोव्विप्रजूतः सुतावतः । उपब्ब्रह्माणि व्वाग्घतः ॥ ॐ भूर्भुवः स्वः ब्राह्मयै नमः ब्राह्मी-मावाहयामि ॥५२॥ नैर्ऋत्यां वाराहीमावाहयेत् । ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः । पितरञ्चप्प्रयन्त्स्वः ॥ ॐ भूर्भुवः स्वः वाराह्यै नमः वाराहीमावाहयामि ॥५३॥ पश्चिमे चामुण्डा मावाहयेत् । ॐ अम्बेऽअम्बिकेऽम्बालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकाँ काँपीलवासिनीम् ॥ ॐ भूर्भुवः स्वः चामुण्डायै नमः चामुण्डामावाहयामि ॥५४॥ वायव्यां वैष्णवी मावाहयेत् । ॐ आप्यायस्व समेतु ते व्विश्वतः सोम व्वृष्ण्यम् । भवाव्वाजस्य सङ्गथे ॥ ॐ भूर्भुवः स्वः वैष्णव्यै नमः वैष्णवी-मावाहयामि ॥५५॥ उत्तरे माहेश्वरीमावाहयेत् । ॐ याते रुद्र शिवा तन्नूरघोरा पापकाशिनी । तया नस्तन्वा शन्तमया गिरि शन्ताभिचाकशीहि ॥ ॐ भूर्भुवः स्वः माहेश्वर्य्यै नमः माहेश्वरीमावाहयामि ॥५६॥ ईशान्यां वैनायकीमावाहयेत् । ॐ समख्ये देव्याधियासन्दक्षिणयोरुचक्षसा । मामऽआयुः प्रमो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षीर्मोऽअहं तव व्वीरं व्विदेय तव देवि सन्दृशि ॥ ॐ भूर्भुवः स्वः वैनायक्यै नमः वैनायकीमावाहयामि ॥५७॥ एवं षट्पंचाशत् मण्डलदेवानावाह्य । ॐ मनो जूतिर्जुषतामाज्यस्य वृहस्पति र्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु । विश्वेदेवा सऽइहमादयन्तामों ३ प्रतिष्ठ ॥१॥ इति प्रतिष्ठाप्य । सर्वतोभद्र मण्डलस्थदेवताभ्यो नमः इति षोडशोपचारैः पूजयेत् । पुष्पाण्यादाय सांजलिः श्री ब्रह्मादिसर्वतोभद्र मण्डलस्थदेवानां पूजनविधौ यन्न्यूनमतिरिक्तं वा तत्सर्वं श्रीब्रह्मादिप्रसादात् परिपूर्णमस्तु । हस्ते जलाक्षतानादाय । अनया पूजया श्रीब्रह्मादिदेवताः प्रीयन्ताम् ॥ इति सर्वतोभद्रमण्डल पूजनम् ॥

अथ कलशस्थापनम् ॥ ततः सर्वतोभद्रमण्डलमध्यस्थे पद्मे ताम्रादिकलशं स्थापयेत् । तत्र प्रयोगः । ॐ मही द्यौः पृथिवी च नऽइमं यज्ञं मिमिक्षताम् । पिपृतां नो भरिमभि । इति कलशाधारंभूमिं स्पृष्ट्वा ॥१॥ ॐ ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्त ँ राजन्यारयामसि । इति स्पृष्ट प्रदेशे उपकल्पितप्रस्थधान्यस्य पुञ्जं कृत्वाऽष्टदलं विलिख्य ॥२॥ ॐ आजिघ्र कलशं मह्या त्वा व्विशन्त्विन्दवः । पुनरूर्जा निवर्त्तस्व सानः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माऽऽ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विशताद्रयिः ॥ इति धान्यपुञ्जोपरि अच्छिद्रं नूतनं हैमं राजतं ताम्रमभावे मृण्मयं वा सूत्रवेष्टितकण्ठं कृतस्वस्तिकं कलशं संस्थाप्य ॥३॥ ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्जनीस्थो व्वरुणस्यऽऋृतसदन्यसि व्वरुणस्यऽऋृतसदनमसि व्वरुणस्यऽऋृतसदनमासीद । इति उपकल्पित कलशोदकेन तं पूरयित्वा ॥४॥ ॐ त्वां गन्धर्वाऽअखनंस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा व्विद्वान्यक्ष्मादमुच्यत । इति गन्धंप्रक्षिप्य ॥५॥ ॐ या ओषधीः पूर्व्वा जाता देवेभ्यः स्त्रियुगं पुरा । मनै नु बभ्रूणामह ँ शतं धामानि सप्त च । इति सर्वौषधीः प्रक्षिप्य ॥६॥ ॐ काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च । इति दूर्वाः प्रक्षिप्य ॥७॥ ॐ अश्वत्थे वो निषदनं पर्णे वो व्वसतिष्कृता । गोभाजऽइत्किला सथ यत्सनवथ पूरुषम् । इति पञ्चपल्लवान् प्रक्षिप्य ॥८॥ ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी । यच्छानः शर्म सप्रथाः । इति सप्तमृदः प्रक्षिप्य ।९। ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पति प्रसूतास्ता नो मुञ्च न्त्व ँ हसः । इति पूगीफलं प्रक्षिप्य ॥१०॥ ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति पञ्चरत्नानि प्रक्षिप्य ॥११॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा व्विधेम । इति हिरण्यं प्रक्षिप्य ॥१२॥ ॐ सुजातो ज्योतिषा सह शर्म व्वरूथमाऽसदत्स्वः । व्वासोऽअग्ने व्विश्वरूप ँ सं व्ययस्व व्विभावसो । इति वस्त्रयुग्मेन (रक्त-सूत्रेण च तं) वेष्टयित्वा ॥१३॥ ॐ पूर्णा दर्व्वि परापत सुपूर्णा पुनरापत । व्वस्नेवव्विक्रीणा वहाऽइषमूर्ज्ज ँ शतक्रतो । इति सतण्डुलपात्रेण कलशाननमपिदध्यात् ॥१४॥ ॐ श्रीश्चते लक्ष्मीश्च पत्न्या व्वहोरात्रेपार्श्वे नक्षत्राणि रूपमश्विनौव्यात्तम् । इष्णन्निषाणा मुम्मऽइषाण सर्व्वलोकम्म इषाण । इति नारिकेलं कलशोपरिस्थापयेत् ॥१५॥ ततः अक्षतानादाय । ॐ मनो-जूतिर्ज्जुषतामाज्यस्य वृहस्पतिर्य्यज्ञ मिमं तनो त्वरिष्टं यज्ञ ँ समिमं दधातु । व्विश्वेदेवा सऽइहमादयन्तामों ३ प्रतिष्ठ । इति प्रतिष्ठाप्य ॥१६॥ ॐ तत्त्वा यामि व्व्रह्मणा वन्दमान-स्तदा शास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोध्यु-रुश ँ समानऽआयुः प्रमोषीः ॥१७॥ अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि स्थापयामि । इत्यावाह्य । ॐ अपांपतये वरुणाय नमः इति षोडशभिरुपचारैः कलशे वरुणं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संपूज्य कलशे देवता आवाहयेत्। सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः। आयान्तु मम शान्त्यर्थं दुरित क्षयकारकाः। इति कलशे देवता आवाह्य कलशमभिमंत्रयेद्देवता आवाहयेच्च। कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः। कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः। अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः। अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा। आयान्तु मम शान्त्यर्थं दुरितक्षयकारका। इति। ततः कुम्भ प्रार्थना। देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुनास्वयम्। त्वत्तोये सर्वतिर्थानि देवाः सर्वे प्रतिष्ठिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः। शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः। त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः। त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव। सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय। सुपाश हस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते। इति प्रार्थयेत्। ततः कलशोपरि सुवर्णेन रचितां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीलक्ष्मीनारायण प्रतिमामग्न्युत्तारणपूर्वकं स्थापयेत् ॥ अथाग्न्युत्तारणम् । नूतनां घटितां प्रतिष्ठाप्याम्मूर्तिं घृतेन लिप्त्वा रजतादिपात्रे निधाय जलदुग्धधाराभिरभिषिञ्चेत् । तत्रादौ सजलाक्षतं द्रव्यमादाय ॐ तत्सत् ॐ अद्यैतस्येत्यादि पठित्वाऽमुकगोत्रोऽमुकशर्माऽहम् एतस्या नूतनाया घटिताया देवमूर्तेर्घटनकालिकतत्तद्दोषनिवर्त्तनपूर्वकं श्रीविष्णुसारूप्यादिलाभयोग्यत्वसम्पादनाय चाग्न्युत्तारणसूक्तेन जलदुग्धधाराभिरभिषेक्ष्यामि। ॥ इति सङ्कल्पयेत् ॥ ततो जलदुग्धधाराभिरभिषिञ्चेत् ॥ तत्र मंत्राः ॥ ॐ समुद्रस्य त्वा वकयाग्ने परिव्ययामसि । पावकोऽअस्मभ्य ᳪ शिवो भव ॥१॥ ॐ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावकोऽअस्मभ्य ᳪ शिवो भव ॥२॥ ॐ अपामिदन्न्ययन ᳪ समुद्रस्य निवेशनम् । अन्न्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य ᳪ शिवो भव ॥३॥ ॐ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे । अन्न्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य ᳪ शिवो भव ॥ ४ ॥ ॐ प्राणदाऽअपानदा व्यानदा वर्चोदा वरिवोदाः । अन्न्याँस्तेऽअस्मत्तपन्तु हेतयः । पावकोऽअस्मभ्य ᳪ शिवो भव ॥५॥ एवं अग्न्युत्तारणं कृत्वा प्राणप्रतिष्ठां कुर्यात् ॥ अथ प्राणप्रतिष्ठापनम् ॥ यस्यां मूर्तौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्राणाः प्रतिष्ठाप्यास्तां पुरतोऽवस्थाप्य जलं गृहीत्वा "अस्य प्राण-प्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषय ऋग्यजुः सामानि च्छन्दांसि क्रियामय वपुः प्राणाख्यादेवता आं बीजं ह्रीं शक्तिः क्रौं कीलकम् अस्यां नूतनमूर्तौ प्राणप्रतिष्ठापने विनियोगः।" इति पठित्वा तज्जलं क्षिपेत्। अथ तां मूर्तिंदक्षिणहस्तेन स्पृशन्। ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हों हँ सः॥ अस्या विष्णु प्रतिमाया प्राणा इह प्राणाः। पुनः ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हों हँ सः। अस्या विष्णु प्रतिमाया जीव इह स्थितः। पुनः ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हों हँ सः अस्या विष्णु प्रतिमायाः सर्वाणि इन्द्रियाणि वाङ् मनस्त्वक्चक्षुः श्रोत्र जिह्वा घ्राण पाणि पाद पायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। इति पठित्वा पुष्पाण्यादाय च। ॐ मनोजूतिर्जुषता-माज्यस्य बृहस्पति र्यज्ञमिमं तनो त्वरिष्टं यज्ञᳬ समिमं दधातु। विश्वेदेवासऽइदमादयन्तामों ३ प्रतिष्ठ॥ १॥ एष वै प्रतिष्ठा नाम यज्ञो यत्रै तेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति। इति पठित्वा समर्पयेत्। ततस्तामेव मूर्तिं पुनः स्पृशन् ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ओं ओं ओं ओं ओं ओं इति मन्दमन्दं पठित्वा अनेनास्या विष्णु प्रतिमाया गर्भाधानादयः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पञ्चदश संस्काराः संपद्यन्ताम् ॥ इति पठेत् ॥ किञ्चिज्जलं च निक्षिपेत् । अथ तस्या एव मूर्तेः नेत्रे स्वर्णशलाकयोन्मीलयन् (मधुघृताभ्याम्) ॐ वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि ॥ इति पठेत् ॥ तत परं सिंहासनोपरि वरुणकलशोपरि वा समाकीर्णे वस्त्रे प्रतिष्ठापयेत् पूजयेच्च ॥ अथ विष्णुपूजनम् ॥ तत्रादौ स्वशरीरे देवाङ्गे च पुरुषसूक्तन्यासं कुर्यात् "देवो भूत्वा देवं यजेत्" इति वाक्यात् । अथाङ्गन्यासः सहस्रशीर्षे त्यादि-षोडशर्चसूक्तस्य नारायण ऋषिः पुरुषो देवता । अनुष्टुप्छन्दः अन्त्यायास्त्रिष्टुप्छन्दः । न्यासे पूजायां च विनियोगः । ॐ सहस्र शीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ सर्वतः स्पृत्वात्य तिष्ठद्दशाङ्गुलम् ॥ इति वामकरे ॥१॥ ॐ पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ इति दक्षिणकरे ॥२॥ ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्या मृतंदिवि ॥ इति वामपादे ॥३॥ ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्सा शनानशने अभि ॥ इति दक्षिण पादे ॥४॥ ॐ ततो विराडजायत विराजो अधि पूरुषः । सजातो अत्यरिच्यत पश्चाद्भूमिमथोपुरः । इति वामजानुनि ।५।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् । पशूँस्तांश्चक्रे वायव्या नारण्या ग्राम्याश्चये ॥ इति दक्षिणजानुनि ॥६॥ ॐ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छन्दा ँ सिजज्ञिरे तस्मातस्माद्यजुस्तस्मादजायत ॥ इति वामकटौ ॥७॥ ॐ तस्मादश्वा-अजायन्त ये के चोभयादतः । गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ इति दक्षिण कटौ ॥८॥ ॐ तं यज्ञं बर्हिषि प्रौक्ष्यन्पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये । इति नाभौ ॥९॥ ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥ इति हृदये ॥१०॥ ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रो अजायत ॥ इति कण्ठे ॥११॥ ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । श्रोत्राद्वायुश्च प्राणाश्च मुखादग्निरजायत ॥ इति वामबाहौ ॥१२॥ ॐ नाभ्या आसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन् ॥ इति दक्षिणबाहौ ॥१३॥ ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ इति मुखे ॥१४॥ ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पशुम् ।। इति नेत्रयोः ।।१५।। ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।। इति मूर्ध्नि ।।१६।। अथ पंचांगन्यासः। ॐ अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे । इति हृदये ।।१।। ॐ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः पुरस्तात् । तमेवविदित्वाऽतिमत्युमेति नान्यः पन्था विद्यसेऽयनाय । इति शिरसि ।।२।। ॐ प्रजापतिश्चरति गर्भे अन्तर जायमानो बहुधा विजायते । तस्य योनिं परिपश्यन्ति धीरा-स्तस्मिन्ह तस्थुर्भुवनानि विश्वा । इति शिखायै वषट् ।।३।। ॐ यो देवेभ्य आतपति यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये । इति कवचायहुम् । ॐ रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे । इति अस्त्रायफट् ।।५।। एवं न्यासं कृत्वा आचम्य कलशं शंखघंटे च संपूज्य देवं ध्यानम् घंटानादं कृत्वा पूजां कुर्यात् ।।

अथ षोषशोपचारपूजाप्रयोगः । तत्रादौध्यानम् । यच्छौ-चनिः सृतसरित्प्रावरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूत् । ध्यातुर्मनः शमलशैल निस्टष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविन्दम् । ॐ भूर्भुवः स्वः श्रीमहाविष्णवे नमः ध्यायामि । इति ध्यानम् ।।१।। ॐ आवो देवासऽईमहे व्वामम्प्रयत्यद्ध्वरे । आवोदेवासऽआशिषो यज्ञियासो हवामहे । (गोलोकधामाधिपते रमापते गोविन्द दामोदर दीनवत्सल । राधापते माधव सात्त्वतांपते सिंहासनेऽस्मिन्मम सम्मुखो भव) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः विष्णुमावाहयामि ।।२।। ॐ एषोहदेवः प्रदिशोनुसर्व्वाः पूर्वोह जाताः सउगर्भेऽअन्तः । सएवजातः सजनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्व्वतोमुखः । (अज्ञानाद्दुर्मनस्याद्वा वैकल्यात्साधनस्य च । यदपूर्णं भवेत्कृत्यं तदप्यभिमुखो भव) ॐ भूर्भुवः स्वः श्रीविष्णो इह संमुखो भव ।।३।। ॐ त्वं पविष्ठ दाशुषोनॄँः पाहि शृणुधीगिरः रक्षातोकमुतत्मना (सिंहासनं कनकरत्नमणिप्रभावच्छत्रध्वजालसितचामरतोरणाढ्यम् । वालार्ककोटिसदृशं कनकाम्बराढ्यं श्रीविश्वनाथ मनसैव मयार्पितं ते) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः आसनं समर्पयामि । आसनार्थे पुष्पाणि क्षिपेत् ।।४।। ॐ याऽआपोदिव्व्याऽउत वास्रवन्ति खनित्रियाऽउतवा याः स्वयं याः । समुद्रार्थायाः शुचयः पावकास्ताऽआपोदेवीरिह मामवन्तु । (दूर्वाङ्कुराम्बुज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनोहरपुष्पयुक्तं शुभ्रं जलं सुरभि चूर्ण समन्वितं च। सौवर्णपात्रविलसत्पदयो र्विशुद्धौ पाद्यं गृहाण जगदीश मयार्पितं ते) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः पाद्यं समर्पयामि ।।५।। ॐ धामं ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि। अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम। (दूर्वाक्षतसुगन्धि हिरण्यरत्नदर्भाम्बुजं त्रिपथगाजलपुष्पयुक्तम्। सौवर्णपात्ररचितं फलयुक्तमर्घं तत्त्वं गृहाण मनसार्पितमाशुतोष।) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः अर्घ्यं समर्पयामि ।।६।। ॐ इमम्मे व्वरुणश्रुधी हव मद्या च मृड। त्वामस्यु राचके। श्रीजान्हवीजलमिदं सरसं सुधावच्चैला लवङ्गशुभगन्धमनोभिरामम्। पृथ्वीपते कनकपात्रधृतं मयाते भक्त्यार्पितं रुचिरमाचमनं गृहाण) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः आचमनीयं समर्पयामि ।।७।। (अथ स्नान मंत्राः) ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनीस्थो व्वरुणस्य ऋतसदन्न्यसि व्वरुणस्य ऋतसदनमसि व्वरुणस्यऽऋृतसदनमासीद। (श्रीजान्हवीजलमिदं सरसं सुधावच्चैलालवङ्ग शुभगन्धयुतं मनोज्ञम्। पृथ्वीपते कनकपात्रघृतं मयाते स्नानं गृहाण जगदीश नमो नमस्ते) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः स्नानं समर्पयामि ।।८।। अथ पयः स्नानम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ पयः पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्। (कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्। पावनं यज्ञहेतेश्च पयः स्नानार्थ मर्प्पितम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः पयः स्नानं समर्पयामि ॥९॥ पुनः शुद्धोदकस्नानम्। अथ दधिस्नानम्। ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य व्वाजिनः। सुरभिनोमुखा करत्प्रणऽआयु ᳪ षितारिषत्। (पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः दधिस्नानं समर्पयामि ॥१०॥ पुनः शुद्धोदकस्नानम्। अथ घृतस्नानम्। ॐ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम। अनुष्वधमावह मादयस्व स्वाहा कृतं वृषभ व्वक्षिहव्यम्। (नवनीत समुत्पन्नं सर्वसंतोषकारकम्। घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः घृतस्नानं समर्पयामि ॥११॥ पुनः शुद्धोदकस्नानम्। अथ मधु स्नानम्। ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिंधवः। माध्वीर्न्नः सन्त्वोषधीः। ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ᳪ रजः। मधुद्यौरस्तुनः पिता। ॐ मधुमान्नो व्वनस्पतिर्म्मधुमाँ२ अस्तुसूर्य्यः। माध्वीर्गावो भवन्तु नः। (तरु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्प समुद्भूतं सुस्वादु मधुरं मधु। तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः मधुस्नानं समर्पयामि ॥१२॥ पुनः शुद्धोदकस्नानम्। अथ शर्करास्नानम्। ॐ अपा ᳪ रसमुद्वयस ᳪ सूर्य्येसन्त ᳪ समाहितम्। अपा ᳪ रसस्य योरसस्तंव्वोगृह्णाम्युत्तम मुपयाम गृहीतोसीन्द्रायत्वा जुष्टं गृह्णाम्येषते योनिरिन्द्रायत्वा जुष्टतमम्। (इक्षुरससमुद्भूता शर्करा पुष्टिकारिका। मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः शर्करास्नानं समर्पयामि ॥१३॥ पुनः शुद्धोदकस्नानम्। अथ पंचामृतस्नानम्। ॐ पंचनद्यः सरस्वतीमपियन्ति सस्रोतसः। सरस्वती तु पंचधासो देशेऽभवत्सरित्। (तोयैश्च दुग्धदधिमाक्षिकसर्प्पिराढ्यैः सीतायुतैः कृतककुम्भधृतैः समंत्रैः। कर्पूरकेशरसुगन्धिसुमिश्रितैश्च स्नानार्थमर्पितमिदं विधिवद्गृहाण। ॐ भूर्भुवः स्वः श्रीविष्णवे नमः पंचामृतस्नानं समर्पयामि ॥१४॥ अथ शुद्धस्नानम्। ॐ शुद्धवालः सर्व्वशुद्धवालोमणिवालस्तऽआश्विनाः श्येतः श्येताक्ष्यो रुणस्ते रुद्राय पशुपतये कर्णायामा अवलिप्ता रौद्रा नभोरूपाः पार्ज्जन्याः। (मन्दाकिन्याः समानीतं हेमांभोरुहवासितम्। स्नानाय ते मया भक्त्या नीरं स्वीक्रियतामिदम्) ॐ भूर्भुवः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वः श्रीविष्णवे नमः शुद्ध स्नानं समर्पयामि ॥१५॥ अथ मधुपर्क स्नानम् । ॐ मधुवाताऽऋृतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । (मध्याह्नचन्द्रार्कभवंमलापहं सितांग संपर्क मनोहरंपरम् । गृहाण विष्णो मधुपर्कमेनं संदृश्य पीतांबर सात्त्वतांपते) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः मधुपर्कस्नानं समर्पयामि ॥ १६ ॥ पुनः शुद्धोदकस्नानम् । अथ उद्वर्तन स्नानम् । ॐ अहिरिव भोगैः पर्य्येति बाहुं ज्यायाहेतिम्परि-बाधमानः । हस्तघ्नो व्विश्वा व्वयुनानि विद्वान्पुमान्पुमाᳬंसम्परि पातु व्विश्वतः । (नाना सुगन्धिद्रव्यं च चन्दनं रजनी युतम् । उद्वर्तनं मयादत्तं गृहाण परमेश्वर) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः उद्वर्तनस्नानं समर्पयामि ॥१७॥ पुनः शुद्धोदकस्नानम् । अथ सुगन्धिततैलस्नानम् । ॐ अᳬं सुनाते अᳬं शुः पृच्यतां परुषापरुः । गन्धस्ते सोममवंतुमादयरसोऽअच्युतः । (स्नेहं गृहाण स्नेहेन लोकनाथ महाशय । सर्वलोकेषु शुद्धात्मन्ददामि स्नेहमुत्तमम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः सुगन्धिततैल-स्नानं समर्पयामि ॥१८॥ पुनः शुद्धोदकस्नानम् । अथ गन्धो-दकस्नानम् । ॐ द्रुपदादिवमुमुचानः स्विन्नः स्नातो मला दिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः । (मलयाचल संभूतं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चन्दनागुरुसंभवम् । चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः गंधोदकस्नानं समर्पयामि ॥१६॥ अथ शुद्धोदकस्नानम् । ॐ तस्माऽद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् । पशूँस्ताँश्चक्र वायव्या नारण्या ग्राम्याश्च ये । (काश्मीर पाटीरविमिश्रितेन सुमल्लिकोशीरवताजलेन । स्नानं कुरु त्वं यदुनाथदेव गोविन्द गोपालक तीर्थपाद) ॐ भूर्भुवः स्वः श्री विष्णवे नमः शुद्धस्नामं समर्पयामि ॥२०॥ (अथाभिषेकः) * शिव सूर्या तिरिक्त देवेषु शंखेनाभिषेकं कुर्यात्* ॐ सहस्र शीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमि ᳪ सर्वतस्पृत्वात्यतिष्ठ दशाङ्गुलम् ॥१॥ पुरुषऽएवेद ᳪ सर्व्वंय्यद्भूतं य्यच्च भाव्यम् । उतामृतत्त्वस्येशानो यदन्नेना तिरोहति ॥२॥ एतावानस्य महिमातोज्यायांश्च पूरुषः । पादोस्य व्विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥३॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ॥४॥ ततो व्विराडजायतव्विराजोऽअधिपूरुषः । सजातोऽअत्यरिच्यत पश्चाद्भूमिमथोपुरः ॥५॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँतांश्चक्रे वायव्या नारण्या ग्राम्याश्चये ॥६॥ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे । छन्दा ᳪ सि जज्ञिरे तस्माद्यजुस्तमादजायत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥७॥ तस्मादश्वाऽअजायन्त येके चो भयादतः । गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥८॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेनदेवाऽअयजन्त साध्याऽऋषयश्चये ॥९॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत् किम्बाहू किमूरूपादाऽउच्येते ॥१०॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्याᳪं शूद्रो अजायत ॥११॥ चन्द्रमामनसो जातश्चक्षोः सूर्योऽअजायत । श्रोत्राद्वायुश्चप्राणश्च मुखादग्निरजायत ॥१२॥ नाभ्याऽआसीदन्तरिक्षᳪं शीर्ष्णोद्यौः समवर्त्तत । पद्भ्यांभूमिर्द्दिशः श्रोत्रात्तथालोकाँ२ अकल्पयन् ॥१३॥ यत्पुरुषेण हविषा देवायज्ञमतन्वत । वसन्तोस्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ॥१४॥ सप्तास्या सन्परिधयस्त्रिः सप्तसमिधः कृताः । देवा यद्यज्ञन्तन्वाना अबध्नन्पुरुषं पशुम् ॥१५॥ यज्ञेन यज्ञमयजन्तदेवा स्तानि धर्म्माणि प्रथमान्यासन् । तेहनाकं महिमानः सचंत यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥ एवं पुरुष सूक्तेन वा अथर्वशिरसा तत्तन्मूलमंत्रेण वा यथाशक्ति अभिषेकं कृत्वा । अनेन अभिषेककर्म्मणा श्रीविष्णुः प्रीयताम् । इति समर्प्य आचमनं दद्यात् । अथ वस्त्रम् । ॐ सुजातो ज्योतिषा सह शर्म्म वरूथमासदत्स्वः । व्वासोऽग्ने व्विश्वरूपᳪं संव्ययस्व

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्विभावसोः। (सर्वभूषाधिके सौम्ये लोकलज्जानिबारणे। मयोपपादिते तुभ्यं वाससो प्रतिगृह्यताम्।) ॐ भूर्भुवः स्वः श्री विष्णवे नमः वस्त्रं समर्पयामि। आचमनं च समर्पयामि ॥२१॥ अथ यज्ञोपवीतम्। ॐ यज्ञोपवीतं परमं पवित्रं प्रजापते र्यत्सहजं पुरस्तात्। आयुष्यमग्ˆयं प्रतिमुञ्च शुभ्रं यज्ञो पवितं बलमस्तु तेजः। (सुवर्णाभमापीतवर्ण सुमंत्रै परं प्रोक्षितं वेदविन्निर्मितं च। शुभं पंच कार्येषु नैमित्तिकेषु प्रभोयज्ञ यज्ञोपवीतं गृहाण। ॐ भूर्भुवः स्वः श्रीविष्णवे नमः यज्ञोपवीतं समर्पयामि पुनराचमनीयं समर्पयामि ॥२२॥ अथ वस्त्रम्। ॐ युवासुवासाः परिवीतऽआगात्सऽउश्रेयान्भवति जायमानः। तन्धीरासः कवयऽ उन्नयन्ति स्वाध्यो मनसा देवयन्तः। (विभो सर्वतः प्रस्फुरत्प्रोज्ज्वलं च स्फुरद्रस्मिशून्यं परं दुर्लभं च। स्वतोनिर्मितं पद्मकिंजल्कवर्णं गृहाणाम्बरं देव पीताम्बराख्यम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः उपवस्त्रं समर्पयामि। आचमनीयं च समर्पयामि ॥२३॥ अथ भूषणम्। ॐ तस्मा द्यज्ञात्सर्व्वहुतऽऋचः सामानि यज्ञिरे। छन्दाꣳसि यज्ञिये तस्मायजुस्तामादजायत। (कनकरत्नमयं मम निर्मितं मदनरुक्कदनं सदनं रुचाम्। उषसिपूष सुवर्णविभूषणं सकललोक विभूषण गृह्यताम्) ॐ भूर्भुवः स्वः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविष्णवे नमः आभरणानि समर्पयामि । अलंकाराभावे (दक्षिणां) अक्षतान् समर्पयामि ॥२४॥ अथ गन्धम् । ॐ त्वां गन्धर्वाऽअखनं स्त्वामिन्द्रस्त्वाम्बृहस्पतिः । त्वामोषधे सोमो राजा व्विद्वान्न्यक्ष्मादमुच्च्यत । (यच्छ्रेष्ठमस्ति मलयाचलचन्दनानां कर्पूरकेशरसुगन्धिरसेनघृष्टम् । आमोदमानमनिशं मनसा धृतंयत्तचन्दनं त्वमुररीकुरु दीनबन्धो) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः गन्धं समर्पयामि ॥२५॥ अथाक्षत मंत्रः । ॐ अक्षन्नमीमदन्त ह्यवप्रिया॒ऽअधूषत । अस्तोषत स्वभानवो व्विप्रानविष्ठया मती योजान्विन्द्रतेहरी । (श्वेतैरखण्डितमनोहरशालिवीजैः संक्षालितैः शुचिजलैश्च सुगन्धमिश्रैः । त्वामर्च्चयामि भगवन् मनसा महेश पृथ्वीपते मयि निधेयि कृपाकटाक्षम्) ॐ ॐ भूर्भुवः स्वः श्रीविष्णवे नमः अक्षतान् समर्पयामि ॥२६॥ *विष्णुपूजने (शालिग्रामपूजने) अक्षतानग्राह्या निषिद्धत्वात्* अथ पुष्पाणि । ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत्किं बाहू किमूरूपादाऽउच्येते । (विल्वैश्च चम्पक मनोहरजातिपुष्पै मन्दारपङ्कजजपातुलसीदलैश्च । सन्मालिका कनकपुष्पभरैर्म्मया ते सम्पूजितोमयि निधेयि कृपाकटाक्षम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः पुष्पाणि समर्पयामि ॥२७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ पुष्पमाला मंत्रः। ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः। अश्वाऽइव स जित्वरी र्व्वीरुधः पारयिष्णवः। (नानापुष्पविचित्राढ्यां पुष्पमलां सुशोभिताम्। गृहाण त्वं महाविष्णो मया दत्तां हि भक्तितः) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः पुष्पमालां समर्पयामि ॥२८॥ अथ तुलसीदलमंत्रः। ॐ इदं विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपा ँ सुरे। (मंदारकं जातक पारिजातकल्पद्रुमश्रीहरिचन्दनानाम्। गृहाणपुष्पाणि हरेतुलस्यामिश्राणि साक्षान्नवमंजरीभिः) ॐ भूर्भुवः स्वः श्री विष्णवे नमः तुलसीदलं समर्पयामि ॥२९॥ अथ परिमलद्रव्याणि। ॐ अहिरिव भोगैः पर्येति बाहुञ्ज्यायाहेतिं परिबाधमानः। हस्तघ्नो व्विश्वा व्वयुनानि व्विद्वान्पुमान्पुमा ँ सम्परिपातु व्विश्वतः। (नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम्। अबीर नामकं चूर्णं गन्धं चारु प्रगृह्यताम्। चन्दनागरु कर्पूर कुंकुमं रोचनं तथा। कस्तूर्यादि सुगन्धांश्च सर्वाङ्गेषु विलेपयेत्) ॐ भूर्भुवः श्रीविष्णवे नमः नानापरिमलद्रव्याणि अबीरगुलालं च समर्पयामि ॥३०॥ ॐ अ ँ शुना तेऽअ ँ शुः पृच्यतां परुषा परुः। गन्धस्ते सोममवतु मदाय रसोऽअच्युतः। (तैलानि च सुगन्धीनि द्रव्याणि विविधानि च। मया दत्तानि लेपार्थं गृहाण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परमेश्वर) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः सुगन्धितं तैलं (सुगंधित इत्र) समर्पयामि ॥३१॥

(अथाङ्गपूजा गंधमात्रेण) ॐ विष्णवे नमः चरणौ पूजयामि ॥१॥ ॐ मधुसूदनाय नमः गुल्फौ पूजयामि ॥२॥ ॐ वामनाय नमः जंघे पूजयामि ॥३॥ ॐ त्रिविक्रमाय नमः ऊरू पूजयामि ॥४॥ ॐ श्रीधराय नमः कटिं पूजयामि ॥५॥ ॐ ऋषीकेशाय नमः उदरं पूजयामि ॥६॥ ॐ पद्मनाभाय नमः पृष्ठं पूजयामि ॥७॥ ॐ दामोदराय नमः भुजौ पूजयामि ॥८॥ ॐ संकर्षणाय नमः कंधरां पूजयामि ॥९॥ ॐ वासुदेवाय नमः कर्णौ पूजयामि ॥१०॥ ॐ प्रद्युम्नाय नमः नासिकां पूजयामि ।११। ॐ अनिरुद्धाय नमः अधरोष्ठौ पूजयामि ॥१२॥ ॐ अधोक्षजाय नमः नेत्रे पूजयामि ॥१३॥ ॐ पुरुषोत्तमाय नमः शिरः पूजयामि ॥१४॥ ॐ श्रीकृष्णाय नमः सर्वाङ्गानि पूजयामि ।१५। इत्यङ्गपूजा । अथ धूपमंत्रः । ॐ धूरसि धूर्व धूर्वन्तं धूर्वतं योऽस्मान्धूर्वति तं धूर्व यं व्वयं धूर्वामः । देवानामसि व्वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् । (लवंगपाटीरजचूर्णमिश्रं मनुष्य देवासुर सौख्यदं च । सद्यः सुगन्धीकृतहर्म्यदेशं द्वाराचतीभूप गृहाण धूपम्) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः धूप-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माघ्रापयामि ॥३२॥ अथ दीपमंत्रः । ॐ अग्नि ज्योति ज्योतिरग्निः स्वाहा सूर्यो ज्योति ज्योतिः सूर्यः स्वाहा । अग्निर्व्वर्चो ज्योति र्व्वर्च्चः स्वाहा सूर्यो व्वर्चो ज्योति र्व्वर्च्चः स्वाहा । ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा । (तमो हारिणं ज्ञानमूर्तिं मनोज्ञं लसद्वर्तिकर्पूरक्षरंगवाज्यम् । जगन्नाथदेवप्रभोविश्वदीपस्फुरज्ज्योतिषं दीपमुख्यं गृहाण) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः दृष्टिदोष निवारणार्थं दीपं दर्शयामि ॥३३॥ [दीपदानानन्तरं हस्तप्रक्षालनं कर्त्तव्यम्] अथ नैवेद्यमंत्रः । ततः स्वर्णादिभाजने देवताग्रे देवदक्षिणतो वा साज्यं सशर्करं पायसादि नैवेद्यं परिवेष्य । जलेनाभ्युक्ष्य । तुलसीदलेनाच्छाद्य । धेनुमुद्रया अमृती कृत्य । सत्यन्त्वर्तेन परिषिञ्चामि इति प्रातः (ऋतं त्वा सत्येन परिषिञ्चामि) इति सायम् । घंटां वादयेत् । ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्र दातारं तारिषऽ ऊर्जं नो धेहि द्विपदे चतुष्पदे । (सत्पात्र सिद्धं सुहविर्विविधानेकभक्षणम् । निवेदयामि देवेश सानुगाय गृहाणतत् । नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु । इप्सितं मे वरं देहि परत्र च परां गतिम् । शर्कराखण्ड खाद्यानि दधिक्षीर घृतानि च । आहारो भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम्) ॐ भूर्भुवः स्वः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविष्णवे नमः नैवेद्यं निवेदयामि । इति पठित्वा भूतले देव-दक्षिणे जलं क्षिप्त्वा नैवेद्य मुद्रां प्रदर्शयेत् । (अनामामूलयोरंगुष्ठयोगेन नैवेद्यमुद्रा) ततः सपुष्पाभ्यां कराभ्यां भक्ष्यपात्रमुद्धरन् । निवेदयामि भवते जुषाणेदं हविर्हरे । इति मंत्रेण ग्रासमुद्रां प्रदर्श्य वामहस्तेन पद्माभां मुद्रां कृत्वा दक्षिणहस्तेन । ॐ प्राणाय स्वाहा इति (अंगुष्ठ अनामिका कनिष्ठाभिः) प्राणमुद्रां प्रदर्शयेत् ॥१॥ ॐ अपानाय स्वाहा (अंगुष्ठ तर्जनी मध्यमाभिः) इत्यपानमुद्रां प्रदर्शयेत् ॥२॥ ॐ उदानाय स्वाहा (अंगुष्ठ मध्यमानामिकाभिः) इत्युदानमुद्रां प्रदर्शयेत् ॥३॥ ॐ व्यानाय स्वाहा इति (अंगुष्ठ तर्जनी मध्यमानामिकाभिः) व्यान मुद्रां प्रदर्शयेत् ॥४॥ ॐ समानाय स्वाहा इति (सर्वाङ्गुलीभिः) समानमुद्रां प्रदर्शयेत् ॥५॥ [ततः अन्तः पटं दत्वा] ब्रह्मेशाद्यैः परित उरुभिः सूपविष्टैः समेतैर्लक्ष्म्या सिंजद्वयलकरया सादरं बीज्यमानः । नर्मक्ष्वेलीप्रहसनमुखैर्व्याप्नुवन् पंक्ति मध्यं भुंक्ते पात्रे कनकघटिते षड्रसं श्रीरमेशः । शालीभक्तं सुपक्वं शिशिरकरसितं पायसापूपसूपं लेह्यं पेयं च चोष्यं सितममृतललं द्वारिकाद्यं सुखाद्यम् । आज्यं प्राज्यं सभोज्यं नयनरुचिकरं राजिकैलामरी च । स्वादीयः शाकराजी परिकर मममृताहारजोषं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जुषस्व । इति नैवेद्यं समर्प्य ॥३४॥ अथाचमनम् । राधापते श्रीविरजापते प्रभो श्रियः पते सर्वपते च भूपते । कंकोलजातीफलपुष्पवासितं परं गृहाणाचमनं दयानिधे । ॐ भूर्भुवः स्वः विष्णवे नमः नैवेद्यान्ते आचमनीयं समर्पयामि ॥३५॥ अथ जलम् । गंगोत्तरीवेगवलात्समुद्धृतं सुवर्णपात्रेण हिमांशुशीतलम् । सुनिर्मलाभं ह्यमृतोपमं जलं गृहाण राधावर भक्तवत्सल । ॐ भूर्भुवः स्वः श्रीविष्णवे नमः (मध्ये) पानीयं समर्पयामि । ॐ भूर्भुवः स्वः श्रीविष्णवे नमः उत्तरापोशनं समर्पयामि ॥३६॥ अथ करोद्वर्त्तनम् । ॐ अ ᳪ शुना तेऽअᳪ शु पृच्यतां परुषापरुः । गन्धस्ते सोममवतु मादयरसोऽअच्युतः । (चंदनं मलयोद्भूतं कस्तूर्यादि समन्वितम् । करोद्वर्त्तनकं देव गृहाण परमेश्वर) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः करोद्वर्त्तनार्थे चन्दनानुलेपनं समर्पयामि ॥३७॥ अथ हस्तप्रक्षालनम् । गन्ध तोय समानीतं सुवर्णकलशे स्थितम् । हस्तप्रक्षालनार्थाय पानीयं ते निवेदये । ॐ भूर्भुवः स्वः श्रीविष्णवे नमः हस्तप्रक्षालनार्थे जलंसमर्पयामि ॥३८॥ अथ ताम्बूलम् । ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्न्वत । व्वसन्तोस्यासी दाज्यं ग्रीष्मऽइध्मः शरद्धविः । (जातिफलैलासलवंगनागवल्लीदलैः पूगफलैश्च संयुतम् । मुक्तासुधा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खादीरसारयुक्तं गृहाण ताम्बूलमिदं रमेश) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः ताम्बूलपत्रं पूगी फलं च समर्पयामि ॥ ३६ ॥ अथ ऋतुफलम् । ॐ याः फलिनीर्य्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पति प्रसूतास्तानो मुञ्चन्त्व ँ हसः । (इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः ऋतुफलानि समर्पयामि ॥४०॥ (अथ छत्राद्यर्पणम्) "बुद्धिः सवासना क्लृप्ता दर्पणं मंगलानि च । मनोवृत्तिर्विचित्रा ते नृत्य रूपेण कल्पिता ॥१॥ ध्वनयो गीतरूपेण शब्दा वाद्यप्रभेदतः । छत्राणि नव पद्मानि कल्पितानि मया प्रभो ॥२॥ सुषुम्ना ध्वजरूपेण प्राणाद्याश्चामरा मता । अहंकारोंगजत्वेन वेगः क्लृप्तो रथात्मना ॥३॥ इन्द्रियाण्यश्वरूपाणि शब्दादिरथवर्त्मना । मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः ॥४॥ सर्वमन्यत्तथा क्लृप्तं तवोपकरणात्मना" । एवं सार्द्धचतुष्टयश्लोकान् पठित्वा छत्रादि समर्पयेत् । ॐ भूर्भुवः स्वः श्रीविष्णवे नमः छत्रादीन् समर्पयामि । अत्रछत्रादि स्थाने पुष्पाणि क्षिपेत् ॥४१॥ अथ दक्षिणा । ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । सदाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम । (नाकपाल वसुपाल मौलि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भिर्वन्दितांघ्रियुगल प्रभो हरे। दक्षिणां परिगृहाण माधव लोकदक्ष वर दक्षिणा पते) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः दक्षिणां समर्पयामि ॥४२॥ * अथ शेषपूजनम् । एवं दक्षिणान्त विष्णुपूजनं कृत्वा सर्वतोभद्रमण्डलादुत्तरे पीठोपरि तिलादि कृष्णधान्यैर्लिखित सर्पाकारं प्रत्यङ्मुखं कृष्णवर्णं सर्पराजमनन्तं पूजयेत् । तद्यथा । हस्ते पुष्पाक्षतान् गृहीत्वा । ॐ स्योना पृथिवीनोभवान्नृक्षरानिवेशनि । यच्छानः शर्म्म सप्प्रथा । (एह्येहि नागेन्द्र धरामरेश सर्वामरैर्वन्दितपादपद्म । नानाफणा मण्डल राजमान गृहाण पूजां भगवन् नमस्ते।) ॐ भूर्भुवः स्वः अनन्त इहागच्छ इहतिष्ठ । इत्यावाह्य । ॐ मनोजूतिर्जुषतामा-ज्यस्य बृहस्पतिर्यज्ञमिमं तनो त्वरिष्टं यज्ञꣳसमिमं दधातु । विश्वेदेवासऽइहमादयन्तामों २ प्रतिष्ठ । इति प्रतिष्ठाप्य । ॐ भूर्भुवः स्वः अनन्ताय नमः इति मंत्रेण षोडशोपचारैः पूजयेत् । अथ प्रार्थना । नमोस्त्वनंताय सहस्रमूर्तये सहस्र पादाक्षि शिरो-रुबाहवे । सहस्र नाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥१॥ आचरित अनन्त पूजनविधौ यन्न्यूनमतिरिक्तं तत्परिपूर्णमस्तु । अनयापूजया श्रीअनन्तः प्रीयताम् । इति अनन्तपूजा ।* अथार्तिकमंत्रः । ॐ आरात्रि पार्थिवꣳरजः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पितुरप्रायिधामभिः। दिवः सदा ᳪ सि वृहतीव्वितिष्ठ सऽआत्वेषं चर्त्तते तमः ॥१॥ ॐ इद ᳪ हविः प्रजनन्म्मेऽअस्तु दश व्वीरᳪ सर्व्वगण ᳪ स्वस्तये। आत्मसनि प्प्रजासनि पशु सनि लोक-सन्यभय सनि। अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयो रेतोऽ अस्म्मासुधत्त ॥२॥ (कदलीगर्भसंभूतं कर्पूरंतु प्रदीपितम्। आरार्त्तिक महं कुर्वे पश्य मे वरदो भव) ॐ भूर्भुवः स्वः श्री विष्णवे नमः कर्पूरनीराजनं समर्पयामि ॥४३॥ अथ पुष्पाञ्जलि मंत्रः। ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन्। तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१॥ (नाना सुगन्धिपुष्पाणि यथाकालोद्भवानि च। पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर ॥१॥ सेवन्तिकावकुलचम्पक-पाटलाब्जैः पुन्नागजातिकरवीररसालपुष्पैः। विल्वप्रवालतुलसी-दल मंजरीभिस्त्वां पूजयामि जगदीश्वर मे प्रसीद ॥२॥) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः मंत्रपुष्पाञ्जलिं समर्पयामि ॥४४॥ प्रदक्षिणामंत्रः। ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः। तेषा ᳪ सहस्रयोजने वधन्वानि तन्मसि। (यानिकानि च पापानि जन्मान्तर कृतानि च। तानि सर्वाणि नश्यन्ति प्रद-क्षिणपदेपदे। पदे पदेभ्यः परिपूजकेभ्यः सद्योऽश्वमेधादि फलं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ददाति । तां सर्वपापक्षयहेतुभूतां प्रदक्षिणां ते परितः करोमि ।) ॐ भूर्भुवः स्वः श्रीविष्णवे नमः प्रदक्षिणां समर्पयामि ॥४५॥ (प्रणामः) नमः सर्वहितार्थाय जगदाधारहेतवे । साष्टाङ्गोयं प्रणामस्ते दीनत्वेन मयाकृतः ॥४६॥ इति साष्टांगं प्रणम्य विशेषार्घ्यं दद्यात् । ताम्रादिपात्रे जलगन्धाक्षतपुष्पाणि फलंहिरण्यं नारिकेलं च गृहीत्वा जानुभ्यां धरणिं गत्वा । नारायण जगन्नाथ लक्ष्मीकान्त दयानिधे । गृहाणार्घ्यं मयादत्तं यज्ञ संपूर्ति हेतवे । ॐ भूर्भुवः स्वः श्रीविष्णवे नमः विशेषार्घ्यं समर्पयामि ॥४७॥ अथ प्रार्थना । यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवण-मंगलनामधेय । आपन्नलोक वृजिनोपशमोदयाद्य शंनः कृधीश भगवन्नसि दीननाथ ॥१॥ वैकुण्ठ लीलाप्रवरं मनोहरं नमस्कृतं देवगणैः परंवरम् । गोपाल लीलाभियुतं भजाम्यहं गोलोकनाथं शिरसा नमाम्यहम् ॥२॥ गोलोकनाथ गिरिराजपते परेश वृन्दा-वनेश कृतनित्यविहारलील । राधापते व्रजवधूजनगीतकीर्ते गोविन्द गोकुलपते किल ते जयोस्तु ॥३॥ यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम् । निवेदितं च नैवेद्यम् तद् गृहाणानुकम्पया ॥४॥ ज्ञानतोऽज्ञानतो वापि यावद्विधिरनुष्ठितः । स सर्वस्त्व-त्प्रसादेन समग्रो भवतान्मम ॥५॥ आवाहनं न जानामि न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जानामि विसर्जनम्। पूजां चैव न जानामि त्वं गतिः परमेश्वर ॥६॥ हरेमत्समः पातकीनास्तिभूमौ तथा त्वत्समो नास्ति पापापहारी। इति त्वं च मत्वा जगन्नाथदेव यथेच्छा भवेत्ते तथा मां कुरु त्वम् ॥७॥ इति संप्रार्थ्य। श्रीविष्णु पूजन विधौ यन्न्यूनमतिरिक्तं वा तत्सर्वं श्रीमहाविष्णुप्रसादात् परिपूर्णमस्तु। अनया पूजया श्रीविष्णुः प्रीयताम्। कृतैतत् पूजनकर्मणः साङ्गता सिद्ध्यर्थं तन्मध्ये न्यूनातिरिक्तदोष परिहारार्थं यथोत्साहं भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्यदातु महमुत्सृजे। इति संकल्प्य प्रार्थनां कुर्यात्। मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः। सर्वंकरोति निश्छिद्रं नाभसंकीर्तनं तव ॥१॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषुयत्। स्मरणादेव तद्विष्णोः सम्पूर्णस्यादितिश्रुतिः ॥२॥ इति सर्वतोभद्रमण्डल पूजनम्। अथ होमविधानम्। तत्रादौकुशकण्डिका। आचम्य प्राणानायम्य देशकालौ संकीर्त्य। अमुक शर्माऽहं श्रुतिस्मृति पुराणोक्तफलप्राप्त्यर्थं क्षेमैश्वर्यायुरारोग्य चतुर्विधफलप्राप्तये, अस्मिन्नमुकहवन कर्मणि, इदं संपादितं समिच्चरुतिलाज्यादिहविर्द्रव्यं, गणपति, वरुण, वसोर्द्धारा, मातृकाधिप्रत्यधिदेवता सहित सूर्यादि ग्रहेभ्य, पंचलोकपालेभ्य, इन्द्रादिदशदिक्पालेभ्य, सर्वतोभद्रमण्डलस्थ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मादिदेवताभ्य, चतुःषष्टियोगिनिभ्य, एकोनपंचाशद्मरुद्भ्यः द्विपंचाशद् भैरवेभ्यः होमार्थ मुत्सृजे। अथ ब्रह्मवरणम्। यथा देशकालौ संकीर्त्य कर्तव्येस्मिन्मत्संकल्पित (अमुक) होमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकरणाय ब्राह्मणं यथानाम गोत्रं भवन्तं एभिर्वरणद्रव्यैरहं वृणे ॥१॥ इत्युक्ते ॐ वृतोस्मीति प्रतिवचनम्। यथा विहितंकर्मकुरु इति यजमानेनोक्ते। करवाणीति ब्राह्मणो-वदेत्। ततोऽग्नेर्दक्षिणतः परिस्तरणभूमिं त्यक्त्वा वारणादि-यज्ञियदारु निर्मितं ब्रह्मणे आसनं दत्त्वा तदुपरिप्रागग्रान्कुशाना-स्तीर्य ब्रह्माणमग्निप्रदक्षिणक्रमेणाऽऽनीय। अस्मिन्नमुकहवनकर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय तत्र वरणाभरणाभ्यांपूर्वसंपादितं कर्मसुकुशलं ब्राह्मणं (तदभावे पंचाशत्कुश निर्मितं) कल्पयित्वा-सने* उपवेशयेत्। एवमेव आचार्यादीनपि वृणुयात्। (अथवा एक तंत्रेण सर्वाणि वरणानि कृत्वा। ॐ अद्येत्यादि० अस्मिन् कर्मणि एभिर्वरणद्रव्यैः अमुकामुकगोत्रानमुकामुकशर्मणो ब्राह्मणा-नाचार्यादीन्युष्मानहं वृणे। वृताः स्मः। ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्य-माप्यते। इति सर्वे ब्राह्मणाः पठेयुः। अथ यजमानः करसंपुटं कृत्वा सर्वान् ब्राह्मणान् प्रार्थयेत्। अस्मिन्कर्मणि ये ये तु वृता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुरुमुखादयः । सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितम् ॥१॥ अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया । सुप्रसन्नैः प्रकर्तव्यं कर्मेदं विधिपूर्वकम् ॥२॥ यथा विहितं कर्मकुरुध्वम् (इति यजमानः) यथा ज्ञानं करवामः इति ब्राह्मणाः वदेयुः ।) इति आचार्यादि वरणम् । अग्नेरुत्तरतः पश्चिमभागे एकमासनम् १ पूर्वभागे द्वितीयासनम् २ प्रागग्रकुशैः प्रणीतासनद्वयं कल्पयित्वा प्रणीतापात्रं सव्य (वाम) हस्ते कृत्वा दक्षिणहस्तोद्धृतपात्रस्थजलेनापूर्य कुशैराच्छाद्य ब्रह्मणोमुखमवलोक्य पश्चिमासने निधाय आलभ्य पूर्वासने निदध्यात् । ततः परिस्तरणम् । बर्हिषश्चतुर्थभागमादाय चतुर्भिश्चतुर्भिर्दर्भैरुत्तराग्रै राग्नेयादीशानांतं प्राच्याम् ॥ १ ॥ प्रागग्रै र्नैर्ऋत्यादाग्नेय्यान्तं दक्षिणस्याम् ॥२॥ उत्तराग्रै र्नैर्ऋत्याद्वायव्यान्तं प्रतीच्याम् ॥३॥ पुनः पूर्वाग्रै र्वायव्यादीशानान्तं चोदीच्यां परिस्तरेत् ॥४॥ एवं परिस्तरणं कृत्वा। (पात्रासादनम्) ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम् ॥३॥ द्वे २ पवित्रे साग्रे अनन्तगर्भे (पवित्रकरणार्थं पवित्रे साग्रे अनंतर्गर्भे द्वे कुशपत्रे २) प्रोक्षणीपात्रम् १ आज्यस्थाली १ चरुस्थाली १ संमार्जनकुशाः पंच ५ उपयमनकुशाः सप्त ७ समिधतिस्रः पालाश्यः प्रादेशमात्राः ३ स्रुवः खादिरो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हस्तमात्रः १ गव्यमाज्यम् । चर्वर्थाः व्रीहितण्डुलाः । तिलादिहोमद्रव्यम् । षट्पंचाशदधिकमुष्टिशतद्वय परिमितं तण्डुलाद्यन्न पूर्णपात्रम् । यथाशक्तिहिरण्यादि द्रव्यम् । (कर्मोपयोगिनीदक्षिणा "गौर्ब्राह्मणस्यवरः" इत्युक्तोवरो वा) पवित्रच्छेदनकुशानां पूर्वपूर्व दिशिक्रमेणासादनीयम् । (एतानि वस्तूनि अग्नेः पश्चात् प्राक् संस्थानि स्थापयेत्) एवं उपकल्पनीयानि द्रव्याणि तत्रैव निधाय । (पवित्र करणम्) ततः पवित्रच्छेदनकुशैः द्वौ-कुशौ छित्वा पवित्रे सम्पाद्य । तद्यथा । द्वयोः पवित्रयोरुपरि कुशात्रयं निधाय, अग्रतः प्रादेशमात्रं विहाय, द्वौ मूलेन प्रदक्षिणीकृत्य त्रिभिः कुशैः द्वे कुशतरुणे प्रच्छिद्य, द्वयोर्मूलं त्रीणि चोत्तरतः क्षिपेत् । (अत्रपत्र द्वयात्मक मेकमेव पवित्रमितिनिरूपितम्) ततः प्रोक्षणीपात्रं प्रणीतासंनिधौ निधाय तत्र पात्रान्तरेण हस्तेन वा (सपवित्रकरेण) प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय । अनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम् । पवित्रे प्रोक्षणीषु निधाय दक्षिणहस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा१ तदुदकं दक्षिणेनोच्छाल्य (दक्षिण-

१ प्रोक्षणीपात्रस्य सव्यहस्ते करणम् । अनामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिंगनम् । ततः प्रणीतोदकेन प्रोक्षणी प्रोक्षणम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हस्तमुत्तानं कृत्वा मध्यमाऽनामिकाङ्गुल्योः मध्यपर्वभ्यां जलस्योच्छालनं कृत्वा) प्रणीतोदकेन प्रोक्षेदिति प्रोक्षणीसंस्कारः। प्रोक्षणीजलेन आज्यस्थाल्याः प्रोक्षणम् । चरुस्थाल्याः प्रोक्षणम्। संमार्जनकुशानां प्रोक्षणम् । उपयमनकुशानां प्रोक्षणम् । समिध्धां प्रोक्षणम् । स्रुवस्य प्रोक्षणम् । आज्पस्य प्रोक्षणम् । तण्डुलानां प्रोक्षणम् । पूर्णपात्रस्य प्रोक्षणम् । उपकल्पनीयानां पदार्थानां प्रोक्षणम् । असंचरे प्रणीताऽन्योरन्तराले प्रोक्षणीपात्रंनिधाय आसादितमाज्यं पश्चादग्नेर्निहितायामाज्यस्थाल्यां प्रक्षिप्य । चरुस्थाल्यां प्रणीतोदकमासिच्य । आसादितांस्तंडुलान्प्रक्षाल्य तत्रप्रक्षिप्य । तत्राज्पं दक्षिणतः ब्रह्माधिश्रयति । (अग्नेर्दक्षिणतः ब्रह्मा आज्पमधिश्रयति) आज्पस्योत्तरतः स्वयं आचार्यो वा चरुमेव युगपदग्नावारोप्य इषच्छृते चरौ ज्वलदुल्मुकं प्रदक्षिणम् आज्पचर्वोः समंताद्भ्रामयित्वा वह्नौतत्प्रक्षेप इतिपर्यग्निकरणम् । अर्धश्रितेचरौ दक्षिणपाणिना स्रुवमादाय प्रागग्रमधोमुखं अग्नौ त्रिः प्रताप्यः। सव्येपाणौ उर्ध्वमुखं कृत्वा सम्मार्जन कुशाग्रैः मूलतोऽग्रपर्य्यंतं, कुशमूलैरधस्ताद्भागे अग्रमारभ्य मूलपर्य्यंतं सम्मार्ज्य सम्मार्जन कुशान् ईशानकोणे (अग्नौप्रहरेत्) प्रक्षिपेत्। ततः प्रणीतोदकेन स्रुवमभ्युक्ष्य पुनः प्रतप्य कराभ्यां सम्मार्ज्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आत्मनोदक्षिणतः कुशोपरि निदध्यात्। आज्योद्वासनम्। चरु-पूर्वेंणानीयाग्नेरुत्तरतः स्थापयेत्। चरोरुद्वासनम्। अग्नेरुत्तरत एवाज्यं प्रदक्षिणीकृत्य आज्यस्योत्तरतश्चरुं स्थापयेत्। आज्य-मुत्थाप्य चरोः पूर्वेण नीत्वाऽग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यस्थ पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयित्वा आज्य-मग्नेः पश्चादानीय चरुं चानीयाज्यस्योत्तरतो निदध्यात्) अंगु-ष्ठाभ्यामनामिकाभ्यां च धृताभ्यामुदगग्राभ्यां पूर्वपवित्राभ्यामा-ज्यमुत्पूय (उत्क्षिप्य) अवेक्ष्य अपद्रव्य निरसनं कृत्वा प्रोक्ष-णीश्च पूर्वपवित्राभ्यामुत्पूय (उत्क्षिप्य) तासुपवित्र निदध्यात्। उपयमनकुशान् दक्षिणेनादाय वामकरे कृत्वा उतिष्ठन् प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः क्षिपेत्। तत उपविश्य सपवित्रकरेण प्रोक्षण्युदकेन (दक्षिणचुलुकगृहीतेन) ईशानादारभ्य ईशानपर्यन्तं पर्युक्ष्य। पवित्रे प्रणीतापात्रे निधाय दक्षिणंजान्वाच्य ब्रह्मणान्वारब्धः समिद्धतमेग्नौ स्रुवेणाज्याहुती-र्जुहुयात्। तत्राघारादारभ्य तत्तदाहुत्यनन्तरं स्रुवावस्थितहुत-शेषघृतस्य प्रोक्षणीपात्रे प्रक्षेप। इति कुशकण्डिका विधिः। अथ होमः। तत्रादौ साकुल्यप्रमाणम्। चतुर्भागे तिलं कुर्यात् त्रिभागं त्वाज्यमेव च। श्वेतायवा द्विभागाः स्यु स्तदर्द्धं तण्डुलाः स्मृताः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदर्द्धं शर्करा ज्ञेया सुगन्धादि यथेच्छया ॥१॥ अथवा। तिलार्द्धं तन्दुलाः प्रोक्ताः तन्दुलार्द्धं यवास्तथा। यवार्द्धं शर्करा प्रोक्ता आज्यभागचतुष्टयम् ॥२॥ अन्यच्च। यवार्द्धं तन्दुलाः प्रोक्ताः तन्दुलार्द्धं तिलास्तथा। तिलार्द्धं शर्करा प्रोक्ता आज्पभागचतुयम् ॥३॥ इति ॥ (अथहोमः) ॥ आज्येन (अग्नेरुत्तरभागे) ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥१॥ (अग्नेर्दक्षिण भागे) ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम ॥२॥ इत्याघारौ (मध्ये समिद्धतमेऽग्नौ) ॐ अग्नये स्वाहा इदमग्नये न मम ॥३॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥४॥ इत्याज्य भागौ। अथाचार्योऽग्निं संपूज्य वराहुतिं दद्यात्। अथ तिलाज्यचरु पक्कहोमः। (स च अनन्वारब्धकर्तृकः) तत्रादौ सूर्यादिनवग्रहेभ्य श्चरुशाकल्यसहिताऽर्कादि समिधस्तत्तन्मंत्रांते प्रत्येकमष्टाष्टसंख्ययाजुहुयात्। तत्र क्रमः। ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे व्वसो मम। आहमजानि गर्ब्भधमात्वमजासि गर्ब्भधम् स्वाहा। इदं गणपतये न मम ॥१॥ इति सर्वत्र ॥ (ततोर्केण) ॐ आकृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च। हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा। इदं सूर्य्याय न मम ॥१॥ (पालाशैश्च०) ॐ इमं-देवाऽअसपत्न ँ सुवध्वंमहते क्षत्रायमहते ज्ज्यैष्ठ्यायमहते जान-राज्ज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै व्विश एषवोमीराजा सोमोस्माकम्ब्राह्मणाना ँ राजा स्वाहा। इदं चन्द्रमसे न मम ॥२॥ (खादिरेण) ॐ अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम्। अपा ँ रेता ँ सि जिन्न्वति स्वाहा। इदं भौमाय न मम ॥३॥ (अपामार्गेण) ॐ उद्बुध्य-स्वाग्ने प्रतिजागृहीत्वमिष्टापूर्त्ते स ँ सृजेथामयञ्च। अस्मिन्त्स-धस्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं बुधाय न मम ॥४॥ (आश्वत्थेन) ॐ बृहस्पतेऽअतियदर्य्योऽ अर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छ्वसऽऋत प्रजाततद-स्मासु द्रविणन्धेहि चित्र ँ स्वाहा। इदं गुरवे न मम ॥५॥ (शुक्रस्योदुम्बरेण) ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणा व्यपिवत्क्षत्र-म्पयः सोमम्प्रजापतिः। ऋतेन सत्यमिन्द्रियम्विपान ँ शुक्र-मन्धसऽइन्द्रस्येन्द्रियमिदं पयो मृतं मधु स्वाहा। इदं शुक्राय न मम ॥६॥ (शनैश्चरस्य शम्या) ॐ शन्नोदेवीरभिष्टयऽआपो-भवन्तु पीतये। शंय्यो रभिस्रवन्तुनः स्वाहा। इदं शनैश्चराय न मम ॥७॥ (राहोर्दूर्वया) ॐ कयानश्चित्रऽआभुवदूती

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सदावृधः सखा। कया शचिष्ठया वृता स्वाहा। इदं राहवे न मम ॥८॥ (केतोर्दर्भैः) ॐ केतुं कृण्वन्नकेतवे पेशोमर्य्याऽ अपेशसे। समुषद्भिरजायथाः स्वाहा। इदं केतवे न मम ॥९॥ ततोहस्तेन जलमादाय अनेन समिधाहोमेन सूर्य्यादयोग्रहाः प्रीयन्ताम् न मम। इत्युत्सृजेत्। ॐ यथावाण प्रहाराणां कवचं वारणं भवेत्। तद्वद्दैवोपधातानां शान्तिर्भवतु वारणम् ॥१॥ इति यजमानमूर्द्धाभिषेकः समयानुरोधात्। इति ग्रहाणां होमः। अथाधिदेवताहोमः१। (पलाशसमिधा) ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम्। उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात् स्वाहा। इदमीश्वराय न मम ॥१॥ (चरुणा शाकल्येन चा) ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्व्वलोकम्मऽ इषाण स्वाहा। इदमुमायै न मम ॥२॥ ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात्। श्येनस्य पक्षाहरिणस्यबाहू उपस्तुत्यम्महिजातन्तेऽअर्व्वन्स्वाहा। इदं स्कंदाय न मम ॥३॥ ॐ विष्णोरराटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि

१ ईश्वरादिभ्यः पालाश्यः समिधस्तैरेवद्रव्यैः सह चतुश्चतुः संख्यकाभिराहुतिभिर्जुहुयात् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णोर्ध्रुद्वोसि । वैष्णवमसि व्विष्णवे त्वा स्वाहा । इदं विष्णवे न मम ॥४॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेन आवः । सबुध्न्या उपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्च व्विवः स्वाहा । इदं ब्रह्मणे न मम ॥५॥ ॐ सयोषाऽइन्द्रसगणोमरुद्भिः सोमंपिव वृत्रहा शूर विद्वान् । जहि शत्रूँ रपमृधोनुदस्वाथाभयङ् कृणुहि व्विश्वतोनः स्वाहा । इदमिन्द्राय न मम ॥६॥ ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे स्वाहा । इदं यमाय न मम ॥७॥ *उदकोपस्पर्शः* ॐ कार्षिरसि समुद्रस्यत्वाक्षित्याऽउन्नयामि । समापोऽअद्भिरग्मत समोषधीभिरोषधीः स्वाहा । इदं कालाय न मम ॥८॥ *उदकोपस्पर्शः* ॐ चित्रावसो स्वस्ति ते पारमशीय स्वाहा । इदं चित्रगुप्ताय न मम ॥९॥ हस्तेजलमादायानेन होमेन ईश्वराद्यधिदेवताः प्रीयन्तां न मम । (इति

---

* (उदकोपस्पर्श इति) यमोरुद्रश्चपितरः कालोमृत्युश्च पंचमः । पंचक्रूरास्तु यज्ञस्य होमेतच्छान्ति मा चरेत् । तत्क्रूरताद्यातपूर्वं शान्तिमाङ्गल्य सिद्धये । दक्षहस्ताङ्गुलीः पञ्च स्रवं त्यक्त्वा सम्मार्जयेत् । (विधिरग्निपुराणे) अम्भोजमुकुलाकारंदक्षहस्तं निमज्जयेत् । प्रणीताप्सु सुशान्त्यर्थं मनुः स्वायंभुवोऽब्रवीत् । (प्रणीताद्भीः संहताङ्गुली क्षालयेदिति शेषः ।)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जलमुत्सृजेत्) ॐ यथावाणप्रहाराणां कवचं वारणं भवेत्। तद्द्-दैवोप घातानां शान्तिर्भवतु वारणम्। इति यजमानमूर्द्धाभि-षेकः। इति ॥

अथ प्रत्यधिदेवताहोमः। ॐ अग्निन्दूतंपुरोदधे हव्यवाह-मुपब्रुवे। देवाँ२ आस्मदयादिह स्वाहा। इदमग्नये न मम ॥१॥ ॐ अपोऽअद्यान्वचारिषᳬ रसेन समसृक्ष्महि। पयस्वतग्नऽआ-गमन्तम्मा सᳬ सृजवर्च्चसा प्रजया च धनेन स्वाहा। इदमद्भ्यः न मम ॥ २ ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी। यच्छानः शर्म्मसप्रथाः स्वाहा। इदं पृथिव्यै न मम ॥३॥ ॐ इदं विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाᳬ सुरे स्वाहा। इदं विष्णवे न मम ॥४॥ ॐ त्रातारमिन्द्रमवितार-मिन्द्रᳬ हवे हवे सुहवᳬ शूरमिन्द्रम्। ह्वयामि शक्रम्पुरुहूत-मिन्द्रᳬ स्वस्तिनो मघवाधात्विन्द्रः स्वाहा। इद मिंद्राय न मम ॥५॥ ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः पूषासि घर्म्मायदीष्व स्वाहा। इदमिन्द्राण्यै न मम ॥६॥ ॐ प्रजापतेनत्वदेतान्न्यन्यो व्विश्वारूपाणि परिता वभूव। यत्कामास्ते जुहुमस्तन्नोऽअस्तु व्वयᳬ स्यामपतयोरयीणाᳬ स्वाहा। इदं प्रजापतये न मम ॥७॥ ॐ नमोस्तु सर्प्पेभ्यो ये केच पृथिवीमनु। येऽअन्तरिक्षे ये दिवि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेभ्य स्सर्प्पेभ्यो नमः स्वाहा। इदं सर्प्पेभ्यः न मम ॥८॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ता द्विसीमतः सुरुचोव्वेन आवः। सबुध्न्या उपमा अस्यविष्ठाः सतश्च योनिमसतश्चव्विवः स्वाहा। इदं ब्रह्मणे न मम ॥९॥ अनेन होमेन अग्न्यादिप्रत्यधिदेवताः प्रीयन्ताम्। न मम इति जलमुत्सृजेत्। ॐ यथावाणप्रहाराणां कवचं वारणं भवेत्। तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम्। इति यजमान-मूर्द्धाभिषेकः। अथ विनायकादिपंचलोकपालानां होमः१। ॐ गणानान्त्वा गणपतिᳬं हवामहे प्प्रियाणान्त्वा प्प्रियपतिᳬं हवामहे निधीनान्त्वा निधिपतिᳬं हवामहे व्वसोमम। आहम-जानिगर्ब्भधमात्वमजासि गर्ब्भधᳬं स्वाहा। इदं गणपतये न मम ॥१॥ ॐ अम्बेऽअम्बिकेऽम्बालिके नमानयति कश्चन। ससस्त्यश्वकः सुभद्रिकाङ् काम्पीलवासिनीᳬं स्वाहा। इदं दुर्गायै न मम ॥२॥ ॐ आनोनियुद्भिः शतनीभिरध्वरᳬं सह-स्रिणीभिरुपयाहि यज्ञम्। व्वायोऽअस्मिन्त्सवने मादयस्व यूय-म्पात स्वस्तिभिः सदानः स्वाहा। इदं वायवे नमम ॥३॥ ॐ घृतं घृतपावानः पिवतवसाम्वसा पावानः पिवतान्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिशऽआदिशो व्विदिशऽउद्दिशो-

(१) पंचलोकपालेभ्योदशदिक्पालेभ्यश्च द्वे द्वे आहुती जुहुयात् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिग्भ्यः स्वाहा। इदमाकाशाय न मम ॥४॥ ॐ यावाङ्कशामधुमत्पश्विना सूनृतावती। तयायज्ञम्मिमिक्षताᳬ स्वाहा। इदमश्विभ्यां न मम ॥५॥ अनेन होमेन पंचलोकपालाः प्रीयन्ताम् न मम। इति जल मुत्सृजेत्। यथाबाण प्रहाराणां कवचं वारणं भवेत्। तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम्। इति यजमानमूर्द्धाभिषेकः।

अथ दशदिक्पालहोमः। ॐ त्रातारमिन्द्रमवितारमिन्द्रᳬ हवेहवे सुहवᳬ शूरमिन्द्रम्। ह्वयामिशक्रम्पुरुहूतमिन्द्रᳬ स्वस्तिनो मघवाधात्विन्द्रः स्वाहा। इदमिन्द्राय न मम ॥१॥ ॐ त्वन्नोऽ अग्ने तवदेवपायुभिर्म्मघोनोरक्षतन्न्वश्च वन्द्य। त्रातातोकस्य तनये गवामस्य निमेषᳬ रक्षमाणस्तवव्रते स्वाहा। इदमग्नये न मम ॥२॥ ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे स्वाहा। इदं यमाय नमम ॥३॥ (अत्रोदकोपस्पर्शः) ॐ असुन्न्वन्तमयजमानमिच्छस्ते नस्येत्यामन्विहितस्करस्य। अन्न्यमस्मदिच्छसातऽइत्यानमोदेवि निर्ऋते तुभ्यमस्तु स्वाहा। इदं निर्ऋतये न मम ॥४॥ ॐ तत्त्वायामि ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः। अहेडमानो व्वरुणे हवोद्धयुरुशᳬ समान आयुः प्रमोषीः स्वाहा। इदं वरुणाय न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मम ॥५॥ ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम्। व्वायोऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदानः स्वाहा। इदं वायवे न मम ॥६॥ ॐ वयꣳ सोमव्रते तवमनस्तनूषुविभ्रतः। प्रजावन्तः सचे महि स्वाहा। इदं कुबेराय न मम ॥७॥ ॐ तमीशानञ्जगतस्तस्थु षस्पतिं धियञ्जिन्वमवसे हूमहे व्वयम्। पूषानो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये स्वाहा। इदमीशानाय न मम ॥८॥ ॐ अस्मे रुद्रामेहनापर्व्वतासोवृत्रहत्ये भरहूतौ सजोषाः। यः सꣳ सते स्तुवते धायिपज्र इन्द्रज्ज्येष्ठाऽअस्मान् अवन्तुदेवाः स्वाहा। इदं ब्रह्मणे न मम ॥९॥ ॐ स्योनापृथिविनो भवानृक्षरानिवेशनी। यच्छानः सर्म्म सप्रथाः स्वाहा। इदमनन्ताय न मम ॥१०॥ अनेन होमेन इन्द्रादयोदिक्पालदेवताः प्रीयन्ताम् न मम। ॐ यथावाणप्रहाराणां कवचं वारणं भवेत्। तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम् ॥१॥ इति यजमानमूर्द्धाभिषेकः। इति दिक्पालहोमः ॥

अथ पितामहादीनामैकैकाहुत्या नाममंत्रेण होमः। ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम ॥१॥ ॐ विष्णवे स्वाहा। इदं विष्णवे न मम ॥२॥ ॐ शिवाय स्वाहा। इदं शिवाय न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मम ॥३॥ ॐ गणपतये स्वाहा। इदं गणपतये न मम ॥४॥ ॐ लक्ष्म्यै स्वाहा। इदं लक्ष्म्यै न मम ॥५॥ ॐ सरस्वत्यै स्वाहा। इदं सरस्वत्यै न मम ॥६॥ ॐ दुर्गायै स्वाहा। इदं दुर्गायै न मम ॥७॥ ॐ क्षेत्रपालाय स्वाहा। इदं क्षेत्रपालाय न मम ॥८॥ ॐ भूतेभ्यः स्वाहा। इदं भूतेभ्यः न मम ॥९॥ ॐ वास्तोष्पतये स्वाहा। इदं वास्तोष्पतये न मम ॥१०॥ ॐ विश्वकर्मणे स्वाहा। इदं विश्वकर्मणे न मम ॥११॥ अनेन होमेन पितामहादिदेवताः प्रीयन्ताम् न मम। ॐ यथावाणप्रहाराणां कवचं वारणं भवेत्। तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम् ॥१॥ इति यजमानमूर्द्धाभिषेकः। इति ग्रहमण्डलदेवताहोमः ॥

अथ गौर्यादि होमः॥ ॐ गणपतये स्वाहा। इदं गणपतये न मम ॥१॥ ॐ गौर्यैः स्वाहा। इदं गौर्यै न मम ॥२॥ ॐ पद्मायै स्वाहा। इदं पद्मायै न मम ॥३॥ ॐ शच्यै स्वाहा। इदं शच्यै न मम ॥४॥ ॐ मेधायै स्वाहा। इदं मेधायै न मम ॥५॥ ॐ सावित्र्यै स्वाहा। इदं सावित्र्यै न मम ॥६॥ ॐ विजयायै स्वाहा। इदं विजयायै न मम ॥७॥ ॐ जयायै स्वाहा। इदं जयायै न मम ॥८॥ ॐ देवसेनायै स्वाहा। इदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवसेनायै न मम ॥९॥ ॐ स्वधायै स्वाहा। इदं स्वधायै न मम ॥१०॥ ॐ स्वाहायै स्वाहा। इदं स्वाहायै न मम ॥११॥ ॐ मात्रे स्वाहा। इदं मात्रे न मम ॥१२॥ ॐ लोकमातृभ्यः स्वाहा। इदं लोकमातृभ्यः न मम ॥१३॥ ॐ धृत्यै स्वाहा। इदं धृत्यै न मम ॥१४॥ ॐ पुष्ट्यै स्वाहा। इदं पुष्ट्यै न मम ॥१५॥ ॐ तुष्ट्यै स्वाहा। इदं तुष्ट्यै न मम ॥१६॥ ॐ आत्मनः कुलदेव्यै स्वाहा। इदं आत्मनः कुलदेव्यै न मम ॥१७॥ गौर्य्यादिषोडशमातृप्रीतये यत्कृतं तद्भगवतीप्रसादात्परिपूर्णमस्तु। अनेन होमेन श्रीगणपति सहित गौर्य्यादिषोडशमातरः सुप्रीताः सत्या वरदा भवन्तु। ॐ यथाबाणप्रहाराणां कवचं वारणं भवेत्। तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम् ॥१॥ इति यजमानमूर्द्धाभिषेकः समयानुरोधात्। इति गौर्यादिमातृकाहोमः ॥

अथ वसोर्धाराहोमः। ॐ श्रियै स्वाहा। इदं श्रियै न मम ॥१॥ ॐ लक्ष्म्यै स्वाहा। इदं लक्ष्म्यै न मम ॥२॥ ॐ धृत्यै स्वाहा। इदं धृत्यै न मम ॥३॥ ॐ मेधायै स्वाहा। इदं मेधायै न मम ॥४॥ ॐ स्वाहायै स्वाहा। इदं स्वाहायै न मम ॥५॥ ॐ प्रज्ञायै स्वाहा। इदं प्रज्ञायै न मम ॥६॥ ॐ सर-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वत्यै स्वाहा । इदं सरस्वत्यै न मम ॥७॥ श्रियादिघृतमातृ-प्रीतये यत्कृतं तद्भगवतीप्रसादात्परिपूर्णमस्तु । अनेन होमेन श्रियादिघृतमातरः सुप्रीताः सत्या वरदा भवन्तु । ॐ यथाबाणप्रहाराणां कवचं वारणं भवेत् । तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम् ॥१॥ इति यजमानमूर्द्धाभिषेकः समयानुरोधात् । इति वसोर्धाराहोमः ॥

अथ योगिनीहोमः । ॐ दिव्ययोगिन्यै स्वाहा । इदं दिव्ययोगिन्यै न मम ॥१॥ ॐ महायोगिन्यै स्वाहा। इदं महा-योगिन्यै न मम ॥२॥ ॐ सिद्धयोगिन्यै स्वाहा । इदं सिद्ध-योगिन्यै न मम ॥३॥ ॐ माहेश्वर्यै स्वाहा । इदं माहेश्वर्यै न मम ॥४॥ ॐ प्रेताक्ष्यै स्वाहा । इदं प्रेताक्ष्यै न मम ॥५॥ ॐ डाकिन्यै स्वाहा । इदं डाकिन्यै न मम ॥६॥ ॐ काल्यै स्वाहा । इदं काल्यै न मम ॥७॥ ॐ कालरात्र्यै स्वाहा । इदं इदं कालरात्र्यै न मम ॥८॥ ॐ निशाकर्यै स्वाहा। इदं निशा-कर्यै न मम॥९॥ ॐ हुंकार्यै स्वाहा। इदं हुंकार्यै न मम ।१०। ॐ सिद्धवेताल्यै स्वाहा । इदं सिद्धवेताल्यै न मम ॥ ११ ॥ ॐ ह्रींकार्यै स्वाहा । इदं ह्रींकार्यै न मम ॥ १२ ॥ ॐ भूत डामरायै स्वाहा । इदं भूत डामरायै न मम ॥१३॥ ॐ ऊर्ध्व-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

केश्यै स्वाहा। इदं ऊर्ध्वकेश्यै न मम ॥१४॥ ॐ विरूपाक्ष्यै स्वाहा। इदं विरूपाक्ष्यै न मम ॥१५॥ ॐ शुष्कांग्यै स्वाहा। इदं शुष्कांग्यै न मम ॥१६॥ ॐ नरभोजनायै स्वाहा। इदं नरभोजनायै न मम ॥१७॥ ॐ फूत्कार्यै स्वाहा। इदं फूत्कार्यै न मम ॥१८॥ ॐ वीरभद्रायै स्वाहा। इदं वीरभद्रायै न मम ॥१९॥ ॐ धूम्राक्ष्यै स्वाहा। इदं धूम्राक्ष्यै न मम ॥२०॥ ॐ कलहप्रियायै स्वाहा। इदं कलहप्रियायै न मम ॥२१॥ ॐ राक्षस्यै स्वाहा। इदं राक्षस्यै न मम ॥२२॥ ॐ घोररक्ताक्ष्यै स्वाहा। इदं घोररक्ताक्ष्यै न मम ॥२३॥ ॐ विशालाक्ष्यै स्वाहा। इदं विशालाक्ष्यै न मम ॥२४॥ ॐ कौमार्यै स्वाहा। इदं कौमार्यै न मम ॥२५॥ ॐ चण्ड्यै स्वाहा। इदं चण्ड्यै न मम ॥२६॥ ॐ वाराह्यै स्वाहा। इदं वाराह्यै न मम ॥२७॥ ॐ मुण्डधारिण्यै स्वाहा। इदं मुण्डधारिण्यै न मम ॥२८॥ ॐ ॐ भैरव्यै स्वाहा। इदं भैरव्यै न मम ॥२९॥ ॐ वीरायै स्वाहा। इदं वीरायै न मम ॥३०॥ ॐ भयङ्कर्यै स्वाहा। इदं भयङ्कर्यै न मम ॥३१॥ ॐ वज्रधारिण्यै स्वाहा। इदं वज्रधारिण्यै न मम ॥३२॥ ॐ क्रोधायै स्वाहा। इदं क्रोधायै न मम ॥३३॥ ॐ दुर्मुख्यै स्वाहा। इदं दुर्मुख्यै न मम ॥३४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ प्रेतवाहिन्यै स्वाहा। इदं प्रेतवाहिन्यै न मम ॥३५॥ ॐ कर्कायै स्वाहा। इदं कर्कायै न मम ॥३६॥ ॐ दीर्घलम्बोष्ठ्यै स्वाहा। इदं दीर्घलम्बोष्ठ्यै न मम॥३७॥ ॐ मालिन्यै स्वाहा। इदं मालिन्यै न मम ॥३८॥ ॐ मंत्र योगिन्यै स्वाहा। इदं मंत्र योगिन्यै न मम ॥३९॥ ॐ कालाग्न्यै स्वाहा इदं कालाग्न्यै न मम ॥४०॥ ॐ मोहिन्यै स्वाहा। इदं मोहिन्यै न मम ॥४१॥ ॐ चक्रायै स्वाहा। इदं चक्रायै न मम ॥४२॥ ॐ कुण्डलिन्यै स्वाहा। इदं कुंड-लिन्यै न मम ॥४३॥ ॐ बालुकायै स्वाहा। इदं बालुकायै न मम॥४४॥ ॐ कौबेर्यै स्वाहा। इदं कौबेर्यै न मम ॥४५॥ ॐ यमदूत्यै स्वाहा। इदं यमदूत्यै न मम ॥४६॥ ॐ करा-लिन्यै स्वाहा। इदं करालिन्यै न मम॥४७॥ ॐ कौशिकायै स्वाहा इदं कौशिकायै न मम ॥४८॥ ॐ यक्षिण्यै स्वाहा। इदं यक्षिण्यै न मम ॥४९॥ ॐ भक्षिण्यै स्वाहा। इदं भक्षिण्यै न मम ॥५०॥ ॐ कौमार्यै स्वाहा। इदं कौमार्यै न मम ॥५१॥ ॐ मंत्रवाहिन्यै स्वाहा। इदं मंत्रवाहिन्यै न मम ॥५२॥ ॐ विशालायै स्वाहा। इदं विशालायै न मम ॥५३॥ ॐ कार्मुक्यै स्वाहा। इदं कार्मुक्यै न मम ॥५४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ व्याग्घ्रयै स्वाहा। इदं व्याग्घ्रयै न मम ॥५५॥ ॐ महाराक्षस्यै स्वाहा। इदं महाराक्षस्यै न मम ॥५६॥ ॐ प्रेतभक्षिण्यै स्वाहा। इदं प्रेतभक्षिण्यै न मम ॥५७॥ ॐ धूर्जटायै स्वाहा। इदं धूर्जटायै न मम ॥५८॥ ॐ विकटायै स्वाहा। इदं विकटायै न मम ॥५९॥ ॐ घोररूपायै स्वाहा। इदं घोररूपायै न मम ॥६०॥ ॐ कपालिकायै स्वाहा। इदं कपालिकायै न मम ॥६१॥ ॐ निकलायै स्वाहा। इदं निकलायै न मम ॥६२॥ ॐ अमलायै स्वाहा। इदं अमलायै न मम ॥६३॥ ॐ सिद्धिप्रदायै स्वाहा। इदं सिद्धिप्रदायै न मम ॥६४॥ हस्तेजलमादाय, अनेन होमेन चतुः षष्टियोगिन्यः प्रीयन्ताम्। ॐ यथावाणप्रहाराणां कवचं वारणं भवेत्। तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम् ॥१॥ इति यजमानमूर्द्धाभिषेकः। इति योगिनीहोमः ॥

अथ क्षेत्रपालानां होमः। ॐ अजराय स्वाहा। इदं अजराय न मम ॥१॥ ॐ व्यापकाय स्वाहा। इदं व्यापकाय न मम ॥२॥ ॐ इन्द्रचौराय स्वाहा। इदं इन्द्रचौराय न मम ॥३॥ ॐ इन्द्रमूर्तये स्वाहा। इदं इन्द्रमूर्तये न मम ॥४॥ ॐ उक्षाभिधाय स्वाहा। इदं उक्षाभिधाय न मम ॥५॥ ॐ कूष्मा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ण्डाय स्वाहा। इदं कूष्माण्डाय न मम ॥६॥ ॐ वारुणाय स्वाहा। इदं वारुणाय न मम ॥७॥ ॐ बाहुकाख्याय स्वाहा। इदं बाहुकाख्याय न मम ॥८॥ ॐ विमुक्ताय स्वाहा। इदं विमुक्ताय न मम ॥९॥ ॐ लिप्तकाय स्वाहा। इदं लिप्तकाय न मम ॥१०॥ ॐ लीलाकाय स्वाहा। इदं लीलाकाय न मम ॥११॥ ॐ एकदंष्ट्राय स्वाहा। इदं एकदंष्ट्राय न मम ॥१२॥ ॐ ऐरावताख्याय स्वाहा। इदं ऐरावताख्याय न मम ॥१३॥ ॐ ओषधीघ्नाय स्वाहा। इदं ओषधीघ्नाय न मम ॥१४॥ ॐ बन्धनाख्याय स्वाहा। इदं बन्धनाख्याय न मम ॥१५॥ ॐ दिव्यकायाय स्वाहा। इदं दिव्यकायाय न मम ॥१६॥ ॐ कम्बलाख्याय स्वाहा। इदं कम्बलाख्याय न मम ॥१७॥ ॐ क्षोभणाय स्वाहा। इदं क्षोभणाय न मम ॥१८॥ ॐ गवये स्वाहा। इदं गवये न मम ॥१९॥ ॐ घंटाभेधाय स्वाहा। इदं घंटाभेधाय न मम ॥ २० ॥ ॐ व्यालाय स्वाहा। इदं व्यालाय न ममं ॥२१॥ ॐ अणुस्वरूपाय स्वाहा। इदं अणुस्वरूपाय न मम ॥२२॥ ॐ चन्द्रवारुणाय स्वाहा। इदं चन्द्रवारुणाय न मम ॥२३॥ ॐ फटाटोपाय स्वाहा। इदं फटाटोपाय न मम ॥२४॥ ॐ जटालाय स्वाहा। इदं जटालाय न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मम ॥२५॥ ॐ क्रतवे स्वाहा । इदं क्रतवे न मम ॥२६॥ ॐ घण्टेश्वराय स्वाहा । इदं घण्टेश्वराय न मम ॥२७॥ ॐ विटंकाय स्वाहा । इदं विटंकाय न मम ॥२८॥ ॐ मणिमतये स्वाहा। इदं मणिमतये न मम ॥२९॥ ॐ गणबन्धाय स्वाहा। इदं गणबन्धाय न मम ॥३०॥ ॐ डामराय स्वाहा । इदं डामराय न मम ॥३१॥ ॐ ढुण्ढिकर्णाय स्वाहा । इदं ढुण्ढिकर्णाय न मम ॥३२॥ ॐ स्थविराय स्वाहा । इदं स्थविराय न मम ॥३३॥ ॐ दन्तुराय स्वाहा । इदं दन्तुराय न मम ॥३४॥ ॐ धनदाय स्वाहा । इदं धनदाय न मम ॥३५॥ ॐ नागकर्णाय स्वाहा । इदं नागकर्णाय न मम ॥३६॥ ॐ मारीगणाय स्वाहा। इदं मारीगणाय न मम ॥३७॥ ॐ फेत्काराय स्वाहा। इदं फेत्काराय न मम ॥३८॥ ॐ चीकराय स्वाहा । इदं चीकराय न मम ॥३९॥ ॐ सिंहाकृतये स्वाहा । इदं सिंहाकृतये न मम ॥४०॥ ॐ मृगाय स्वाहा । इदं मृगाय न मम ॥४१॥ ॐ यक्षमप्रियाय स्वाहा । इदं यक्षमप्रियाय न मम ॥४२॥ ॐ मेघवाहनाय स्वाहा । इदं मेघवाहनाय न मम ॥४३॥ ॐ तीक्ष्णोष्ट्राय स्वाहा । इदं तीक्ष्णोष्ट्राय न मम ॥४४॥ ॐ अनलाय स्वाहा । इदं अनलाय न मम ॥४५॥ ॐ शुक्रतुण्डाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा । इदं शुक्रतुण्डाय न मम ।।४६।। ॐ अन्तरिक्षाय स्वाहा । इदं अन्तरिक्षाय न मम ।।४७।। ॐ वर्वरकाय स्वाहा। इदं वर्वरकाय न मम ।।४८।। (ॐ क्षेत्रपालाय स्वाहा । इदं क्षेत्रपालाय न मम ।।४६।। ॐ कपालभैरवाय स्वाहा । इदं कपालभैरवाय न मम ।।५०।। ॐ वटुकभैरवाय स्वाहा। इदं वटुक-भैरवाय न मम ।।५१।।) ॐ पावनाय स्वाहा । इदं पावनाय न मम ।।५२।। अनेन होमेन अजरादिपावनान्तक्षेत्रपालाः प्रीयन्ताम् । इति जल मुत्सृजेत् । यथाबाणप्रहाराणां कवचं वारणं भवेत् । तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम् ।।१।। इति यजमानमूर्द्धाभिषेकः । इति क्षेत्रपालहोमः ।

अथ एकोनपंचाशत्मरुद्गणानांहोमः । ॐ एकज्योतये स्वाहा । इदं एकज्योतये न मम ।।१।। ॐ द्विज्योंतये स्वाहा । इदं द्विज्योंतये न मम ।।२।। ॐ त्रिज्योंतये स्वाहा । इदं त्रि-ज्योंतये न मम ।।३।। ॐ चतुर्ज्योंतये स्वाहा । इदं चतुर्ज्योंतये न मम ।।४।। ॐ एकशक्राय स्वाहा । इदं एकशक्राय न मम ।।५।। ॐ द्विशक्राय स्वाहा । इदं द्विशक्राय न मम ।।६।। ॐ त्रिशक्राय स्वाहा । इदं त्रिशक्राय न मम ।।७।। ॐ इन्द्राय स्वाहा । इदं इन्द्राय न मम ।।८।। ॐ गन्याय स्वाहा । इदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गव्याय न मम ।।६।। ॐ दृश्याय स्वाहा । इदं दृश्याय न मम ।।१०।। ॐ प्रतिशिरसे स्वाहा । इदं प्रतिशिरसे न मम ।।११।। ॐ मिताय स्वाहा । इदं मिताय न मम ।।१२।। ॐ सम्मिताय स्वाहा । इदं सम्मिताय न मम ।।१३।। ॐ अमिताय स्वाहा । इदं अमिताय न मम ।।१४।। ॐ ऋतजिते स्वाहा । इदं ऋतजिते न मम ।।१५।। ॐ सत्यजिते स्वाहा । इदं सत्यजिते न मम ।।१६।। ॐ सुषेणाय स्वाहा । इदं सुषेणाय न मम ।।१७।। ॐ सेनजिते स्वाहा । इदं सेनजिते न मम ।।१८।। ॐ अतिमित्राय स्वाहा । इदं अतिमित्राय न मम ।।१६।। ॐ नामित्राय स्वाहा । इदं नामित्राय न मम ।।२०।। ॐ पुरुमित्राय स्वाहा । इदं पुरुमित्राय न मम ।।२१।। ॐ ऋतये स्वाहा । इदं ऋतये न मम ।।२२।। ॐ ऋतवते स्वाहा । इदं ऋतवते न मम ।।२३।। ॐ धात्रे स्वाहा । इदं धात्रे न मम ।।२४।। ॐ ॐ विधात्रे स्वाहा । इदं विधात्रे न मम ।।२५।। ॐ धरणाय स्वाहा । इदं धरणाय न मम ।।२६।। ॐ ध्रुवाय स्वाहा । इदं ध्रुवाय न मम ।।२७।। ॐ विधारणाय स्वाहा । इदं विधारणाय न मम ।।२८।। ॐ इदृक्षाय स्वाहा । इदं इदृक्षाय न मम ।२६। ॐ सदृक्षाय स्वाहा । इदं सदृक्षाय न मम ।।३०।। ॐ एतादृशे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा। इदं एतादृशे न मम ॥३१॥ ॐ अमृताय स्वाहा। इदं अमृताय न मम ॥३२॥ ॐ क्रीतनाय स्वाहा। इदं क्रीतनाय न मम ॥३३॥ ॐ प्रसदृक्षाय स्वाहा। इदं प्रसदृक्षाय न मम ॥३४॥ ॐ सरभाय स्वाहा। इदं सरभाय न मम ॥३५॥ ॐ धर्त्रे स्वाहा। इदं धर्त्रे न मम ॥३६॥ ॐ दुर्गाय स्वाहा। इदं दुर्गाय न मम ॥३७॥ ॐ ध्वनये स्वाहा। इदं ध्वनये न मम ॥३८॥ ॐ भीमाय स्वाहा। इदं भीमाय न मम ॥३९॥ ॐ अभियुक्तये स्वाहा। इदं अभियुक्तये न मम ॥४०॥ ॐ कृपाय स्वाहा। इदं कृपाय न मम ॥४१॥ ॐ सहाय स्वाहा। इदं सहाय न मम ॥४२॥ ॐ द्युतये स्वाहा। इदं द्युतये न मम ॥४३॥ ॐ वपुषे स्वाहा। इदं वपुषे न मम ॥४४॥ ॐ ॐ अनादृश्याय स्वाहा। इदं अनादृश्याय न मम ॥४५॥ ॐ वासाय स्वाहा। इदं वासाय न मम ॥४६॥ ॐ कामाय स्वाहा। इदं कामाय न मम ॥४७॥ ॐ जयाय स्वाहा। इदं जयाय न मम ॥४८॥ ॐ विराजे स्वाहा। इदं विराजे न मम ॥४९॥ अनेन होमेन एकोनपंचाशत्मरुद्गणाः प्रीयन्ताम्। (इति जलमुत्सृजेत्) यथाबाणप्रहाराणां कवचं वारणं भवेत्। तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम् ॥१॥ इति यजमानमूर्द्धाभिषेकः। इति मरुद्गणहोमः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ सर्वतोभद्रमण्डल देवता होमः। ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे न मम ॥१॥ ॐ सोमाय स्वाहा। इदं सोमाय न मम ॥२॥ ॐ ईशानाय स्वाहा। इदं ईशानाय न मम ॥३॥ ॐ इन्द्राय स्वाहा। इदं इन्द्राय न मम ॥४॥ ॐ अग्नये स्वाहा। इदं अग्नये न मम ॥५॥ ॐ यमाय स्वाहा। इदं यमाय न मम ॥६॥ ॐ निर्ऋतये स्वाहा। इदं निर्ऋतये न मम ॥७॥ ॐ वरुणाय स्वाहा। इदं वरुणाय न मम ॥८॥ ॐ वायवे स्वाहा। इदं वायवे न मम ॥९॥ ॐ ध्रुवाय स्वाहा। इदं ध्रुवाय न मम ॥१०॥ ॐ धराय स्वाहा। इदं धराय न मम ॥११॥ ॐ सोमाय स्वाहा। इदं सोमाय न मम ॥१२॥ ॐ आपवत्साय स्वाहा। इदं आपवत्साय न मम ॥१३॥ ॐ अनिलाय स्वाहा। इदं अनिलाय न मम ॥१४॥ ॐ नलाय स्वाहा। इदं नलाय न मम ॥१५॥ ॐ प्रत्यूषाय स्वाहा। इदं प्रत्यूषाय न मम ॥१६॥ ॐ प्रभाषाय स्वाहा। इदं प्रभाषाय न मम ॥१७॥ ॐ वीरभद्राय स्वाहा। इदं वीरभद्राय न मम ॥१८॥ ॐ शंभवे स्वाहा। इदं शंभवे न मम ॥१९॥ ॐ गिरीशाय स्वाहा। इदं गिरीशाय न मम ॥२०॥ ॐ अजैकपदे स्वाहा। इदं अजैकपदे न मम ॥२१॥ ॐ अविर्बुध्न्याय स्वाहा। इदं अवि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बुध्न्याय न मम ॥२२॥ ॐ पिनाकिने स्वाहा । इदं पिनाकिने न मम ॥२३॥ ॐ अपराजिताय स्वाहा । इदं अपराजिताय न मम ॥२४॥ ॐ भुवनाधीश्वराय स्वाहा । इदं भुवनाधीश्वराय न मम ॥२५॥ ॐ कपालिने स्वाहा । इदं कपालिने न मम ॥२६॥ ॐ स्थाणवे स्वाहा । इदं स्थाणवे न मम ॥२७॥ ॐ भगाय स्वाहा । इदं भगाय न मम ॥२८॥ ॐ धात्रे स्वाहा । इदं धात्रे न मम ॥२९॥ ॐ अर्य्यमणे स्वाहा । इदं अर्य्यमणे न मम ॥३०॥ ॐ मित्राय स्वाहा । इदं मित्राय न मम ।३१। ॐ रुद्राय स्वाहा । इदं रुद्राय न मम ॥३२॥ ॐ वरुणाय स्वाहा । इदं वरुणाय न मम ॥३३॥ ॐ सूर्याय स्वाहा । इदं सूर्याय न मम ॥३४॥ ॐ भगाय स्वाहा । इदं भगाय न मम ॥३५॥ ॐ विवस्वते स्वाहा । इदं विवस्वते न मम ॥३६॥ ॐ पूष्णे स्वाहा । इदं पूष्णे न मम ॥३७॥ ॐ सवित्रे स्वाहा । इदं सवित्रे न मम ॥३८॥ ॐ त्वष्ट्रे स्वाहा । इदं त्वष्ट्रे न मम ॥३९॥ ॐ विष्णवे स्वाहा । इदं विष्णवे न मम ॥४०॥ ॐ अश्विभ्यां स्वाहा । इदं अश्विभ्यां न मम ॥४१॥ ॐ क्रतवे स्वाहा । इदं क्रतवे न मम ॥४२॥ ॐ दक्षाय स्वाहा । इदं दक्षाय न मम ॥४३॥ ॐ वसवे स्वाहा । इदं वसवे न मम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥४४॥ ॐ सत्याय स्वाहा। इदं सत्याय न मम ॥४५॥ ॐ कालाय स्वाहा। इदं कालाय न मम ॥४६॥ ॐ कामाय स्वाहा। इदं कामाय न मम ॥४७॥ ॐ अध्वराय स्वाहा। इदं अध्वराय न मम ॥४८॥ ॐ रोचनाय स्वाहा। इदं रोचनाय न मम ॥४९॥ ॐ पुरूरवसे स्वाहा। इदं पुरूरवसे न मम ॥५०॥ ॐ आद्रवाय स्वाहा। इदं आद्रवाय न मम ॥५१॥ ॐ सोमा-याय स्वाहा। इदं सोमायाय न मम ॥५२॥ ॐ अग्निष्वात्ताय स्वाहा। इदं अग्निष्वात्ताय न मम ॥५३॥ ॐ बर्हिषदे स्वाहा। इदं बर्हिषदे न मम ॥५४॥ ॐ सुकालाय स्वाहा। इदं सुका-लाय न मम ॥५५॥ ॐ एकशृंगाय स्वाहा। इदं एकशृंगाय न मम ॥५६॥ ॐ शूद्राय स्वाहा। इदं शूद्राय न मम ॥५७॥ ॐ सोमाय स्वाहा। इदं सोमाय न मम ॥५८॥ ॐ साध्येभ्यः स्वाहा। इदं साध्येभ्यो न मम ॥५९॥ ॐ यक्षेभ्यः स्वाहा। इदं यक्षेभ्यः न मम ॥६०॥ ॐ भूतेभ्यः स्वाहा। इदं भूतेभ्यः न मम ॥६१॥ ॐ पिशाचेभ्यः स्वाहा। इदं पिशाचेभ्यः न मम ॥६२॥ ॐ गुह्यकेभ्यः स्वाहा। इदं गुह्यकेभ्यः न मम ।६३। ॐ सिद्धेभ्यः स्वाहा। इदं सिद्धेभ्यः न मम ॥६४॥ ॐ सर्पेभ्यः स्वाहा। इदं सर्पेभ्यः न मम ॥६५॥ ॐ अनंताय स्वाहा। इदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनंताय न मम ॥६६॥ ॐ वासुकये स्वाहा । इदं वासुकये न मम ॥६७॥ ॐ शेषाय स्वाहा । इदं शेषाय न मम ॥६८॥ ॐ तक्षकाय स्वाहा । इदं तक्षकाय न मम ॥६९॥ ॐ कर्कोटकाय स्वाहा । इदं कर्कोटकाय न मम ॥७०॥ ॐ पद्माय स्वाहा । इदं पद्माय न मम ॥७१॥ ॐ महापद्माय स्वाहा । इदं महापद्माय न मम ॥७२॥ ॐ शंखपालाय स्वाहा। इदं शंखपालाय न मम ॥७३॥ ॐ कंबलाय स्वाहा। इदं कंबलाय न मम ॥७४॥ ॐ गंधर्वेभ्य स्वाहा । इदं गंधर्वेभ्यः न मम ॥७५॥ ॐ हाहै स्वाहा । इदं हाहै न मम ॥७६॥ ॐ हूहै स्वाहा । इदं हूहै न मम ॥७७॥ ॐ घृताच्यै स्वाहा । इदं घृताच्यै न मम ॥७८॥ ॐ मेनकायै स्वाहा । इदं मेनकायै न मम ॥७९॥ ॐ रंभायै स्वाहा। इदं रंभायै न मम॥८०॥ ॐ उर्वश्यै स्वाहा। इदं उर्वश्यै न मम ॥८१॥ ॐ तिलोत्तमायै स्वाहा। इदं तिलोत्तमायै न मम ॥८२॥ ॐ सुकेश्यै स्वाहा । इदं सुकेश्यै न मम ॥८३॥ ॐ मंजुघोषायै स्वाहा । इदं मंजुघोषायै न मम ॥८४॥ ॐ स्कंदाय स्वाहा । इदं स्कंदाय न मम ॥८५॥ ॐ नंदीश्वराय स्वाहा । इदं नंदीश्वराय न मम ॥८६॥ ॐ शूलाय स्वाहा । इदं शूलाय न मम ॥८७॥ ॐ महाकालाय स्वाहा ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदं महाकालाय न मम ॥८८॥ ॐ दक्षादि प्रजापतिभ्यः स्वाहा। इदं दक्षादि प्रजापतिभ्यः न मम ॥८९॥ ॐ दुर्गायै स्वाहा। इदं दुर्गायै न मम ॥९०॥ ॐ विष्णवे स्वाहा। इदं विष्णवे न मम ॥९१॥ ॐ स्वधायै स्वाहा। इदं स्वधायै न मम ॥९२॥ ॐ मृत्युरोगेभ्यः स्वाहा। इदं मृत्युरोगेभ्यः न मम ॥९३॥ ॐ गणपतये स्वाहा। इदं गणपतये न मम ॥९४॥ ॐ पितृभ्यः स्वाहा। इदं पितृभ्यः न मम ॥९५॥ ॐ अद्भ्यः स्वाहा। इदं अद्भ्यः न मम ॥९६॥ ॐ मरुद्भ्यः स्वाहा। इदं मरुद्भ्यः न मम ॥९७॥ ॐ समीराय स्वाहा। इदं समीराय न मम ।९८। ॐ मारुताय स्वाहा। इदं मारुताय न मम ॥९९॥ ॐ मरुते स्वाहा। इदं मरुते न मम ॥१००॥ ॐ जगत्प्राणाय स्वाहा। इदं जगत्प्राणाय न मम ॥१०१॥ ॐ समीरणाय स्वाहा। इदं समीरणाय न मम ॥१०२॥ ॐ मातरिश्वने स्वाहा। इदं मातरिश्वने न मम ॥१०३॥ ॐ आवहाय स्वाहा। इदं आवहाय न मम ॥१०४॥ ॐ प्रवहाय स्वाहा। इदं प्रवहाय न मम ॥१०५॥ ॐ उद्वहाय स्वाहा। इदं उद्वहाय न मम ॥१०६॥ ॐ वहाय स्वाहा। इदं वहाय न मम ॥१०७॥ ॐ विवहाय स्वाहा। इदं विवहाय न मम ॥१०८॥ ॐ परावहाय स्वाहा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदं परावहाय न मम ॥१०६॥ ॐ परिवहाय स्वाहा । इदं परिवहाय न मम ॥११०॥ ॐ पृथिव्यै स्वाहा । इदं पृथिव्यै न मम ॥१११॥ ॐ गंगायै स्वाहा । इदं गंगायै न मम ॥११२॥ ॐ सरस्वत्यै स्वाहा । इदं सरस्वत्यै न मम ॥११३॥ ॐ सरय्वै स्वाहा । इदं सरय्वै न मम ॥११४॥ ॐ कौशिक्यै स्वाहा । इदं कौशिक्यै न मम ॥११५॥ ॐ वेत्रवत्यै स्वाहा । इदं वेत्रवत्यै न मम॥११६॥ ॐ गोदावर्य्यै स्वाहा । इदं गोदावर्य्यै न मम ॥११७॥ ॐ ताप्यै स्वाहा । इदं ताप्यै न मम ॥११८॥ ॐ रेवायै स्वाहा । इदं रेवायै न मम ॥११९॥ ॐ पयोदायै स्वाहा । इदं पयोदायै न मम ॥१२०॥ ॐ कृष्णायै स्वाहा। इदं कृष्णायै ॥१२१॥ ॐ भीमरथ्यै स्वाहा । इदं भीमरथ्यै न मम ॥१२२॥ ॐ तुंगभद्रायै स्वाहा । इदं तुंगभद्रायै न मम ॥१२३॥ ॐ क्षुद्रनदीभ्यः स्वाहा । इदं क्षुद्रनदीभ्यः न मम ॥१२४ ॐ लवणसमुद्राय स्वाहा। इदं लवणसमुद्राय न मम ॥१२५॥ ॐ इक्षुसमुद्राय स्वाहा । इदं इक्षुसमुद्राय न मम ॥१२६॥ ॐ सुरासमुद्राय स्वाहा । इदं सुरासमुद्राय न मम ॥१२७॥ ॐ सर्पिः समुद्राय स्वाहा । इदं सर्पिः समुद्राय न मम ॥१२८॥ ॐ दधिसमुद्राय स्वाहा । इदं दधि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समुद्राय न मम ॥१२९॥ ॐ क्षीरसमुद्राय स्वाहा। इदं क्षीरसमुद्राय न मम॥१३०॥ ॐ जीवनसमुद्राय स्वाहा। इदं जीवनसमुद्राय न मम ॥१३१॥ ॐ मेरवे स्वाहा। इदं मेरवे न मम ॥१३२॥ ॐ ऋग्वेदाय स्वाहा। इदं ऋग्वेदाय न मम ॥१३३॥ ॐ यजुर्वेदाय स्वाहा। इदं यजुर्वेदाय न मम ॥१३४॥ ॐ सामवेदाय स्वाहा। इदं सामवेदाय न मम ॥१३५॥ ॐ अथर्ववेदाय स्वाहा। इदं अथर्ववेदाय न मम ॥१३६॥ ॐ गदायै स्वाहा। इदं गदायै न मम ॥१३७॥ ॐ त्रिशूलाय स्वाहा। इदं त्रिशूलाय न मम ॥१३८॥ ॐ वज्राय स्वाहा। इदं वज्राय न मम ॥१३९॥ ॐ शक्तये स्वाहा। इदं शक्तये न मम ।१४०। ॐ दण्डाय स्वाहा। इदं दण्डाय न मम ॥१४१॥ ॐ खड्गाय स्वाहा। इदं खड्गाय न मम ॥१४२॥ ॐ पाशाय स्वाहा। इदं पाशाय न मम ॥१४३॥ ॐ अङ्कुशाय स्वाहा। इदं अङ्कुशाय न मम ॥१४४॥ ॐ गौतमाय स्वाहा। इदं गौतमाय न मम ॥१४५॥ ॐ भरद्वाजाय स्वाहा। इदं भरद्वाजाय न मम ॥१४६॥ ॐ विश्वामित्राय स्वाहा। इदं विश्वामित्राय न मम ॥१४७॥ ॐ कश्यपाय स्वाहा। इदं कश्यपाय न मम ।१४८। ॐ जमदग्नये स्वाहा। इदं जमदग्नये न मम ॥१४९॥ ॐ वसि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ष्ठाय स्वाहा। इदं वसिष्ठाय न मम ॥१५०॥ ॐ अत्रये स्वाहा। इदमत्रये न मम ॥१५१॥ ॐ अरुन्धत्यै स्वाहा। इदमरुन्धत्यै न मम ॥१५२॥ ॐ ऐन्द्र्यै स्वाहा। इदमैन्द्र्यै न मम ।१५३। ॐ कौमार्य्यै स्वाहा। इदं कौमार्य्यै न मम ॥१५४॥ ॐ ब्राह्मयै स्वाहा। इदं ब्राह्मयै न मम ॥१५५॥ ॐ वाराह्यै स्वाहा। इदं वाराह्यै न मम ॥१५६॥ ॐ चामुण्डायै स्वाहा। इदं चामुण्डायै न मम॥१५७॥ ॐ वैष्णव्यै स्वाहा। इदं वैष्णव्यै न मम ॥१५८॥ ॐ माहेश्वर्य्यै स्वाहा। इदं माहेश्वर्य्यै न मम ॥१५९॥ ॐ वैनायक्यै स्वाहा। इदं वैनायक्यै न मम ।१६०। ॐ श्रीमहाविष्णवे स्वाहा। इदं श्रीमहाविष्णवे न मम ॥१६१॥ हस्तेजलमादायानेन होमेन ब्रह्मादयः सर्वतोभद्रमण्डलदेवताः प्रीयन्ताम् न मम। (इति जल मुत्सृजेत्) ॐ यथाबाणप्रहाराणां कवचं वारणं भवेत्। तद्वद्दैवोपघातानां शान्तिर्भवतु वारणम्। इति यजमानमूर्द्धाभिषेकः। इति सर्वतोभद्रदेवताहोमः।

अथ प्रधानदेवहोमः। ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधे पदम्। समूढमस्यपाᳬं सुरे स्वाहा ॥१॥ इति मंत्रेण अथवा द्वादशाक्षरेण (ॐ नमोभगवते वासुदेवाय स्वाहा) अष्टाक्षरेण वा (ॐ नमोनारायणाय स्वाहा) पायसतिलयव व्रीहिघृतादि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्रव्यैरष्टोत्तरशतं १०८ जुहुयात्। एवं होमं समाप्य। अग्नेः स्थापितदेवतानां चोत्तरपूजनं कार्यम्। तद्यथा। अग्नेर्वैश्वानराय नमः इति गंधादिपंचोपचारैरग्निं संपूज्य ॐ सूर्यादिस्थापितदेवताभ्यो नमः। ॐ ब्रह्मादिसर्वतोभद्रमण्डलदेवताभ्यो नमः। इतिपंचोपचारैः संपूज्य। अनया पूजया, अग्निः स्थापितदेवताश्च प्रीयन्तामिति जलमुत्सृजेत्। ततो हुतशेषहविर्द्रव्यं गृहीत्वा ब्रह्मणान्वारब्धः स्विष्टकृद्धोमं कुर्यात्। ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम। ततो भूराद्या नवाज्याहुतयः। ॐ भूः स्वाहा इदमग्नये न मम ॥१॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥२॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥३॥ ॐ त्वन्नो ऽअग्ने व्वरुणस्य व्विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा। इदमग्नीवरुणाभ्यां न मम ॥४॥ ॐ सत्वन्नोऽअग्ने वमोभवो-तीनेतिष्ठोऽअस्याऽउषसो व्युष्टौ। अवयक्ष्व नो वरुण ꣳ रराणो व्विहि मृडीक ꣳ सुहवो नऽएधि स्वाहा। इदमग्नीवरुणाभ्यां न मम ॥५॥ ॐ अयाश्चाग्ने स्यनभिशास्तिपाश्च सत्यमित्वमयाऽ असि। अयानो यज्ञं वहास्य यानो धेहि भेषज ꣳ स्वाहा। इदमग्नये अयसे न मम ॥ ६ ॥ ॐ येते शतं वरुण ये सहस्रं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽअद्यसवितोत विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यः मरुद्भ्यः स्वर्केभ्यश्च न मम ॥७॥ ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं व्विमध्यमꣳ श्रथाय। अथा व्वयमादित्य व्रते तवानागसोऽअदितये स्याम स्वाहा। इदं वरुणायादित्यादितये न मम ॥८॥ ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम ॥९॥ इति नवाहुतयः।

अथ बलिदानम्। (तच्चैवम्। अग्न्यायतनस्य समंताद्दिक्षु विदिक्षु च दशदिक्पालानां माषभक्त बलयो देयाः) देशकालौ स्मृत्वा। अद्य पूर्वकृतस्य कर्मणः सांगतासिद्ध्यर्थं दिक्पालेभ्यो बलिदानं करिष्ये। इति संकल्प्य। (पूर्वे) ॐ इन्द्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि। भो इन्द्र दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु। आयुः कर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन इन्द्रः प्रीयताम् ॥१॥ (आग्नेय्यां दिशि) ॐ अग्नये सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि। भो अग्ने दिशं रक्ष बलिं भक्ष मम (यजमानस्य)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सकुटुंबस्याभ्युदयं कुरु । आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन अग्निः प्रीयताम् ॥२॥ (दक्षिणस्याम्) ॐ यमाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि। भो यम दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु। आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन यमः प्रीयताम् ॥३॥ (नैर्ऋत्याम्) ॐ निर्ऋतये सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि। भो निर्ऋते दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु। आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन निर्ऋतिः प्रीयताम् ॥४॥ (पश्चिमायाम्) ॐ वरुणाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि। भो वरुण दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु। आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन वरुणः प्रीयताम् ॥५॥ (वायव्याम्) ॐ वायवे सांगाय सप-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि । भो वायो दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु । आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव । अनेन बलिदानेन वायुः प्रीयताम् ॥६॥ (उत्तरस्याम्) ॐ कुबेराय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि । भो कुबेर दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु । आयुः कर्ता क्षेमकर्ता शान्तिफर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव । अनेन बलिदानेन कुबेरः प्रीयताम् ॥७॥ (ऐशान्याम्) ॐ ईश्वराय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि । भो ईश्वर दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु । आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव । अनेन बलिदानेन ईश्वरः प्रीयताम् ॥८॥ (ईशानपूर्वयोर्मध्ये) ॐ ब्रह्मणे सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि । भो ब्रह्मन् दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु । आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन ब्रह्मा प्रीयताम् ॥९॥ (निर्ऋतिपश्चिमयोर्मध्ये) ॐ अनंताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि। भो अनंत दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु। आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन अनंतः प्रीयताम् ॥१०॥ (ततो ग्रहमण्डलसमीपे) ॐ सूर्यादिनवग्रहेभ्यः साधिप्रत्यधिदेव पंचलोकपाल सहितेभ्यः इमं सदीपदधिमाषभक्तबलिं समर्पयामि। भोभो सूर्यादिग्रहमण्डलदेवता इमं बलिं गृह्णीत आयुः कर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः वरदाः भवतः। अनेन बलिदानेन श्रीसूर्यादिग्रहमंडलदेवताः प्रीयन्ताम् ॥११॥ (सर्वतोभद्रमंडलसमीपे) ॐ ब्रह्मादिदेवेभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः एतं सदीपदधिमाषभक्तबलिं समर्पयामि। भोभो सर्वतोभद्रमंडलस्थब्रह्मादिदेवाः सांगाः सपरिवाराः सायुधाः सशक्तिकाः मम (यजमानस्य) सकुटुंबस्य सपरिवारस्य आयुः कर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः वरदा भवत। अनेन बलिदानेन सर्वतोभद्रमंडलदेवताः प्रीयन्ताम्।१२।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ गणपतये सांगाय सपरिवाराय सायुधाय सशक्तिकाय एतं सदीपदधिमाषभक्तबलिं समर्पयामि। भो गणपते इमं बलिं भक्ष मम (यजमानस्य) सकुटुंबस्य सपरिवारस्य आयुः कर्ता क्षेमकर्ता शुभकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन गणपतिः प्रीयताम् ॥१३॥ ॐ दुर्गायै सांगायै सपरिवारायै सायुधायै सशक्तिकायै एतं सदीपदधिमाषभक्तबलिं समर्पयामि। भो दुर्गे इमं बलिं भक्ष मम (यजमानस्य) सकुटुंबस्य सपरिवारस्य आयुः कर्त्रि क्षेमकर्त्रि शान्तिकर्त्रि पुष्टिकर्त्रि तुष्टिकर्त्रि वरदा भव। अनेन बलिदानेन दुर्गा प्रीयताम् ॥१४॥ ततः क्षेत्रपालबलिदानम्। एकस्मिन् वंशपात्रे कुशानास्तीर्य तदुपरि आहारचतुर्गुणं द्विगुणं वा माषभक्त दध्योदनं जलपात्रं च निधाय हरिद्राकुंकुमसिंदूरकज्जल द्रव्यपताका यवचूर्णकृततैल दीपयुतं कृत्वा। ॐ क्षेत्रपालाय नमः इति गंध-पुष्पादिभिर्बलिं संपूज्य। ॐ नमः क्षेत्रपालस्त्वं भूतप्रेत गणैः सह। पूजां बलिं गृहाणेमं सौम्यो भवतु सर्वदा। देहि मे आयुरारोग्यं निर्विघ्नं कुरु सर्वदा ॥१॥ इति प्रार्थ्य। बलिं गृहीत्वा ॐ क्षेत्रपालाय सांगाय भूतप्रेत पिशाच शाकिनीवेतालादि परिवारयुताय सायुधाय सशक्तिकाय सवाहनाय इमं सदीपदधिमाष-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भक्तबलिं समर्पयामि। भोभोक्षेत्रपाल सर्वतो दिशं रक्ष बलिं भक्ष मम (यजमानस्य) सकुटुंबस्याभ्युदयं कुरु। आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव। अनेन बलिदानेन क्षेत्रपालः प्रीयताम्। इमं बलिमनवेक्षमाणेन दुर्ब्राह्मणेन नीत्वा चतुष्पथे निक्षिपेत्। यजमानोऽपितस्यपृष्ठतो द्वारपर्य्यंतं गत्वा जलं क्षिपेत्। ततो हस्तौ पादौ प्रक्षाल्य आचामेत्।

अथ पूर्णाहुतिहोमः। देशकालौ स्मृत्वा। कृतस्य कर्मणः सांगतासिद्ध्यर्थं पूर्णाहुतिहोमं करिष्ये। इति संकल्प्य। आज्याधिश्रयणमाज्योद्वासनमवेक्षण मुत्पवनं च कृत्वा स्रुवं पूरयित्वा नारिकेलं पूगीफलं वा धृत्वा यजमानः आचार्यस्कंधं स्पृशन् जुहुयात्। तत्र मंत्राः। ॐ समुद्रादूर्म्मि र्मधुमाँऽउदार दुपा ॅंशुनासम मृतत्वमानट्। घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥१॥ व्वयन्नाम प्रब्रवामा घृतस्या स्मिन्यज्ञे धारया मानमोभिः। उपब्रह्मा शृणवच्छस्य मानश्चतुः शृङ्गोवमीद्गौरऽएतत् ॥२॥ चत्वारि शृङ्गात्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य। त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्यां ॅं आविवेश ॥३॥ त्रिधा हितम्पणिभिर्गुह्यमानङ्गवि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवासो घृत मन्त्रविन्दन्। इन्द्रऽएकꣳ सूर्यऽएकञ्जजान व्वेना-देकꣳ स्वधया निष्टतक्षुः ॥४॥ एताऽअर्षन्ति हृद्यात्समुद्राच्छत व्रजा रिपुणा नावचक्षे। घृतस्य धाराऽअभिचाकशीमि हिरण्ययो व्वेतसो मध्यऽआसाम् ॥५॥ सम्यक्स्रवन्ति सरितो न धेनोऽ अन्तर्हृदा मनसा पूयमानाः। एतेऽअर्षन्त्यूर्म्मयोघृतस्य मृगाऽइव क्षिपणो रीषमाणाः ॥६॥ सिन्धोरिव प्राध्वने शूघनासो व्वातप्र मियः पतयन्ति यह्वाः। घृतस्य धाराऽअरुषोन व्वाजी काष्ठा-भिन्दन्नूर्म्मिभिः पिन्वमानः ॥७॥ अभिप्रवन्त समनवे व्वयोषाः कल्याण्यः स्मयमानासोऽअग्निम्। घृतस्य धारा समिधो न सन्तता जुषाणोहर्य्यति जातवेदाः ॥८॥ कन्याऽइव व्वहतु मेत-वाऽउऽअञ्जाञ्जानाऽअभिचाकशीमि। यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽअभितत्पवन्ते ॥९॥ अभ्यर्षत सुष्टुतिङ्गव्यमाजि मस्मासुभद्रा द्रविणानि धत्त। इमं यज्ञन्नयत देवतानो घृतस्य धारा मधुमत्पवन्ते ॥१०॥ धामन्ते व्विश्वम्भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि। अपामनीके समिथेयऽआभृतस्तमश्याम मधुमन्तन्तऽऊर्म्मिम् ॥११॥ पुनस्त्वादित्या रुद्रा व्वसवः समि-न्धताम्पुनर्ब्रह्माणो व्वसुनीथयज्ञैः। घृतेनत्वन्तन्वं व्वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥१२॥ सप्तते ऽअग्ने समिधः सप्तजिह्वाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्तऽऋषयः सप्तधाम प्रियाणि। सप्तहोत्राः सप्तधात्वा यजन्ति सप्तयोनी रापृणस्व घृतेन स्वाहा ॥१३॥ मूर्द्धानंदिवोऽअरन्ति पृथिव्याऽवैश्वानरऽमृतऽआजात मग्निम्। कविᳬ सम्राजमतिथिञ्जनाना मासन्ना पात्रञ्जनयन्तदेवाः ॥४१॥ पूर्णादर्व्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहाऽइषमूर्ज्जᳬ शतक्रतो स्वाहा ॥१५॥ इदमग्नये वैश्वनराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽ अग्नये अद्भ्यश्च न मम। इति प्रोक्षणीपात्रे त्यागः। इति पूर्णाहुतिं हुत्वा ॐ श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं श्रियं वलम्। तेज आयुष्यमारोग्यं देहि मे हव्यवाहन ॥१॥ इति प्रार्थयेत्। ततस्त्र्यायुषकरणम्। स्रुवेण भस्ममानीय दक्षिणाऽनामिकाग्रगृहीतभस्मना। ॐ त्र्यायुषं जमदग्ने रिति ललाटे ॐ कस्यपस्य त्र्यायुषमिति ग्रीवायाम् ॐ यद्देवेषु त्र्यायुषमिति दक्षिणांसे ॐ तन्नोऽअस्तु त्र्यायुषमिति हृदि। इति त्र्यायुषं कुर्यात्। ततः संस्रवप्राशन माचमनं च कृत्वा ब्रह्मणे पूर्णपात्रदानं कार्यम्। तद्यथा देशकालौ पठित्वा। अद्य कृतैतदमुकहोमकर्म प्रतिष्ठार्थ मिदं पूर्णपात्रं सदक्षिणाकं प्रजापतिदैवत ममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणात्वेन तुभ्यमहं सम्प्रददे। इति दद्यात्। ॐ स्वस्तीतिप्रतिवचनम्। ततो ब्रह्मग्रंथि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विमोकः। ततः प्रणीतोदकेन ॐ सुमित्रियानऽआपऽओषधयः सन्त्विति यजमानमूर्धानमभिषिंचेत्। ॐ दुर्मित्रियास्तस्मैसन्तु योस्मान्द्वेष्टि यंचव्वयं द्विष्मः इतीशान्यां प्रणीतां न्युब्जीं कुर्यात्। ततः आस्तरणक्रमेण वर्हिरुत्थाप्या ज्येनाभिघार्य्यं। ॐ देवा-गातु विदो गातु वित्वागातुमित। मनसस्पतऽइमं देवयज्ञ ᳪ स्वाहा वातेधाः स्वाहा ॥१॥ इति मंत्रेण हस्तेनैव जुहुयात्। एवं होमं समाप्य। हस्तेजलमादाय। आघारादि पूर्णाहुति पर्यंतंयत् यद्रव्यं यावत् यावत्संख्यानेन येन येन मंत्रेण यस्यै यस्यै देवतायै यया यया कामनया हुतं तस्यै तस्यै देवतायै सा सा देवता प्रीयताम्—ता देवताः शान्तिदाः पुष्टिदाः तुष्टिदाः वरदाः भवन्तु। इति प्राथर्य। ततः नवग्रहकलशोदकेन दूर्वाम्र-पल्लवैरुदङ्मुख आचार्य ऋत्विजश्च सपत्नीकं यजमानं प्राङ्मुख-मुपविष्टमभिषिंचेयुः (अभिषेके पत्नी वामतः) तत्र मंत्राः। ॐ आपोहिष्ठा मयोभुवस्तानऽऊर्जे दधातन। महेरणाय चक्षसे ॥१॥ योवः शिव तमो रसस्तस्य भाजयतेहनः। उसतीरिव मातरः ॥२॥ तस्माऽअरङ्ग मामवो यस्य क्षयाय जिन्न्वथ। आपोजन यथा चन ॥३॥ त्रातारमिन्द्र मवितारमिन्द्र ᳪ हवे हवे सुवह ᳪ शूर-मिन्द्रम्। ह्वयामिशक्रं पुरुहूतमिन्द्र ᳪ स्वस्ति नो मघवा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धात्विन्द्रः ॥४॥ वरुणस्योत्तम्भनमसि वरुणस्यस्कंभसर्ज्जनीस्थो वरुणस्यऽऋतसदन्न्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥५॥ इदमापः प्रवहता वद्यं च यत्। यच्चाभि दुद्रोहानृतं यच्च शेषेऽअभीरुणम् ॥६॥ पुनंतु मा देव जनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥७॥ आप्यायस्व समे तु ते विश्वतः सोमवृष्ण्यम्। भवा वाजस्य सङ्गथे ॥८॥ पयःपृथिव्यां पयः ओषधीषु पयोदिव्यंतरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम् ॥९॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। सरस्वत्यै वाचो यन्तुर्यं त्रिये दधामि बृहस्पतिष्ट्वा साम्राज्येनाभिषिंचामि ॥१०॥ देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम्। सरस्वत्यै वाचो यन्तुर्य्यंत्रेणाग्ने साम्राज्येनाभिषिंचामि ॥११॥ देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्याम्। अश्विनौ भैषज्येन तेजसे ब्रह्मवर्चसा याभिषिंचामि। सरस्वत्यै भैषज्येन वीर्य्यायान्नाद्यायाभिषिंचामि। इन्द्रस्येन्द्रियेण बलाय श्रियै यशसे भिषिंचामि ॥१२॥ पालाशं भवति तेन ब्राह्मणोभिषिंचति। ब्रह्म वै पालाशो ब्रह्मणैवैन मेतदभिषिंचति ॥१३॥ सर्वेषां वाऽएष वेदानाꣳ रसोयत्साम सर्वेषामेवैन मेत-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वेदानाᳬं रसेनाभिर्षिचति ॥१४॥ यदेव कल्पा जुहोति प्राणा वै कल्पाऽअमृत मुप वै प्राणाऽअमृते नैवेन मेतदभिर्षिचति ॥१५॥ दीर्घायुत्वाय बलाय वर्चसे सुप्रजास्त्वा सहसाऽअथोजीव शरदः शतम् ॥१६॥ द्यौः शान्तिरन्त रिक्षᳬं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वᳬं शान्तिः शान्तिरेव शान्तिः सामा शान्ति रेधि ॥१७॥

अथ पौरांणिका मंत्राः। सुरास्त्वामभिषिंचन्तु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥१॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥२॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥३॥ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टि श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिः कान्ति स्तुष्टिश्च मातरः ॥४॥ एतास्त्वामभिषिंचन्तु देवपत्न्यः समागताः। आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥५॥ ग्रहास्त्वामभिषिंचन्तु राहुः केतुश्च तर्पिताः। देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥६॥ ऋषयो मनवो गावो देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसाङ्गणाः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।।७।। अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्चये ।।८।। सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एते त्वामभिषिंचन्तु धर्मकामार्थ सिद्धये ।।९।। आदित्या वसवोरुद्रा विश्वेदेवामरुद्गणाः । अभिषिंचन्तु ते सर्वे धर्मकामार्थ सिद्धये ।।१०।। अमृताभिषेकोऽस्तु । एवमभिषेकानंतरं सर्वौषधीरनुलिप्य शुद्धोदकेन स्नात्वा उभयोः स्नानवस्त्रत्यागः । शुक्लमाल्यांबरधरो धृतमंगल तिलकः सपत्नीको यजमानः स्वासने उपविश्य आचम्य आज्यावलोकनं कुर्यात् । अथ घृतच्छाया दर्शनम् । तद्यथा । आज्यपात्रं घृतपूरितं सद्रव्यं (सहिरण्यं) कृत्वा चन्दनाक्षतै श्चतुर्षुस्थानेषु संपूज्य कुशैर्दूर्वाभिर्वा मंत्रैरभि मंत्रयेत् । मंत्राः— ॐ आज्यं परमयज्ञीयमाज्यं तेजोमयो निधिः । आज्यं हि देवदेवानां प्रियमाज्ये स्थितं जगत् ।।१।। तदाज्यवीक्षणे भक्त्या कृते मंगलमाप्नुयात् । दुःस्वप्नो दुर्निमित्तं च विघ्नौघो नश्यति ध्रुवम् ।।२।। तेजः प्रज्ञा च शौर्य्यं च बलं चापि प्रवर्द्धते । पुण्यं सप्तांग राज्यं च भवेदन्यदभीप्सितम् ।।३।। ज्ञात्वा वाऽज्ञानतो वाऽपि मनो वाक्काय कर्म्मभिः । कृतं यत्पातकं तन्मे घृतस्पर्शाद्विनश्यतु । आज्ये चैव मुखं दृष्ट्वा सर्वपापैः प्रमुच्यते ।।४।। इत्यभिमंत्र्य संकल्प्य— अद्येहामुक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोत्रोऽमुक राशि रमुक शर्म्माऽहं सर्वारिष्ट विनाशार्थम्, आ-
ज्यावेक्षणं करिष्ये। (ॐ तेजोसीति परमेष्ठी ऋषिस्त्रिष्टुप्छन्दः
आज्यावेक्षणे विनियोगः) ॐ तेजोऽसि शुक्रमस्यमृतमसि।
धामनामासि प्रियं देवानामना धृष्टं देवयजन मसि ॥१॥ आज्यं
तेजः समुद्दिष्टमाज्यं पापहरं परम्। आज्येन देवास्तृप्यन्ति आज्ये
लोका प्रतिष्ठिताः ॥१॥ भौमान्तरिक्षं दिव्यं वा यन्मे कल्मष-
मागतम्। तत्सर्वमाज्यसंस्पर्शात्प्रणाशमुपगच्छतु। आज्ये चैव
मुखं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥२॥ ॐ ध्रुवासि ध्रुवोऽयं
य्यजमानोऽस्मिन्नायने प्रजया पशुभिर्भूयात्। घृतेन द्यावा
पृथिवीं पूर्य्येथा मिन्द्रस्य च्छदिरसि व्विश्वजनस्य च्छाया ॥१॥
छायादर्शनं पापनाशनम्। इत्थमवलोक्याज्यं संकल्प÷ अद्येहा-
मुक राशिरमुक शर्माऽहम् इदमवलोकिताज्यं कांस्य पात्र स्थितं
सद्रव्यं (सहिरण्यं) मृत्युंजय दैवतं मृत्युंजयप्रीतये सर्वारिष्ट परि-
हारार्थं च अमुक गोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददे।
ॐ ततसन्न मम। ब्राह्मणं संपूज्य दद्यात्। दानवाक्यं पठेत्—
कामधेनोः समुद्भूतं देवानामुत्तमं हविः। आयु र्वृद्धिकरं दातु
राज्यं पातु सदैव माम् ॥१॥ दानप्रतिष्ठार्थं द्रव्यं गृहीत्वा
संकल्पं कुर्यात्। अद्येहामुकराशिरमुकशर्माहं कृतैतद्दानप्रतिष्ठार्थं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदं द्रव्यं अमुक गोत्रायामुकशर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददे। इति दद्यात्। मृत्युंजयं प्रार्थयेत्। ॐ त्र्यम्बकं यजामहे सुगन्धि पुष्टि वर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात् ॥१॥ ब्राह्मणश्च स्वस्तीति गृहीत्वा आशिषं दद्यात्—श्रीमृत्युंजय प्रसादोऽस्तु इति। इति घृतच्छाया दर्शनम्। तत आचार्यादीन् गन्धवस्त्रालङ्कारादिभि र्यथाविभवं पूजयेत्। (ततो दक्षिणादानम्। तत्रायं क्रमः) आचार्याय गाम्। ब्रह्मणे वृषभम्। सदस्यायाश्वम्। गाणपत्याय रथम्। उपद्रष्ट्रे गंत्रीम्। ऋत्विग्भ्यः सुवर्णं दद्यात्। तत्र संकल्पः। देशकालौ संकीर्त्य० गोत्रः शर्माहं कृतस्य अमुक हवनकर्मणः साङ्गतासिद्ध्यर्थं तत्संपूर्णफलप्राप्त्यर्थं इदं गोनिष्क्रयभूतं द्रव्यं रजतं चन्द्रदैवतममुक शर्मणे ब्राह्मणाय आचार्याय तुभ्यमहं संप्रददे ॥१॥ आचार्यः ॐ स्वस्ति, इति वदेत्। कृतस्य अमुक हवनकर्मणः साङ्गतासिद्ध्यर्थं तत्संपूर्णफलप्राप्त्यर्थं इदं वृषनिष्क्रयभूतं द्रव्यं रजतं चन्द्रदैवतं अमुमगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे तुभ्यमहं संप्रददे ॥२॥ ॐ स्वस्ति। कृतस्य अमुक हवन कर्मणः साङ्गतासिद्ध्यर्थं तत्संपूर्णफलप्राप्त्यर्थं च इदं सुवर्ण निष्क्रयभूतं द्रव्यं रजतं चन्द्रदैवतं अमुकगोत्रेभ्यः अमुकशर्मभ्यः ब्राह्मणेभ्यः ऋत्विग्भ्यः विभज्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दातुमहमुत्सृजे ॥३॥ ॐ स्वस्ति । (वा सर्वेभ्य आचार्यादिभ्यः एकतंत्रेण दक्षिणा संकल्पः । कृतस्य अमुकहवनकर्मणः साङ्गतासिद्ध्यर्थं तत्संपूर्णफलप्राप्त्यर्थं च आचार्यादिभ्यो ब्राह्मणेभ्यो मनसोद्दिष्टां दक्षिणां विभज्य दातुमहमुत्सृजे ।) इति दक्षिणादानम् । ततो ब्राह्मणभोजनसंकल्पं कुर्यात् । कृतस्य अमुकहवनकर्मणः साङ्गतासिद्ध्यर्थं तत्संपूर्णफलप्राप्त्यर्थं च यथा संख्याकान् ब्राह्मणान् (यथाकाले) यथोत्पन्नेनान्नेनाहं भोजयिष्ये । भोजनान्ते तेभ्यः (ताम्बूल) दक्षिणां च दास्ये ॥१॥ अन्येभ्यो ब्राह्मणेभ्यो यथाशक्ति भूयसीं दक्षिणां दद्यात्। कृतस्य अमुकहवनकर्मणः साङ्गतासिद्ध्यर्थं तत्संपूर्णफलप्राप्त्यर्थं तन्मध्ये न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभो नानाशर्मभ्यो ब्राह्मणेभ्यः समाश्रितबन्धुवर्गेभ्यो दीनानाथेभ्यश्च यथोत्साहं भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे ॥२॥ गोदानम्। कृतस्य अमुक हवन कर्मण साङ्गतासिद्ध्यर्थं तत्संपूर्णफल प्राप्त्यर्थं तन्मध्ये न्यूनातिरिक्त दोषपरिहारार्थं गोमूल्योपकल्पितं इदं द्रव्यं (सालङ्कृतां सवत्सां इमां गोरुद्र दैवत्यां बृहस्पति दैवतं वासो युगं च) अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । * गोदानपक्षे—कृतैतत्सवत्सगोदान कर्मणः साङ्गतासिद्ध्यर्थं इदं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुवर्णं अग्निदैवतं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे। ॐ स्वस्तीति ब्राह्मणो वदेत् * अथाशीर्वादः। अक्षतान् पुष्पाणि चादाय आचार्यादय सर्वैऋत्विजः यजमानाय आशिषं दद्युः। सचेत्थम्। ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्ताक्ष्योंऽअरिष्टनेमिः स्वस्ति नो वृहस्पतिर्दधातु ॥१॥ पुनस्त्वादित्यारुद्रा वसवः समिन्धताम्पुनर्ब्रह्माणोव्वसुनीथयज्ञैः। घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥२॥ श्रीर्वर्चस्वमायुष्यमारोग्य माभिधात्पवमानं महीयते। धान्यं धनं पशुं वहु पुत्र लाभं शतसंवत्सरं दीर्घमायुः ॥३॥ मंत्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः। शत्रूणां बुद्धिनाशोस्तु मित्राणा मुदयस्तव ॥४॥ व्यासवाल्मीकिवचनात् पाराशर वसिष्ठयोः। गर्ग गौतम धौम्यात्रि वासिष्ठांगिरसां तथा। वाक्याच्च नारदादीनां पूर्णं भवतु ते कृतम् ॥५॥ इति स्वस्तिवाचनम्। ततः स्थापितदेवतानामुत्तरपूजनं कृत्वा प्रसादं देवताभिमुखं निधाय समर्प्य आरार्तिकं कुर्यात्। तत्रैव सुवासिनी (सौभाग्यवती) यजमानास्य भाले कुंकुमेन तिलकं कृत्वा नीराजयेत्[१]। तस्यै यथाचारं दक्षिणां दत्वा नापिताय

---

१ लोके आरतो, छात इन्याख्यं कर्म * ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शकुनकर्त्रे भृत्याय च दक्षिणादिकं दत्वा स्थापितदेवान् विसर्जयेत्। तद्यथा। अक्षतान् गृहीत्वा। ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वे महे। उपप्रयन्तु मरुतः सुदानवऽइन्द्र पाशूर्भवासचा।१। यान्तु देवगणाः सर्वे पूजामादाय मामकीम्। इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥२॥ आवाहितदेवताः स्वस्थाने गच्छत। इति देव विसर्जनम्। ततोऽग्निं विसृजेत्१। तत्र मंत्रः। ॐ यज्ञ यज्ञं गच्छ यज्ञपतिङ्गच्छ स्वां योनिङ्गच्छ स्वाहा। एषते यज्ञो यज्ञपते सह सूक्तवाकः सर्व्ववीरस्तञ्जुषस्व स्वाहा ॥१॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर। यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥३॥ इत्यग्नि विसर्जनम्। एवं देवान् विसृज्य। पीठयुतं मण्डपं आचार्याय वद्यात्। कृतस्य अमुक हवनकर्मणः साङ्गतासिद्ध्यर्थं अमुं (सभूमि) मण्डपं ध्वजपताका चामरादर्श वितानवस्त्र कलश ग्रहादिपीठसहितं फलपुष्पाद्युपस्करयुतं सदक्षिणाकं (वा निष्क्रयभूतं द्रव्यं) अमुक गोत्राय अमुकशर्मणे आचार्याय तुभ्यमहं संप्रददे न ममेति तद्धस्ते साक्षतं जलं प्रक्षिपेत्। आचार्यस्तु देवस्यत्वेति गृह्य स्वस्तीत्युक्त्वा कोदादिति

---

१ प्रतिमायां जले वह्नौ नावाहन विसर्जने, इत्युक्तेऽपिवह्निविसर्जन प्रतिषेधे देशाचारानुसारेणात्राग्नि विसर्जनं लिखितम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कामस्तुतिं पठेत्। तत स्तस्मै यज्ञपात्राणि पूजोपकरणपात्राणि च दद्यात्। प्रतिपत्तिरूपत्वान्नात्रदान वाक्यम्। करौ संपुटी कृत्य। मया यत्कृतं अमुकहवनाख्यकर्म तत्कालहीनं भक्ति हीनं श्रद्धा हीनं द्रव्य हीनं च भवतां ब्राह्मणानां वचनात् श्रीमहा-विष्णोःप्रसादाच्च सर्व विधेः परिपूर्णमस्त्विति भवन्तो ब्रुवन्तु। अस्तु परिपूर्ण इति ब्राह्मणाः वदेयुः। ततः पुष्पं गृहीत्वा प्रार्थनां कुर्य्यात्। जपच्छिद्रं तपश्छिद्रं यच्छिद्रं शान्तिकर्मणि। सर्व भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः ।।१।। प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्ण स्यादिति श्रुतिः ।।२।। चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च। हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ।।३।। यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु। न्यूनं संपूर्णतां यातु सद्यो वन्दे तमच्युतम् ।। ४ ।। ॐ विष्णवे नमः। विष्णवे नमः। विष्णवे नमः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीः ॥

श्रीमद्भागवत सप्ताह

पूजन विधानम्

श्रीमद्भागवत—श्रीदेवीभागवत

श्री हरिवंश—श्री वाल्मीकि रामायण

नवाह विधान आदि

प्रकाशक :

वैद्य पं० श्रीराम मिश्र कविराज शास्त्री

का० व्या० पुराण तीर्थ, आयुर्वेदाचार्य

याज्ञिक भूषण-भिषग्रत्न-ज्योतिर्विद्-

कर्मकाण्ड कोविद्

गंगा लहरी - तिलकमार्ग

रानीगंज (वर्द्धवान)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमामि देवं करुणा निधानम्
तमालवर्णं सुहिता वतारम्
अपार संसार समुद्र सेतुम्
भजामहे भागवत स्वरूपम्

श्री गणपतिर्जयति

अथ सप्ताह पूजा विधानम् ।

सुदिने सुमुहूर्ते गृहे तीर्थे पुण्य क्षेत्रादौ यथा शक्ति मण्डपादि करणम् ।

यजमानः प्रातः काले संध्या वन्दनादिकर्म समाप्य अर्चन देशमागत्य रक्षादीपं प्रज्वाल्य कुशासने प्राङ्मुख पश्चिममुखो वा उपविश्य—

स्व दक्षिणे कम्बलासने स्वपत्नीं चोपवेश्य—ग्रन्थि वन्धनं तिलकं कुंकुमादिना च कारयित्वा आचमनं कुर्यात् ।

ओं केशवाय नमः । ॐ नारायणाय नमः । ॐ माधवाय नमः । त्रिराचम्य हस्त प्रक्षालनम् ॐ गोविन्दाय नमः । प्राणायामत्रयं कुर्यात् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्ध पुष्पादिना ॐ भूम्यै नमः इति संपूज्य, पवित्र धारणम् शिखांवध्वा—

ॐ अपवित्रः पवित्रो वा इति पूजन सामग्रीमात्मानं च संप्रोक्ष्य—शान्तिपाठं मंगल श्लोकान् पठित्वा संकल्पं कुर्यात्—तद्यथा—देशकालौ संकीर्त्य अमुकगोत्रोऽहं अमुक शर्माहं श्रुति स्मृति पुराणोक्त फलप्राप्त्यर्थं धर्मार्थ काममोक्ष चतुर्विध पुरुषार्थ सिद्ध्यर्थं श्रीकृष्ण प्रीत्यर्थं श्रीमद्भागवत सप्ताह यज्ञमहं करिष्ये। तदंगतया विहितं गणेशाम्बिकयोः पूजनम्—मातृका पूजनम् वरुण पूजनम्—पुण्याहवाचनम्—सप्त घृत मातृका पूजनम्—रक्षाभिधानम्—नान्दीश्राद्धम्—आचार्यादि वरणम्—सर्वतो-भद्रमण्डल पूजनम्—नवग्रहाणाम् पूजनम्—विष्णोः पूजनम्—श्रीमद्भागवत पुराणस्य पूजनम्—व्यास पूजन कर्माहं करिष्ये।

यथावकाशं यथा विभव पूर्वकं कुर्यात्। पूजनादि क्रमः अस्मत्प्रकाशित सर्वदेव पूजापद्धत्या द्रष्टव्यम्।

प्रधान व्यास वरणम्—देशकालौ संकीर्त्य अमुक गोत्रोऽहं अमुक शर्माहं सकलकामनासिद्ध्यर्थं श्रीकृष्ण प्रीत्यर्थं श्रीमद्भाग-वत कथा सप्ताह विधिना श्रावितारं अमुक गोत्रं अमुक शर्माणं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्राह्मणं एभिर्वरणद्रव्यैः त्वामहं वृणे। वृतोऽस्मि—इति प्रति वचनम्। पश्चात् पंच विप्रान् वृणुयात्—

पुनः देशकालौ संकीर्त्य—अमुकगोत्रममुकशर्माणम्--ब्राह्मणं अस्मिन् सप्ताह यज्ञे श्रीमद्भागवतस्य पठन करणार्थम् पाठ कत्वेन त्वामहं वृणे—वृतोस्मीति वचनम् पुनः कथा भंग निवृत्तये सांगता सिद्धये श्रीविष्णोः द्वादशाक्षर मंत्रस्य श्रीगणपति मंत्रस्य तथा श्रीविष्णु सहस्रनामस्य जपपठनादि करणार्थं वृणुयात्।

॥ श्रीमद् भागवत पूजनम् ॥

श्री पुरुष सूक्तेन अथवा नमोस्त्वनन्तायेति श्लोकेन वस्त्र गन्धाक्षत पुष्पैः पुस्तकं संपूज्य सदक्षिणाकं नारिकेल फलं गृहीत्वा—

श्रीमद् भागवताख्योऽयं प्रत्यक्षः कृष्ण एवहि
स्वीकृतोऽसि मयानाथ मुक्त्यर्थं भव सागरे॥

इत्यनेन मंत्रेण पुस्तकोपरि निदध्यात्

मण्डपोपरि लम्ब्रायमानम् कपर्द निर्मितं शुकं पूजयेत्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ वाचक पूजनम् ॥

ॐ नमोस्त्वनंतायेति श्लोकेन अथवा
नमस्ते भगवन् व्यास सर्वशास्त्रार्थ कोविद
ब्रह्म विष्णु महेशान मूर्ते सत्यवती सुत ॥

वस्त्र गन्धाक्षत पुष्पैः वाचकं संपूज्य प्रार्थयेत्
शुकरूप प्रबोधज्ञ सर्वशास्त्र विशारद
एतत्कथा प्रसंगेन मदज्ञानं विनाशय ॥ इति
पाठका पठध्वम्—जापका जपध्वम्—आरार्तिकं कुर्यात् ॥

॥ सप्ताह पूजन द्वितीय प्रकारः ॥

आचम्य—प्राणानायम्य--शान्तिपाठं पठित्वा। देशकालौ संकीर्त्य—मम इह जन्मनि जन्मान्तरे वा कृत समस्त पापक्षय पूर्वक धर्मार्थ काममोक्ष सिद्धि द्वारा श्रीपरमेश्वर प्रीत्यर्थ ब्राह्मण द्वारा श्रीमद्भागवत यज्ञं करिष्ये तदंगत्वेन गणपत्यादि पूजनं च करिष्ये--वरण द्रव्याणि गृहीत्वा—देशकालौ संकीर्त्य--मम सर्वविध पापक्षय द्वारा श्रीपरमेश्वर प्रीत्यर्थ जन्म जन्मान्तरे श्री भगवत् भक्ति प्राप्त्यर्थं च श्रीमद् भागवत सप्ताह कथा श्रवणार्थम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमुकगोत्रममुक ब्राह्मणं श्रावयितारं एभिः द्रव्यैस्त्वामहं वृणे। वृतोस्मीति वचनम् ॥

प्रार्थयेत्—शुकरूप द्विजश्रेष्ठ सर्वशास्त्र विशारद श्रीभागवत व्याख्यानादज्ञानं मे विनाशय ॥

अन्य संकल्पः—मम सर्वविध पातक निवृत्ति द्वारा—परमेश्वर प्रीत्यर्थं करिष्यमाण श्रीमद्भागवत सप्ताह यज्ञ कर्मणः सांगतासिद्ध्ये अमुकगोत्रममुक शर्माणम् ब्राह्मणं एभिः द्रव्यैः श्रीमद्भागवत पठनकरणार्थम् तथा च गणपति विष्णो जपकर्तारं युष्मानहं वृणे। पुस्तक पूजनम्—नारिकेलं गृहीत्वा—

संसार सागरे मग्नं दीनं मां करुणानिधे
कर्मग्रह गृहीतांगं मामुद्धर भवार्णवात् ॥ १ ॥
श्रीमद् भागवताख्यस्त्वं प्रत्यक्षः कृष्ण एवहि
स्वीकृतोऽसि मयानाथ मुक्त्यर्थं भवसागरे ॥ २ ॥
मनोरथो मदीयोयं सफलः सर्वथा त्वया
निर्विघ्नेनैव कर्तव्यो दासोहं तव केशव ॥

॥ भागवतार्थं ॥ भगवता ब्रह्मणे प्रोक्तं भागवतम्
भा शब्दः कीर्तिवचनो ग शब्दो ज्ञानवाचकः
सर्वेष्ट वचनोवश्च तो विस्तारस्य वाचकः ॥१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कीर्तेः ज्ञानस्य सर्वेष्टस्य च विस्तारणादिकम्
अस्य भागवतं नाम श्री व्यासेनेति कीर्तितम् ॥२॥
धर्मार्थ काम मोक्षांश्च वलिवर्ण चतुष्टयी
ते प्राप्यन्ते यतोऽनेन तस्माद् भागवतं स्मृतम् ॥३॥
भाति सर्वेषु लोकेषु गीयते नारदादिभिः
वर्तते सर्व शास्त्रेषु तस्मात् भागवतं विदुः ॥४॥

भागवत के चार अक्षर है—भा—कीर्तिका, ग—ज्ञानका, व—सर्वाभीष्टका, त—विस्तार का वाचक है। अर्थात् कीर्ति ज्ञान तथा सर्वाभिष्ट का विस्तार कर जो भक्तों को—भक्ति प्रदान करता है वह भागवत है। अथवा--धर्म--अर्थ काम मोक्ष रूप चतुर्वर्ग का प्रदान करने के कारण—इसका नाम भागवत है।

॥ श्रीमद्भागवत सप्ताह प्रमाणम् ॥

आद्येहिरण्याक्षवधं द्वितीये भरतावधि
तृतीये त्वब्धि मथनं चतुर्थे कृष्ण जन्म च ॥
पंचमे रूक्मिणी ग्राहं षष्ठे चोद्धव वादकम् ।
सप्तमेऽह्नि समाप्तिः स्यात्सप्ताहं मुनि रब्रवीत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ द्वितीय प्रकार ॥

मनुकर्द्दम संवाद पर्यन्तं प्रथमेऽहनि ॥ ५० अध्याय
ऋषभाख्यान पर्यन्तम् द्वितीय दिवसे वदेत् ४९ अ०
तृतीये दिवसे कुर्यात् सप्तमस्कन्ध पूरणम् ५४ अ०
कृष्णाविर्भाव पर्यन्तं चतुर्थेऽहनि वाचयेत् ५१ अ०
रूक्मिण्युद्वाह पर्यन्तं पंचमेऽहनि वदेत्सुधी ॥ ५१ अ०
श्री हंसाख्यान पर्यन्तं षष्ठेऽहनि वाचयेद्ध्रुवम् ५० अ०
सप्तमे दिवसे कुर्याच्छ्री भागवत पूरणम् ॥ ३१ अ०
३३५ अध्याया

अथ स्कन्धानुसारेण कस्मिन्दिने कियदवधि पाठ विरामः

प्र० दि० आदितः तृतीयस्कन्धस्य १९ अध्यायान्तं यावत् पाठः
द्वि० दि० पंचमस्कन्धस्य १५ अध्यायान्तं यावत् पाठः
तृ० दि० अष्टमस्कन्धस्य नवमाध्यायान्तं यावत् पाठः
च० दि० दशमस्कन्धस्य पूर्वार्धे तृतीयाध्यायान्तं यावत् पाठः
पं० दि० दशमस्कन्धस्य त्रिपंचाशदध्यायान्तं यावत् पाठः
ष० दि० एकादशस्कन्धस्य सप्तमाध्यायान्तं यावत् पाठः
स० दि० सर्वम् १२ स्कन्धस्य त्रयोदशाध्याय पर्यन्तं पाठः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ भागवत माहात्म्यम् ॥ कौशिक संहितायाम्

एतस्य श्रवणं प्रोक्तं चतुर्धा मुनिसत्तमैः ।
सात्त्विकं राजसं चैव तामसं निर्गुणं तथा ॥
सप्ताहं राजसं प्रोक्तं तामसं सालसं तु यत् ।
सात्विकन्त्वेक विंशाहं तथैवाष्टा दशाहकम् ॥
तथा पंचादशाहं चानियतं निर्गुणं स्मृतम् ।
राजसे त्वर्थ संकोचस्तामसे स्मृति विभ्रमः ॥
सात्त्विकं सुख वोधाय निर्गुणं सर्वतो वरम् ।
सात्विक श्रवणेनैव वहवो लेभिरे सुखम् ॥
इत्युक्तवन्तं सुतं तु प्रोवाच मुनि सत्तमः ॥
पक्ष श्रवण पक्षे हिं द्वाविंशाध्यायकं पठेत्
नित्यमेव प्रकुर्वीत सप्तमे सप्तविंशातिः ॥
यद्वा सर्वेषु काव्येषु यथा वक्तुः सुखं भवेत्
तथैव वाचनीयं वा प्रशस्तं चोत्तरन्तु वा ॥

॥ द्वादशस्कन्ध भगवान के द्वादश अंग है ॥

यथा—पादादि जानु पर्यन्तं प्रथमस्कन्ध ईरितः
तदूर्ध्वं कटि पर्यन्तम्--द्वितीय स्कन्ध उच्यते ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृतीयो नाभि रित्युक्त श्चतुर्थ उदरं मतम्
पंचमो हृदयं प्रोक्तं षष्ठः कंठं सबाहुकम् ॥
सर्व लक्षण संयुक्तं सप्तमो मुख मुच्यते
अष्टम श्चक्षुषी विष्णोः कपोलौ भ्रुकुटिः परः ॥
दशमो ब्रह्म रन्ध्रं च मन एकादशः स्मृतः
आत्मातु द्वादशस्कन्धः श्रीकृष्णस्य प्रकीर्तितः ॥

अन्यः

पादौ यदीयौ प्रथम द्वितीयौ
तृतीय तुर्यौ कथितौ यदूरू
नाभिस्तथा पंचम एव षष्ठो
भुजान्तरं दोर्य गलं तथान्यौ
कंठस्तु राजन् नवमो यदीयो
मुखारविन्दं दशमं प्रफुल्लम् ॥
एकादशो यश्च ललाट पट्टम्
शिरोऽपियद् द्वादश एव भाति ॥

अध्याय संख्या

स्कन्धेषु सर्वेषु गतां ब्रुवेहम्
अध्याय संख्यां शृणुत द्विजेन्द्राः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकोनविंशा दश राम रामाः
तथैक त्रिंशत् रस नेत्र संख्याः ॥१॥
नवेन्दु संख्या शरचन्द्र संमिता
चतुर्द्वयं चाग्रिम के तथैव
खनेन्दु संख्या विधुवह्नि संख्या
अध्याय संख्या क्रमतः त्रिरूपाः ॥

वामवाहु मे—स्वागता छन्द
भ्रमरगीत मे—मालिनि छन्द
वेद स्तुति मे—नर्कुटक छन्द
हय दशमिर्न जौ भज जला गुरू नर्कुटकम्
सप्तभिः दशभिश्चात्र यतिः
गोपीगीत मे—कनक मंजरी छन्द
कनक मंजरी नश्च रौलगौ इति लक्षणम्
प्रायः पुष्पिताग्रा—मन्दाक्रान्ता भुजंग प्रयात
स्रग्विणी—शिखरिणी आदि छन्द है
वसन्त तिलका---यं प्रव्रजन्त
राजहंसिका---जयतितेऽधिकं
द्रुतविलम्बित---निगम कल्पतरो
शार्दूला---जन्माद्यस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री हरिवंश नवाह पारायण विधि

श्रीमद् भागवत सप्ताह वत् मण्डप रचनां विधाय सपत्नीको यजमानः आचम्य---प्राणानायम्य---देशकालौ संकीर्त्य अमुक गोत्रोऽमुकशर्माहं ममानेक जन्मार्जिताऽनपत्यत्वमृतापत्यत्वादि निदानभूत वालघातनिक्षेपहरण विप्ररत्नाप्रहरणादि जन्य दुरित समूलनाश द्वारा दीर्घायुष्मद्बहु पुत्रादि संतति प्राप्ति कामो हरिवंश श्रवणं करिष्ये।

तदंगत्वेन निर्विघ्नतार्थं सांगता सिद्ध्यर्थं च गणपति मातृका वरुण पुण्याहवाचनं नान्दीश्राद्धं रक्षाभिधानम्---ब्राह्मण वरणम् सर्वतोभद्रमण्डल विष्णोः पूजनं च करिष्ये। सर्वं संपाद्य---विप्रस्य पादप्रक्षालनम् कुर्यात्---वरण द्रव्याणि गृहीत्वा देशकालौ संकीर्त्य---मम दीर्घायुष्मत्पुत्रप्राप्तये अमुक गोत्रं अमुक शर्माणं ब्राह्मणमेभिर्गन्धाक्षतपुष्पतांबूल स्वर्ण मुद्रिका---कमण्डलु वासोभिर्हरिवंश श्रवणार्थं वाचकत्वेन श्रावयितारं त्वामहं वृणे। वृतोऽस्मीति प्रतिवचनम्। पंच ब्राह्मणान् संकल्पयेत्---कथा भंग निवृत्तये सांगता सिद्धये च 'विष्णोर्द्वादशाक्षर सन्तान गोपाल महारुद्र जप पार्थिव पूजा गणेश मंत्र---जप करणार्थम् युष्मानहं वृणे। वृताःस्म---इति वचनम्। नारायणाय नमः नराय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमः नरोत्तमाय नमः देव्यै नमः सरस्वत्यै नमः व्यासाय नमः ।

व्यास पूजां गन्धाक्षत वस्त्र पुष्पमालादिभिः कुर्यात् पार्थयेत्

नमस्ते भगवन् व्यास सर्व शास्त्रार्थ कोविद
ब्रह्म विष्णु महेशान मूर्ते सत्यवती सुत ।। इति

नारिकेलमपि पुस्तकोपरि दद्यात् ।।

अन्य संकल्पः

ॐ अद्येत्यादि---अमुक गोत्रस्य सपत्नीकस्य मम अमुक शर्मण उपस्थित शरीराविरोधेन जन्मजन्मान्तरार्जित गो विप्र वाल स्त्रीहनेनापस्थितातिथि जनापमान गुरु विप्रदेव धनापहरण दीनानाथ जनशातनादि पातकोपपातक मूलक जन्मकालिक जन्मलग्नावधिक पापग्रहयुत वीक्षितापत्यस्थानप्रभृति दोष सूचित सकल पुत्र प्राप्ति प्रतिवन्धकताऽशेषारिष्ट झटिति समूल ध्वंस पूर्वक सत्वर दीर्घायुर्वंशकर विद्या विनय धर्मैश्वर्य शौर्यवीर्य गांभीर्य सौन्दर्य सामयिकाखिलगुणात्मक तौरस सत्पुत्र प्राप्ति कामनया अमुक क्षेत्रे महाभारतांन्तर्गताखिल हरिवंश पुराणस्य नवाह पारायण श्रवणं सपत्नीकोऽहं करिष्ये ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कन्या प्रसूतत्व-मृतवत्सात्व-काकवन्ध्यात्व-वन्ध्यात्वदोषाणा-मन्यतमे सति संकल्प वाक्ये स्वमत्योहः कर्तव्यः ।

स्त्रीणां दोष विशेषे तदावृत्ति संख्या---

दशावृत्तीर षुष्पार्थं मृतवत्सातु सप्तवै
पंचावृत्तीः स्रवद्गर्भा काकवन्ध्या त्रयन्तथा
कन्या प्रसूतैश्चकावृत्तिं श्रुत्वा पुत्र मवाप्नुयात् ॥

॥ पारायण विधिः ॥

प्रथमे कृष्ण जननं द्वितीये धेनुकार्दनम्
तृतीये कुण्डिनपुरे---रूक्मिणी हरणं तथा ॥
चतुर्थेषट् पुरवध मार्या स्त्रोत्रं च पंचमे
मधोश्चरित्रं षष्ठेवै सप्तमे पावकस्तुतिः ॥
अष्टमे पौड्ंकवधो नवमेऽह्नि समापयेत्
वाचयेदनयारीत्या हरिवंशं यथाक्रमम् ॥

अन्यदपि प्रमाणम्

प्रथमे यदुवंशस्य कीर्तनावधि कीर्तयेत्
अध्यायानां पंचत्रिश त्कीर्तनीयाहि तद्दिने ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्वितीयेऽह्नि पठेद्विद्वान् धेनुकस्य वधावधि
अध्यायानां त्रयस्त्रिंशत् पठितव्याहि तद्दिने ॥
जरासन्ध वधो युद्धे गोमन्तस्य च रोहणम्
तावत्प्रकीर्तयेद्धीमान् तृतीयेऽह्नि विचक्षणः ॥
अध्याया नामून त्रिंशत् कीर्तनीयाहि तद्दिने
पारिजातस्य हरणम् युद्धं कृष्णेन्द्रयोर्मिथः
प्रकीर्तये चतुर्थेऽह्नि तावदेव न यः सुधीः
एकत्रिंशत्परिमितान् अध्यायान् समुदीरयेत्
सैन्य भंगः शम्बरस्य वाक्यं श्रीनारदस्य च
तावत् प्रकीर्तयेत् विद्वान् पंचमेऽह्नि प्रयत्नतः
त्रयस्त्रिंशत् परिमिता अध्याया विहिता स्तदा
जनमेजयस्य वंशस्य भविष्यस्य च वर्णनम्
षष्ठेऽह्नि तावद्वक्तव्यं पारायण शुभेच्छुना
अध्यायास्तु चतुर्विंश न्मितास्तस्मिन् प्रकीर्तिताः
सप्तमे दैत्य सैन्यानां विस्तारो यावदेवहि
अध्यायाश्चाष्ट चत्वारिं शन्मिता एव च कीर्तिता
यावद्धि घंटा कर्णस्य समाधे वर्णनं भवेत्
तावदेव पठेत्धीमान् अष्टमेऽह्नि प्रयत्नतः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्मिंस्तु दिवसेऽध्यायाः कीर्तितास्त्रिंश देवहि
समापितव्यम् नवमे धोरकंठं शुभेप्सुभिः
अध्याया पंचपंचाशत् मितास्तु विहितास्तदा
हरिवंश नवाहस्य विधिरेषः उदाहृतः ॥
क्षणं विश्रम्य मध्यान्हे प्रपठेत्तु दिनावधि
गायत्र्या हवनं कुर्यादथ वा विष्णु मंत्रतः
भोजये त्पायसैर्विंप्रान्मधुरैश्च विशेषतः
दक्षिणा चात्र सामान्या निष्कत्रय मितोदिता
गो द्वयं चाथवैकां गां शय्यां वस्त्रं सुभूषणम्
दद्यात्पुत्र प्राप्ति कामो वित्तशाठ्यं न कारयेत् ॥

॥ उक्त प्रकारेण प्रतिदिनं अध्याय संख्याक्रमः ॥

प्र० दि० हरिवंश पर्वणः आदितः ३४ अध्यायान्तंपाठः। अ०सं० ३५
द्वि० दिने विष्णु पर्वणः १३ अध्यायान्तं पाठः । अ० सं० ३३
तृ० दिने विष्णु पर्वणः ४२ अध्यायान्तं पाठः । अ० सं० २६
च० दिने विष्णु पर्वणः ७३ अध्यायान्तं पाठः । अ० सं० ३१
पं० दिने विष्णु पर्वणः १०६ अध्यायान्त पाठः । अ० सं० ३३
ष० दिने भविष्य पर्वणः २ अध्यायान्तं पाठः । अ० सं० २४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स० दिने भविष्य पर्वणः ५० अध्यायान्तं पाठः । अ० सं० ४८
अ० दिने भविष्य पर्वणः ८० अध्यायान्तं पाठः । अ० सं ३०
न० दिने भविष्य पर्वणोऽवशिष्ट भागः १३५ अध्यायान्तं पाठः
अध्याय संख्या ५५

॥ अथ वाल्मीकीय रामायण नवाह कथा विश्राम विधिः ॥

प्रथमे तु अयोध्यायां षट् सर्गान्ते शुभास्थितिः
तस्यै वाऽशीति सर्गान्ते द्वितीय दिवसे वदेत् ॥१॥
तथा विंशति सर्गान्ते चारण्यस्य तृतीयके
दिने चतुर्थे षट् चत्वारिंशत् सर्गे कथा स्थितिः ॥२॥
किष्किन्धाख्यस्य काण्डस्य पाठविद्भि रुदाहृता
सुसप्त चत्वारिंशत्के सर्गान्ते सुन्दरे स्थिति ॥३॥
पंचमे द्रिवसे कुर्यात्---अथ षष्ठ स्तथोच्यते
युद्धकाण्डस्य पंचाशत् सर्गान्ते विमलास्थितिः ॥४॥
एकोनशतसंख्याके सर्गान्ते सप्तमे दिने
युद्धस्यैव तु काण्डस्य विश्रामः संप्रकीर्तितः ॥५॥
तथा चोत्तर काण्डस्य षट् त्रिंशत् सर्ग पूरणे
अष्टमे दिवसे कृत्वा स्थितिश्च नवमे दिने ॥६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शेषं समाप्य युद्धस्य चान्त्यं सर्गः पुनः पठेत्
राम राज्य कथा यस्मिन् सर्व वांछित दायिनी
एवं पाठ क्रमः पूर्वै राचार्यैश्च विनिर्मितः

पुत्रकामो वाल काण्डम् ।। लक्ष्मीकामो अयोध्या काण्डम् ।। नष्टराज्यप्राप्तिकामो किष्किन्धा काण्डम् ।। सर्वकामः सुन्दर काण्डम् ।। शत्रुनाशकामः सर्वकामश्च लंकाकाण्डं पठेत्

।। अन्य प्रकार ।।

उद्योगं रामराज्यस्य भरतोद्योग मेव च ।
मारीचस्य वधं यावद् सुग्रीवपुर वेशनम् ।। १ ।।
लक्ष्मणस्य ततो यावद् त्रिजटास्वप्न दर्शनम् ।
रावणस्य ततो यात्रा जयार्थं देव सद्मसु ।। २ ।।
समुद्र तरणं यावत् निकुंभ वध मेव च ।
ततःपूर्ण कथां कुर्यात् नवमेऽहनि सर्वदा ।। ३ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथा

प्र० दिने आदितोऽयोध्या काण्डस्य पंचम सर्गान्तं पाठः। सर्ग ८२
द्वि० दिने अयोध्याकाण्डस्यैव द्व्यशीतितम सर्गान्तं पाठः। सर्ग ७७
तृ० दिने अरण्यकाण्डस्य चतुश्चत्वारिंशत्सर्गान्तं पाठः । सर्ग सं० ८१
च० दिने किष्किन्धाकाण्डस्यैकत्रिंशत्सर्गान्तं पाठः। सर्ग सं० ७२
पं० दिने सुन्दर काण्डस्य सप्तविंशति सर्गान्तं पाठः। सर्ग सं० ६३
ष० दिने लंका (युद्ध) काण्डस्य द्वाविंशति सर्गान्तं पाठः। सर्ग ६३
स० दिने लंका काण्डस्यैव सप्तसप्तति सर्गान्तं पाठः । सर्ग सं० ५५
अ० दिने उत्तरकाण्डस्य षड्विंशति सर्गान्तं पाठः । सर्ग सं० ७७
न० दिने उत्तर काण्डस्य समाप्ति पर्यन्तं पाठः। सर्ग सं० ८५ इति

:❀:❀:

अन्य

प्रथम दिने ८३ सर्गाः। द्वितीय दिने—७४ सर्गाः। तृतीय दिने ७५ सर्गाः। चतुर्थ दिने—१०१ सर्गाः। पंचम दिने—६८ सर्गाः। षष्ठ दिने—७१ सर्गाः। सप्तम दिने—४६ सर्गाः। अष्टम दिने---६६ सर्गाः। नवम दिने---७७ सर्गाः। संकलनया ६४८ सर्गाः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बालकाण्डे ७७ सर्गाः। अयोध्याकाण्डे ११९ सर्गाः। अरण्यकाण्डे ७५ सर्गाः। किष्किन्धाकाण्डे ६७ सर्गाः। सुन्दरकाण्डे ६८ सर्गाः। युद्धकाण्डे १३१ सर्गाः। उत्तरकाण्डे १११ सर्गाः॥

॥ अथ देवीभागवतस्य नवाह विधानम् ॥

प्र० दिने आदितस्तृतीयस्कन्धस्याध्याय त्रयान्तम्। अ०सं०३५

द्वि० दिने चतुर्थस्कन्धस्याष्टमाध्यायान्तं यावत्। अ० सं० ३५

तृ० दिने पंचमस्कन्धस्याष्टादशाध्यायान्तं यावत्। अ० सं० ३५

च० दिने षष्ठस्कन्धस्याष्टादशाध्यायान्तं यावत्। अ० सं० ३५

पं० दिने सप्तमस्कन्धस्याष्टादशाध्यायान्तं यावत्। अ० सं० ३१

ष० दिने अष्टम स्कन्धस्य सप्तदशाध्यायान्तं यावत्। अ० सं० ३९

स० दिने नवम स्कन्धस्याष्टाविंशति तमाध्यायान्तं। अ० सं० ३५

अ० दिने दशम स्कन्धस्य त्रयोदशाध्यायान्तम्। अ० सं० ३५

न० दिने द्वादशस्कन्धान्तं यावत्पारायणम्। अ० सं० ३८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ देवीभागवताध्याय संख्या— ॥

प्र० स्कन्धे २० ॥ द्वितीय स्कन्धे १२ ॥ तृ० स्कन्धे ३० ॥ च० स्कन्धे २५ ॥ पं० स्कन्धे ३५ ॥ ष० स्कन्धे ३१ ॥ स० स्कन्धे ४० ॥ अ० स्कन्धे २४ ॥ नवम स्कन्धे ५० ॥ द० स्कन्धे १३ ॥ ए० स्कन्धे २४ ॥ द्वा० स्कन्धे १४ ॥ एवं ३१८ अध्यायाः ॥

॥ अथाष्टादश पुराण नामानि ॥

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ॥
तथान्यं नारदीयं च मार्कण्डेयं च सप्तमम् ॥ १ ॥
आग्न्येयमष्टमं प्रोक्तं भविष्यं नवमं तथा ॥
दशमं ब्रह्म वैवर्तं लिंगमेकादशं तथा ॥ २ ॥
वाराहं द्वादशं प्रोक्तं स्कान्दं चात्र त्रयोदशम् ॥
चतुर्दशं वामनं च कौर्मं पंचदशं तथा ॥ ३ ॥
मात्स्यं च गारुडं चैव ब्रह्माण्डमष्टादशं तथा ॥ इति

॥ अनुष्ठान तत्परान् विद्वान् सादरं तोषयेत् ॥

यथा ग्रहो द्विजस्तद्वद् विज्ञेयो वेदपारगः ।
तोषयन् मृदुवस्त्राद्यै स्तुष्टमेनं विसर्जयेत् ॥ १ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्नहीनो दहेद्राष्ट्रं मंत्रहीनश्च ऋत्विजः ।
यजमानमदक्षिण्यम् नास्ति यज्ञसमोरिपु॥२॥ शान्ते मयूख

॥ दक्षिणादाने विलम्ब करणे दोषः ब्रह्मवैवर्ते ॥

दक्षिणां विप्रमुद्दिश्य तत्कालं चेन्नदीयते ।
एक रात्र व्यतीतेतु तद्दानं द्विगुणं चरेत् ॥ १ ॥
मासे शतगुणं प्रोक्तं द्विमासेतु सहस्रकम् ।
संवत्सर व्यतीतेतु सदाता नरकं व्रजेत् ॥
नददाति यदादाता ग्रहीता न च याचते ।
उभौतौ नरकं यातौ यावच्चन्द्र दिवाकरौ ॥

देवी भागवते—

कृत्वा कर्म च कर्ता च तूण दद्याच्च दक्षिणाम्
तत्क्षणं फलमाप्नोति वेदैरुक्तमिदं मुने ॥
कर्मी कर्मिणि पूर्णे च तत्क्षणे यदि दक्षिणाम्
न दद्यात् ब्राह्मणेभ्यश्च दैवेना ज्ञानतोऽथवा ॥
मुहूर्ते समतीतेतु द्विगुणा साभवेद् ध्रुवम्
एकरात्र व्यतीते च भवेच्छत गुणा च सा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुद्रक :—
उदयाचल प्रेस
३१, मुखराम कानोड़िया रोड,
हवड़ा–७११००१

फोन { ६६-५४८८
२०-०१७२
२०-२५६१ }

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection